# सागरिका

अङ्कः 52/1-2 (संयुक्ताङ्कः)

विक्रमसम्वत् 2082 (दिसम्बर 2025 ई.)





महामतिश्रीप्राणनाथमहात्मनः



श्रीकृष्णप्रणामी-धर्माचार्याणाम्
अनन्तश्रीविभूषितानांजगद्गुरु-आचार्याणां श्रीकृष्णमणिमहाराजानां
सहयोगेन साकारीभवति सागरिका

ISSN : 2229-5577

# सागरिका

**त्रैमासिकी समीक्षित-संस्कृतशोधपत्रिका**

अङ्कः 52/1-2 संयुक्ताङ्कः, विक्रमसम्वत् 2082 (दिसम्बर 2025 ई.)
द्विपञ्चाशद्वर्षे प्रथमद्वितीयाङ्कः

**संस्थापकः**
स्व. रामजी उपाध्यायः

**संरक्षकः**
प्रो. यशवन्तसिंहठाकुरः
कुलपतिः

**प्रधानपरामर्शकः**
राधावल्लभत्रिपाठी

**प्रधानसम्पादकः**
राजेन्द्रयादवः

**सम्पादिका**
किरण आर्या

**सम्पादकमण्डलम्**
नौनिहालगौतमः, रामहेतगौतमः, शशिकुमारसिंहः

**सागरिकासमितिः**
संस्कृतविभागः
डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम् (म.प्र.)

ISSN : 2229-5577 UGC Approved JN. No.-42268

# सागरिका

**SAGARIKA**

Quaterly Research Journal in Sanskrit (Peer Reviwed)

Vol. 52/1-2

Four Issues Every Year-

अङ्कप्रकाशनं प्रतिवर्षम् आषाढ़-आश्विन-पौष-चैत्रमासेषु

**परामर्शदात्री समितिः**

1. प्रो. मुरलीमनोहरः पाठकः, दिल्ली
2. प्रो. रमाकान्तपाण्डेयः, जयपुरम्
3. प्रो. विष्णुकान्तपाण्डेयः, जयपुरम्
4. प्रो. व्रजकिशोरः स्वाइं, ओडिशा

**पत्रव्यवहारसङ्केतः**

**डॉ. किरण आर्या**

सहा. प्रा., संस्कृतविभागः

डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम् 470003 (म.प्र.)

Email : sanskritsagar1946@gmail.com

**प्रकाशिका – सागरिकासमितिः**

संस्कृतविभागः, डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम् (म.प्र.)

पत्रिकेयं विश्वविद्यालयस्य dhsgsu.edu.in इति पोर्टलमध्येऽध्येतुं शक्यते।।

**सदस्यताशुल्कम्**

वार्षिकम् - 100 रुप्यकाणि,

आजीवनम् प्रतिसंस्थम् - 2000 रुप्यकाणि, प्रत्यङ्कम् - 25 रुप्यकाणि

**शब्दसज्जा : अमनप्रकाशनम्,** नमकमंडी, कटरा, सागरम् (म.प्र.)

**मोबा.** : 9826434225

## सम्पादकीयम्

सम्मान्याः सत्पाठकाः !

जानन्त्येव तत्र भवन्तो भवन्तः यदस्ति सागरिकायाः सुदीर्घकालिकं शैक्षिकं योगदानम्। गीर्वाणवाण्यां नैरन्तर्येण प्रकाश्यमानेयं सागरिका साम्प्रतं न केवलं द्विपञ्चाशद्वर्षे विवरीवर्तते अपितु शास्त्रगतवैविध्यानुस्यूतेयं पत्रिका संस्कृतजगति बहुप्रतिष्ठामपि बाभज्यते।

पत्रिकायामस्यां संस्कृतशास्त्रप्रेमिणां गवेषणामूलकानि सामाजिकोपयोगीनि शोधपत्राणि, शोधार्थिनां कृते च पाठ्यसामग्रीं परिवेषयन्त आलेखाः प्रकाश्यन्ते।

प्रकाश्यमानानामालेखानां समीक्षा-समिति-द्वारा परीक्षण-निरीक्षणानन्तरं प्रकाशनम्भवेदित्यस्याः पत्रिकाया उद्देश्यम्। येन आलेखानां लेखकानां च पुनरावृत्तिः, तत्रामौलिकत्वम्, भाषागतदूषणमित्यादिदोषरहितेयं सागरिका नितरामुन्नयनसोपाने वरीवर्धेत इति भावनया आमन्त्र्यन्ते आगामिष्वंकेष्वपि भवतां सुधीलेखकानामालेखाः। अपि च सादरं धन्यवादार्हास्ते सुधियः, येषां लेखनीह समुपस्थिता।

पत्रिकाया अयमङ्कः विश्वव्यापिजालपुटे ( विश्वविद्यालय-पोर्टलमध्येऽवलोकयितुं शक्यते।।

**- सम्पादिका**

# कार्त्तज्ञ्याञ्जलिः

सागरिका न केवलं सागराय सागरे वा प्रतिष्ठिता अपितु संस्कृतस्य क्षेत्रे स्वीयायै शोधसारगर्भितायै सकलेऽपि जगति सुप्रतिष्ठिता विद्यते। तत्र भवतां पूज्यसन्तानां अनन्तश्रीविभूषितानां जगद्गुरु - आचार्याणां श्रीकृष्णमणिमहाराजानां समक्षं यदाऽस्याः पत्रिकायाः विषये चर्चाऽभवत्तदा ते उत्कण्ठीभूय सहयोगप्रदानाय तत्क्षणमेव स्वीकृतिं प्रदत्तवन्तः। तेषां हृदये भारतीयसंस्कृतेः संस्कृतस्य च संरक्षणं प्रति या अगाधश्रद्धा भक्तिश्च दोधूयमाना दरीदृश्यते सा शब्दाकृतौ वक्तुमसम्भवैव। महाकवितुलसीदासशब्देषु- 'सन्त हृदय नवनीतसमाना', पंक्तिरेषा तेषु पूर्णतया चरितार्थीभवति। तेषां समस्तं भक्तिमयं कुटुम्बम् आश्रमश्चेत्यादि सर्वत्र दार्शनिकेषु, साम्प्रदायिकवर्गेषु च संस्तुत्यं विद्यते। ते खलु- 'सुख शीतल करूँ संसार' इति अमृतवाक्यमनुपालयन्तः स्वोदारतया, उदात्तदार्शनिकतया, भक्त्या च सम्पूर्णमपि राष्ट्रं किमपि अलौकिकं कर्तुं प्रयतन्ते।

सम्पादिका-दायित्वं निर्वहन्ती अहं तत्संस्थायै, तथा च तत्र अनन्यकृष्णभक्तौ रताः, विरताः, परिचारक-परिचारिकाः , तेभ्यः सर्वेभ्यः भावसुमनं समर्पयामि। आशासे च यदापि ननु गर्वं गौरवं चावहन्त्यै संस्कृतभाषायै, एतन्निहितदर्शनभक्तये, शोधादिकार्याय च आवश्यकता भविता तदास्मदभावसमक्षं पूज्याः स्वामिवर्याः भावरूपेणोपस्थिताः भविष्यन्ति, तदर्थमहं, मे च संस्कृतविभागपरिवारः , विश्वविद्यालयश्च भूयोभूयः शुभकामनासहितं सादरं प्रणमाञ्जलिं समर्पयति।।

**सम्पादिका**

# अनुक्रमः


| | | | | |
|---|---|---|---|---|
| 1. | अथर्ववेदस्य परिचयात्मकं समीक्षणम् | - | *कपिलदेवहरेकृष्णःशास्त्री* | *7* |
| 2. | यजुर्वेदे वर्णितं कर्मकाण्डम् | - | *ऋतुकयालः* | *20* |
| 3. | वैदिकवाङ्मये भौतिकविज्ञानम् | - | *सत्यव्रतपाण्डेयः* | *28* |
| 4. | महर्षिदयानन्दसम्मता वैदिकशिक्षा व्यवस्थायाः प्रासङ्गिकता | - | *वालखडे भूपेन्द्र अरुणः* | *35* |
| 5. | न्यायव्याकरणदर्शनयोः प्रथमार्थ-निरूपणम् | - | *राहुलशर्मा* | *44* |
| 6. | सांख्यदर्शने प्रकृतिपुरुषयोः भेददर्शनम् | - | *शान्तिलाल सालवी,* *सकीना कुमारी सालवी* | *53* |
| 7. | उपनिषद्युगीनसमाजः | - | *संजयकुमारः* | *60* |
| 8. | उपनिषत्सु लोकोपयोगिनी शिक्षा | - | *नौनिहालगौतमः* | *70* |
| 9. | ईशावास्योपनिषदि तत्त्वज्ञानाचार मीमांसानां विश्लेषणात्मकं अध्ययनम् | - | *सूर्यभानयादवः* | *79* |
| 10. | ज्ञानमूला हि उपनिषदः | - | *जागेश्वरपटले* अवधेशकुमारश्रोत्रियः | *84* |
| 11. | मनुयाज्ञवल्क्यनारदस्मृतिषु दायभागनिर्णयः | - | *राकेशकुमारःमिश्रः* *सुबलकुमारःमिश्रः* | *90* |
| 12. | नारदस्मृतौ दायभागविवेचनम् | - | *मोनिकाजांगिड़* | *96* |
| 13. | श्रीमद्भगवद्गीतानिर्दिष्टं नेतृत्वचिन्तनम्-भारतीयदृष्ट्या एकम् विश्लेषणात्मकम् अध्ययनम् | | *गैरिका कोनारः* | *104* |
| 14. | मथुराप्रसाददीक्षितकृत-वीरप्रतापनाटके नाट्यतत्त्वानामवबोधनम् | - | *शुकदेवः भोई* | *116* |

| | | | |
|---|---|---|---|
| 15. | कप्फिणाभ्युदयमहाकाव्ये ध्वनितत्त्वम् | - *निरुपमात्रिपाठी* | *124* |
| 16. | कालिदास-शेक्सपीयारयोः नायिकयोः शकुन्तला डेस्डिमोनयोः चारित्रिक-साजात्यम्ः | - *शुभ्रजित्सेनः* | *133* |
| 17. | कालिदासीये नाट्ये भेषजविमर्शः | - *मोनिकावर्मा* | *143* |
| 18. | महाकविभासस्य नाटकेषु नाट्यकला | - *आशुतोषद्विवेदी* | *152* |
| 19. | महाकविभवभूतिकृत-मालतीमाधवे नयनाभिनयत्वम् | - *किरण आर्या* | *159* |
| 20. | किरातार्जुनीयद्वितीयसर्गप्रयुक्त-कवित्वसमीक्षा | - *बाबूलालः मीना* | *165* |
| 21. | कादम्बरीकथामुखस्थपौराणिकविषयविचारः | -*आशासिंहरावत* | *175* |
| 22. | अभिनन्दकृतः कादम्बरीकथासारः, संक्षिप्तीकरणप्रक्रिया, साहित्यिक-महत्त्वं आलोचनात्मकविश्लेषणं च | - *खालिद् हसन् अब्बासी* | *184* |
| 23. | काव्यप्रकाशोक्त-लक्षणास्वरूपे ध्वन्यालोकलोचनप्रभावः | - *रविकान्तभारद्वाजः* | *202* |
| 24. | संस्कृतभाषायां सार्वनामिकशून्यता | - *माधवगोपालः* | *209* |
| 25. | तीर्थस्थलसाधनामार्गयोः दार्शनिक-मध्ययनम्ः हिमाचलशतकविशेषन्दर्भे | - *निहारिकाधाकड़* | *216* |
| | लेखक-परिचयः | | *222* |

# 1

# अथर्ववेदस्य परिचयात्मकं समीक्षणम्

*कपिलदेवहरेकृष्णःशास्त्री*

वेदेषु ज्ञान-विज्ञान-धर्म-दर्शन-सदाचार-संस्कृति-नैतिक-सामाजिक-राजनैतिकप्रभृतीनां जीवनोपयोगिविषयाणां सन्निवेशोऽस्ति। यत्र प्रत्यक्षस्य न चानुमानस्य प्रवेशस्तत्रापि ते प्रविशन्ति। स्मृति- पुराणादीनां मान्यत्वं तदनुगामित्वम् एवावतिष्ठते। प्राचीनानि धर्म-समाज-व्यवहारप्रभृतीनि वस्तु- जातानि बोधयितुं श्रुतय एव क्षमन्ते। वेदास्तु धर्ममूलतयैव सर्वथा समादृताः सन्ति। मनुना प्रोक्तश्च- 'वेदोऽखिलो धर्ममूलम्'। वेदेष्वथर्ववेदः अयमेकया भूयस्या विशिष्टतया सह संवलितोऽस्ति। यदा हि ऋग्वेदादित्रयो वेदाः आमुष्मिकफलदातारः सन्ति, तदाऽयं अथर्ववेद ऐहिकमपि फलं प्रयच्छति। जीवनं सुखसमन्वितं कर्तुं येषां साधनानामपेक्षा भवति, तेषां सिद्ध्यर्थम् अस्मिन् वेदे विविधानामनुष्ठानानां विधानं विहितमस्ति। पतञ्जलिना यद्यप्यस्य वेदस्य नवशाखाः समुल्लिखिताः, परम् इदानीन्तु पैप्पलाद-शौनकसंज्ञके द्वे एव शाखे लभ्येते। एवं प्रकारेण वेदशास्त्राणामधिकृत्यैव-अनुशीलनं क्रियते प्रबन्धैस्मिन्।

**अथर्ववेदस्य निर्वचनम् व्युत्पत्तिश्च**

अथर्ववेदस्य उपलब्धेषु अनेकाभिधानेषु अथर्ववेद-ब्रह्मवेद- अङ्गिरोवेद-अथर्वाङ्गिरसवेदादि नामानि मुख्यानि सन्ति। 'अथर्व'-शब्दस्य व्याख्या तथा तस्य निर्वचनं निरुक्ते[1] तथा गोपथब्राह्मणे[2] च प्राप्यते। 'थर्व-धातुः' कौटिल्यार्थस्तथा हिंसावाचकोऽस्ति। अतएव अथर्वशब्दस्यार्थो भवति- अकुटिलतावृत्त्या, अहिंसावृत्त्या च मनसः स्थैर्यप्राप्तकर्त्ता जनः। अस्याः व्युत्पत्त्याः सम्पुष्टौ योगस्य प्रतिपादकाः अनेकाः प्रसङ्गाः स्वयमस्मिन् वेदे प्राप्यन्ते।[3] होतृवेदादिनाम्नः

तुलनायामुपरि ब्रह्मकर्मणः प्रतिपादकत्वेन अथर्ववेदः 'ब्रह्मवेदः' कथ्यते। अथर्ववेदस्य ब्रह्मवेदनाम्नः इदमेव मुख्यकारणमस्ति, यद्यपि ब्रह्मज्ञानस्य प्रतिपादनम् अस्मिन् 'वेदे अंशतः एवाऽस्ति, तथाऽप्यस्य वैशिष्ट्यमस्ति। 'अथर्वाङ्गिरस'-पदस्य व्याख्या ते सति प्रतीतो भवति यद्वेदोऽयं ऋषिद्वयेन द्रष्टानां मन्त्राणां समूहं प्रस्तौति। अथर्वदृष्टमन्त्राः शान्ति-पुष्टिकर्म युक्ताः सन्ति। अङ्गिरस दृष्टमन्त्रास्तु आभिचारिका भवन्ति। अनेनैव कारणेन वायुपुराणे[4] तथा ब्रह्माण्डपुराणे[5] अथर्ववेदं घोरकृत्याविधिना युक्तत्वेन प्रत्यङ्गिरसयोगेन युक्तत्वेन च 'द्विशरीरशिराः' कथ्यते। प्रत्यङ्गिरस योगस्य तात्पर्यमभिचारस्य प्रतिविधानमर्थात् शान्तिपुष्टिकर्ममेवास्ति। अनेनाभिधानेन ज्ञायते यत्, अथर्ववेदे द्विविधा मन्त्राः सङ्ग्रहीताः सन्ति। शान्तिपौष्टिककर्मकर्त्ता मन्त्रः, आभिचारिक कर्मकर्ता मन्त्रः च। आङ्गिरसकल्पे मारण-मोहन-उच्चाटनादीनां प्रख्यातषट्कर्मणां विधानं दर्शितम्, एवं नारदीयपुराणस्य कथनमस्ति यत्- **तत्र चाङ्गिरसे कल्पे षट्कर्माण सविस्तरम्। अभिचारविधानेन निर्दिष्टानि स्वयम्भुवा**[6] तैत्तिरीयब्राह्मण[7] 'अथर्वणामङ्गिरसां प्रतीची' इत्यस्मिन् पदे उभयोर्मिलितस्वरूपस्य वर्णनमस्ति। अमूभ्याम् ऋषिभ्यां दृष्टमन्त्रसमूहः पृथक् सत्तामपि धारणमकरोत् इत्यपि सम्भावना। अनया दृष्ट्या गोपथब्राह्मणस्य एकस्मिन् प्रकरणे 'आथर्वणो वेदः सिद्ध्यति' 'आङ्गिरसो वेदोऽभवच्चे'ति वाक्यं लभते।[8] शतपथब्राह्मणेऽपि एतयोरुभयोरुल्लेखो लभते।[9] अथर्ववेद ऐहिकफलदायकोऽस्ति। अथर्ववेदस्य ऋत्विक् ब्रह्मा वर्तते। प्रस्थानभेदे लिखितमस्ति यत्- **अथर्ववेदस्तु यज्ञानुपयुक्तः शान्तिपौष्टिकाभिचारादि कर्मप्रतिपादकत्वेनात्यंतविलक्षण एव।**

कुमारिलभट्टेनोच्यते- **शान्तिपुष्ट्याभिचारार्थी ह्येकब्रह्मर्त्विगाश्रितः। क्रियास्तन्न प्रमीयन्तेऽत्रामयमेवात्मीयगोचरा इति।**

**अथर्ववेदस्य महत्त्वम्**

कस्याऽपि यज्ञस्य पूर्णनिष्पादनार्थं चत्वारः ऋत्विजो भवन्ति। तेषु ब्रह्मानामको ऋत्विग् यज्ञस्याध्यक्षो भवति। अस्य प्रधानकार्यं नानाविधानानां निरीक्षणं तथा सम्भावितत्रुट्याः मार्जनञ्च भवति। एतदर्थं ब्रह्मणा सर्ववेदविद्भवितव्यम्। तेन मनसा बलेनाऽपि सम्पन्नेन भवितव्यम्। किञ्च तस्य ब्रह्मणः प्रधानवेदः अथर्ववेदः एव भवति। ब्राह्मणग्रन्थेषु ब्रह्मणः महनीयगौरवमनेकत्र वर्णितमस्ति। गोपथब्राह्मणस्य कथनमस्ति त्रिभिर्वेदैः

यज्ञस्थान्तरः पक्ष एव संस्क्रियते। ब्रह्मा मनसा अपरपक्षस्य संस्कारं करोति। यथा- **स वा एष त्रिभिर्वेदैर्यज्ञस्यान्यन्तरः पक्षः संस्क्रियते। मनसैव ब्रह्मा यज्ञस्यान्यतरं पक्षं संस्करोति।।**[10]

पुरोहिताय अथर्ववेदस्य ज्ञानम् अतोऽपि आवश्यकं भवति, यदसौ राज्ञः शान्त्यास्तथा पौष्टिककार्यस्य च सम्पादनं करोति। अथर्ववेदस्य परिशिष्टे लिखितमस्ति यस्य राज्ञः जनपदे अथर्ववेदस्य ज्ञाता निवसति, तस्य राष्ट्रं निरुपद्रवं भूत्वा वृद्धिम् अभिगच्छति । यथा -

**यस्य राज्ञो जनपदे ह्यथर्वाशान्तिपारगः।**
**निवसत्यपि तद्राष्ट्रं वर्धते निरुपद्रवम्।।**
**तस्माद्राजा विशेषेण ह्यथर्वाणं।**
**जितेन्द्रियम् दान-सम्मानसत्कारैर्नित्यं समभिपूजयेत्।।**[11]

धाराद्वयमिश्रणस्य परिणतफलमेव अथर्ववेदोऽस्ति। अमुयोः एकाऽस्ति अथर्वधारा अपरा चास्ति अङ्गिरो धारा। अथर्वऋषिणा दृष्टमन्त्राः शान्तिपुष्टिकर्मभिः सह सम्बद्धाः सन्ति। अस्य सङ्केतः भागवतपुराणेऽपि अस्ति **'अथर्वणेऽदात् शान्तिं यया यज्ञो वितन्यते'।**[12] अङ्गिरोधाराऽऽभिचारिकैः कर्मभिः सह सम्बद्धाऽस्ति। येन जनसामान्ये वेदोऽयं प्रियोऽभवत्। शान्तिकर्मणा सम्बद्धत्वेन अथर्वस्य सम्बन्धं श्रौतयागात् प्रारम्भादेव अस्ति, पश्चाद् आभिचारिककर्मणा सह सम्बद्धत्वेन राज्ञः पुरोहितवर्गेभ्यो वेदोऽयम् उपयोगी अभवत्। अनेन प्रकारेण ऐहिक-आमुष्मिक-लौकिक-पारलौकिक विषयाणां प्रतिपादकत्वेन अथर्ववेदः वैदिकसंहितायां स्ववैशिष्ट्यं स्थापयति। राज्ञेऽथर्ववेदस्य सविशेषमहत्त्वमस्ति। राज्ञे शान्तिकपौष्टिककर्मणः तुलापुरुषादिदानस्य च महती आवश्यकता भवति। एवंविधस्य सर्वेषां विधानमथर्ववेदस्य स्वसम्पत्तिरस्ति। अस्मिन् विषये पुराण-स्मृति-ग्रन्थानां प्रचुरप्रमाणानि समुपलब्धानि भवन्ति। विष्णुपुराणस्य स्पष्टकथनमस्ति पौरोहित्य-शान्तिकपौष्टिकादि कर्माणि अथर्ववेदेनैव राज्ञः कर्त्तव्यमस्ति। मत्स्यपुराणस्य कथनमस्ति पुरोहितेन अथर्वमन्त्रे ब्राह्मणे च पारङ्गतेन भवितव्यम् (पुरोहितं तथा अथर्वमन्त्र-ब्राह्मण-पारगम्)। कालिदासस्य कथनेनाप्यस्य कथनस्य पुष्टिर्भवति। कालिदासेन वशिष्ठमुनये 'अथर्वनिधिः' इत्येवं विशेषणं दत्तम्, यस्येदं तात्पर्यमस्ति- रघुवंशोद्भवानां पुरोहितः मुनिर्वशिष्ठः अथर्वमन्त्राणां तथा तेषां क्रियाकलापानां च भाण्डारः आसीत्।[13] नृपः अजः

अथर्ववेदमन्त्रैः गुरुवशिष्ठेन अभिषिक्तो भूत्वा शत्रुभ्यः दुर्धर्षो अभवत्। अत्र कालिदासः वशिष्ठं 'अथर्ववेत्ता' इति कथयति। अथर्ववेदः अभिचारक्रियायाः प्राधान्येन प्रतिपादकः अयं वेदः अथर्वनामकर्षिणा दृष्टः। वेदेष्वथर्ववेदः अयमेकया भूयस्या विशिष्टतया सह संवलितोऽस्ति। यदा हि ऋग्वेदादित्रयो वेदाः आमुष्मिकफलदातारः सन्ति, तदाऽयं अथर्ववेद ऐहिकमपि फलं प्रयच्छति। जीवनं सुखसमन्वितं कर्तुं येषां साधनानामपेक्षा भवति, तेषां सिद्ध्यर्थम् अस्मिन् वेदे विविधानामनुष्ठानानां विधानं विहितमस्ति। ऋग्वेदत्रयी तथाऽथर्वस्य पार्थक्यं स्पष्टतः ग्रन्थेषु कृतम्। वेदत्रयी यत्र पारित्रिकफलदाताऽस्ति तत्राथर्ववेदः लौकिकफलदाताऽस्ति। अस्मिन् सन्दर्भे ध्यातव्यं तथ्यमिदमस्ति जयन्तभट्टेन न्यायमञ्जर्यामथर्ववेदस्य प्राथमिकत्वमुद्घोषितम्- 'तत्र वेदाश्चत्वारः, प्रथमोऽथर्ववेदः' इति। नागरखण्डः अपि अमुम् आद्यवेदो वदति, तथा प्रमाणयति यदथर्ववेद एव सार्वलौकिककार्यसिद्ध्यर्थं मुख्यरूपेण प्रयुक्तो भवति। अत एवायं आद्यवेदत्वेन प्रथितः इति।[14] तथाहि छान्दोग्योपनिषदि वेदानां वर्णन प्रसङ्गे- 'ऋग्वेद भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदपित्र्यं राशिं देवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्पदेवजनविद्याम् एतद् भगवोऽध्येमि' इत्युक्तम्।[15] सायणाचार्योऽपि अथर्वव्याख्यायाम्- पौरोहित्यशान्तिकपौष्टिकानि राज्ञामथर्ववेदेन कारयेद् ब्रह्मत्वञ्च' इत्युल्लिख्य विष्णुपुराणोक्तमुद्धरयति-

**शान्तिपुष्ट्यभिचारार्था एकब्रह्मत्विगाश्रयाः।**
**क्रियन्तेऽथर्ववेदेन त्र्यय्येवात्मीयगोचराः।।**[16]

इत्थं नृपाणां निखिलं पौरोहित्यं शान्तिकर्माणि पुष्टिकर्माणि च अथर्ववेदायत्तानि, तथा यज्ञीय ब्रह्मणः अपि सर्वो विधिरथर्वोक्तदिशा विधेय इति समायाति।

**अथर्ववेदे विज्ञानम्**

अथर्ववेदाभ्यन्तरे आयुर्वेदीयसिद्धान्तस्य व्यवहारस्य च अनेकेषां महनीयजिज्ञास्य विषयाणां विशिष्टसङ्कलनमस्ति। अस्यानुशीलनेन आयुर्वेदस्य प्राचीनता प्रामाणिकता-व्यापकतादीनां पूर्णपरिचयो भवति। रोगस्य, शारीरिकप्रतीकारस्य, औषधादीनां च विषये अनेकोपयोगीनां वैज्ञानिकतथ्यानां च उपलब्धिः अथर्ववेदस्य आयुर्वैदिकविशिष्टता प्रदर्शयितुं पर्याप्तः।[17] तपनरोगस्य

(ज्वरस्य) सामान्यवर्णनम् अस्मिन् वेदस्य मन्त्रे प्राप्यते। सतत- शारदग्रैष्म-शीत-वार्षिक-तृतीयकादिज्वर-प्रभेदानां निदर्शनम् अपि प्राप्यते। यक्ष्मा- विद्रघ-वातीकारादि रोगाणां वर्णनं मन्त्रेषु प्राप्यते। प्रतीकारस्य विषये आधुनिकप्रणाल्याः शल्यचिकित्सायाः निर्देशः अतीव विस्मयकारी प्रतीतो भवति। यथा मूत्रघाते शरशलाकादिना मूत्रस्य निःसारणम्, सुखप्रसवाय योनिभेदनम्, जलधावनेन व्रणस्योपचारः इत्यादयः। नाना कृमिभिः विविधरोगानामुत्पत्तेः सिद्धान्तः प्राचीनायुर्वेदशास्त्रम् आधुनिक वैद्यकशास्त्रेण सह संयोजयति। रोगकारकाणां नानाविधानां कृमीनां वर्णनम्, नेत्र-नासिकादन्तेषु प्रवेश-कर्त्तारः कृमीनां नाम तथा निःसरणस्योपायः, सूर्यकिरणैस्तेषां विनाशः इत्यादीनाम् अनेकविषयाणां वैज्ञानिकाधारोपरि निर्मिताः प्रतीताः भवन्ति। रोगनिवारणार्थं तथा सर्पविषदूरीकरणार्थ्ं च नानाविध औषधीनां, मणीनाञ्च निर्देशः प्राप्यते। 'विषस्य विषमौषधम्' इत्यस्यापि सिद्धान्तस्य निदर्शनम् अथर्ववेदस्य मन्त्रे प्राप्यते। अत एव आयुर्वेदः अथर्ववेदस्य उपवेदः कथ्यते। भौतिकविज्ञानस्य अनेकविधानां तथ्यानाम् उदाहरणम् अथर्ववेदे यत्र तत्र प्राप्यते। तं सुष्ठुतया ज्ञातुं वेदेन सह विज्ञानस्य अपि ज्ञानम् अपेक्षितमस्ति। द्वि-त्रिमन्त्रेषु निगूढवैज्ञानिकं रहस्यानाम् उद्घाटनमत्र कृतमस्ति। एकमेव विशिष्टोदाहरणमस्य विषयसङ्केतं करोति। अथर्ववेदस्य पञ्चमकाण्डस्य पञ्चमसूक्ते लाक्षायाः वर्णनमस्ति। वर्णनमिदं वैज्ञानिक दृष्ट्या नितान्तं प्रामाणिकं, तथ्यपूर्णमुपादेयं च अस्ति। आधुनिक विज्ञानेन समर्पितं समर्थितञ्च सूक्तनिर्दिष्टतथ्यमित्थमस्ति- 1. लाक्षा कस्यापि वृक्षस्य निःस्यन्दो नास्ति, प्रत्युत तस्या उत्पादनस्य श्रेयः कीटविशेषं मुख्यतया स्त्रीकीटोऽस्ति। कीटोऽयमत्र 'शिलाची'-नाम्ना ख्यातोऽस्ति। उदरमस्य रक्तवर्णं भवति। तेनैवेमाः कीटस्त्रियः शृङ्गिकं (संखिया) भक्षिकाः मन्यन्ते। इमे कीटाः अश्वत्थ-न्यग्रोध-धव-खदिरादिवृक्षाणामुपरि विशेषतः निवस्य लाक्षां प्रस्तुवन्ति। 2. स्त्रीकीटः यदा युवा भवति, तदा अण्डप्रसवात् पूर्वं तस्य देहः क्षीणो भवति। तेषां कोषाः पीताभाः भवन्ति। अत एवेमाः कीटस्त्रियोऽत्र हिरण्यवर्णा वा सूर्यवर्णाः कथ्यन्ते। एवंविधानां कीटानां शरीरोपरि सघनलोमावलिर्भवति, तेनायं कीटः 'लोमशवक्षणा' कथ्यते। लाक्षायाः उत्पत्तिविशेषरूपेण वर्षाकालस्य तमसा आच्छन्नरात्रावेव भवति। तेनाऽस्मिन् सूक्ते रात्रिः माता, आकाशश्च पिता कथ्यते।

3. पुरुषकीटोऽयं द्विधा विभज्यते- 1.सरा-सर्पणकर्ता, 2.पतत्रिणी-खे विसर्पणकत्ता पुरुषकीटः। शराः-स्त्रीकीटाः वृक्षोपरि तथैव गुल्मोपरि समानरूपेण सर्पन्ति। तेनेमाः 'स्परणी' इति कथ्यन्ते।

**ऋग्वेदस्य पूरकत्वेन-अथर्ववेदः**

ऋग्वेदः यदि अधिकांशतः आधिदैविकविषयस्याध्यात्मिकविषयस्य च मनोरममन्त्राणां सङ्ग्रहोऽस्ति, तर्हि अथर्ववेदः, आधिभौतिकविषयोपरि रचितमन्त्राणां रुचिरस्तथा प्रशंसनीयः सङ्ग्रहोऽस्ति। काव्यदष्ट्या उभयोर्मध्ये उदात्तभावनया मण्डितस्तथा मानवहृदयस्पर्शिगीतिकाव्यानां बृहत्सङ्ग्रहोऽस्ति। उभयोर्मिलित्वा आर्याणां प्राचीनतमकाव्यकलायाः रुचिर दृष्टान्त समुपस्थाय विनात्र काचिद्विप्रतिपत्तिः इति। ऋग्वेदीययज्ञयागानां विधानमत्र कृतमासीत्। किञ्च यज्ञस्य सम्बन्धः अभिचारेण सह विशेषरूपेण प्रतिष्ठितः आसीत्, अतः उद्देश्यञ्चास्य स्वर्गप्राप्त्या सह सांसारिकाभ्युदयानां शत्रूणांश्च पराजयो अप्यासीत्। अनेन प्रकारेणाथर्ववेदे याज्ञिकभावनायां विकासक्रमस्यैकः परिचयोऽपि प्राप्यते। विकासोऽयं भौतिकरूपेण आमनःस्तरीयो भवति। यज्ञस्तु प्रतीकात्मकत्वेनापि मानसिककोट्यां समायाति। अनेन प्रकारेण यज्ञस्येयमाध्यात्मिकी भावना अनौपनिषदिककल्पनापार्श्वेसमानयति। अस्मिन् काले यज्ञस्य सरलविधानमभवत्। अल्पव्ययेन, स्वल्पकालेनैव सम्पन्नं भवितुं शक्यते। अनेन प्रकारेण अथर्ववेदे पूर्वकालिकवैदिकविधानापेक्षया स्वरूपविधाने परिवर्तनं परिलक्ष्यते ।[18]

**अथर्ववेदस्य शाखाः**

पस्पशाह्निके 'नवधाऽऽथर्वणो वेदः'[19] इति लिखित्वा पतञ्जलिना अथर्ववेदस्य नवशाखाः कथिताः। पुराणानुसारेण वेदव्यासः यं शिष्यम् अथर्वस्य अध्यापनम् अकारयत्, तस्य नाम सुमन्तुः इति आसीत्। भागवतेऽस्य चर्चाऽस्ति सुमन्तुः अभिचारप्रधानवेदस्य मुख्यप्रचारकः आसीत्। तेन असौ 'दारुणमुनिः' इत्युपाधिना विभूषितः आसीत्। अथर्ववेदस्य शाखानां विस्तारः पुराणेषु वर्णितः अस्ति। अस्मिन् पुराणे सुमन्तोः द्वौ शिष्यौ कथितौ- पथ्यो वेददर्शश्चेति। विष्णुपुराणेऽपि शिष्यद्वयस्य चर्चाऽस्ति। किन्तु वेददर्शस्य स्थाने 'देवदर्श' इति नाम अस्ति। आथर्वणमहानारायणोपनिषद् स्वात्मानं देवदर्शी नाम्नाऽथर्वशाखया सह सम्बद्धं स्वीकरोति। अतः 'देवदर्शः' किंवा 'देवदर्शी' इति नाम अधिकं स्वीक्रियते। विष्णुपुराणानुसारेण पथ्यस्य त्रायाणां शिष्याणां नाम क्रमशः जाबालिः, कुमुदादिः,

शौनकः चासीत्। देवदर्शस्य (वेददर्शस्य) चत्वारः शिष्या आसन्। ते च मोदः, ब्रह्मावलिः, पिप्पलादः, शौष्कायणिः, अथवा शौक्लायनिः। एतेषु शौनकस्य शिष्यः ब्रूस्तथा सैन्धवायनः कथितः। एभिः मुनिभिः अथर्ववेदस्य विशेषप्रचारः सम्पन्नोऽभवत्। प्रपञ्चहृदय-चरणव्यूह-सायणभाष्यादीनाम् उपोद्घातेषु यद्यपि शाखानां सङ्ख्या अभिन्ना, तथापि एतेषु नामसु महती भिन्नता दृग्गोचरी भवति। निम्नलिखितान्यभिधानानि सन्ति- (1) पिप्पलाद, (2) स्तौदः, (3) मोदः, (4) शौनकीयः, (5) जाजलः, (6) जलदः, (7) ब्रह्मवेदः, (8) देवदर्शः, (9) चारणवैद्यश्च। आसु अथर्ववेदस्य नवशाखासु सम्प्रति शौनकपिप्पलादसमाख्ये द्वे एव शाखे प्राप्येते। प्रचलिता अथर्वसंहिता शौनकशाखान्तर्गता, पिप्पलादशाखासंहिताऽपि अनतिचिरेणैव मुद्रिता।

**अथर्ववेदस्य लक्षणग्रन्थाः**

अथर्ववेदेन संश्लिष्टाऽनेकशो ग्रन्थाः सन्ति। एभिः ग्रन्थैः अथर्वस्य विभाजनमन्त्र-उच्चारण-विनियोगादीनाम् आवश्यकोपकरणं प्रदत्तमस्ति। अथर्ववेदीयपरिशिष्टान्तर्गते ऊनपञ्चाशत्तमं परिशिष्टं चरणव्यूहः इति। अस्य अनुसारेणास्यवेदस्य पञ्च लक्षणग्रन्थाः सन्ति (1) चतुराध्यायी (2) प्रातिशाख्यम् (3) पञ्चपटलिका (4) दन्त्योष्ठविधिः (5) बृहत्सर्वानुक्रमणी।[20]

**अथर्ववेदस्य विषयविवेचनम्**

अथर्ववेदस्य विषयविवेचनम् अन्यवेदानाम् अपेक्षया नितान्तं निगूढ विलक्षणचास्ति। अस्मिन् वेदे वर्णितानां विषयाणां विभाजनं त्रिधा भवति- (1)आध्यात्मिकम्, (2)आधिभूतम्, (3) आधिदैवतञ्चेति।

अध्यात्मप्रकरणम्- मुख्यतः ब्रह्मजीवविषयकं, परमात्मविषयकं वर्णनञ्चास्ति। तदनन्तरम् आश्रमाणाम् अपि पर्याप्तनिर्देशो लभते। आधिभूतप्रकरणम् राजा- राज्य-शासन-सङ्ग्राम-शत्रुवाहनादीनां वर्णनमस्ति।

आधिदैवतप्रकरणे-नानादेवतानां, विविधानां यज्ञानां कालादीनाञ्च विषये पर्याप्तज्ञातव्यविषयाणां सङ्कलनमस्ति।

**भैषज्य-सूक्तानि**

अस्मिन् प्रकरणे रोगानां चिकित्सासम्बन्धिनां मन्त्राणां, विधिविशेषाणां च अन्तर्भावो भवति। रोगाणाम् उत्पत्तिः अनेककष्टप्रदानां रक्षोभूतपिशाचादीनां कृतोपद्रवेणेव भवति। अतोऽस्य प्रकरणस्य अनेकमन्त्रेषु पूर्ववार्णितोपद्रवाणां

शमनोपायं वर्णितमस्ति। एतेषां मन्त्राणां साहाय्येन कृताभिचाराणां विशेषवर्णनं कौशिकसूत्रेऽस्ति। विविधरोगाणां लक्षण तथा तद्रोगेण समुत्पन्नशारीरिकविकाराणां विशदवर्णनञ्च आयुर्वेदिक दृष्ट्या विशेषमहत्त्वपूर्णमस्ति। अथर्ववेदे - 'तक्माः' ज्वरस्यैव नाम अस्ति। अस्मिन् सन्दर्भे अथर्ववेदस्य कथनमस्ति यत् ज्वरपीडिताः जनाः पीताः सन्तप्ताः च भवन्ति। अतः कतिपयेषु मन्त्रेषु ज्वरनिमित्तकप्रार्थना वर्तते। यथा- हे ज्वर! त्वं तिरोहितो भव, अथवा रोगार्तजनं विहाय मूजवत- वह्निक-महावृषादि-सुद्धरस्थे प्रान्ते गच्छ। बलासः (क्षयादिः) रोगः, गण्डमाला, यक्ष्मा, प्रभृतिरोगाणां दूरीकरणाय वरुणनामकस्य औषधेः सेवनस्य उपयोगः उल्लिखितः। कासः तथा दन्तपीडादीनां रोगाणां तथा तेषाम् औषधीनां वर्णनं अथर्ववेदेऽस्ति। सर्पविषविनाशाय नानाविधोपायाः वर्णिताः सन्ति। अस्मिन् सूक्ते असित-तैमात-आलिङ्गी-विलङ्गी-उरु-गूलादिसर्पाणां नामोल्लिखितम् अस्ति। हुविधौषधीनां तथा नानावृक्षाणां प्रशंसायाम् अनेकाः मन्त्राः अत्र प्राप्यन्ते।[21]

**आयुष्य-सूक्तानि**

दीर्घायुषे बहुविधा प्रार्थनापरकमन्त्राः अस्मिन् विभागे सन्ति। एतेषा मन्त्राणां विशेषप्रयोगः पारिवारिकमहोत्सवानाम् अवसरे अभवत्। बालकानां मुण्डने, किशोराणां गोदाने (प्रथमक्षौरकर्मणि) तथोपनयनसंस्कारे अस्य मन्त्रस्य उपयोगो भवति। अस्मिन् सूक्ते शतशरद्पर्यन्तं तथा शतहेमन्तपर्यन्तं जीवनाय, बहुविधमृत्युभ्यः त्राणाय, विविधरोगेभ्यः रक्षणाय च प्रार्थना समुपलब्धा भवति। अथर्ववेदे आयोर्वर्द्धनाय करे रक्षासूत्रधारणस्य विशेषविधानं प्राप्यते। अनेन रक्षासूत्रधारणेन प्राणिनः पूर्णस्वास्थ्यस्य तथा चिरजीवनस्य सद्यः प्राप्तिर्भवति। सप्तदशकाण्डस्यैकमात्रं सूक्तमस्य एवान्तर्गते आयाति।

**पौष्टिकानि-सूक्तानि**

अस्य विभागास्य अन्तर्गते गृहनिर्माणाय, सीरकर्षणाय, बीजवपनाय, अन्नोत्पादनाय, पुष्ट्यै, विदेशगमनाय, व्यापारहेतवे नानाविधाशीर्वादाय च प्रार्थना कृताऽस्ति। अस्मिन् सूक्ते वृष्टश्याः अतीव रमणीयं, साहित्यिकं, समुज्ज्वलंय वर्णनमस्ति।

**प्रायश्चित्तानि-सूक्तानि**

सूक्तेष्वेतेषु प्रायश्चित्तस्य विधानमुपलब्धमस्ति। प्रायश्चित्तस्य विषयः अस्ति यत्, चारित्रिकत्रुटेः धार्मिकविरोधस्य च अन्यविधिहीनाचरणानां विधानम्

इति। यथा ज्ञाताज्ञातापराधहेतुना, धर्मशास्त्रेण वर्जितविवाहकारणेन, ऋणप्रतिशोधविहीनहेतुना ज्येष्ठं परित्यज्य विवाहहेतुना ये अपराधाः भवन्ति, तेषां दूरीकरणाय अत्र प्रायश्चित्तस्य विधानमस्ति। तत् सम्बन्धिनः एवंविधाः मन्त्रगीतोत्सवादयः प्राप्यन्ते, यैः शारीरिकदुर्बलता- मानसिकत्रुटि- दुःस्वप्न- अपशकुनादीनां निराकरणम्, अपसरणश्च भवति। वर्तमानयुगमिव तस्मिन्नपि युगे अशुभस्वप्ने मानवानां विश्वासः आसीत्। तद्दूरीकरणाय बहुविधोपायाः मन्त्रेषु वर्णिताः सन्ति।

**स्त्रीकर्माणि-सूक्तानि**

विवाहविषयकाणि, प्रेमविषयकाणि च बहूनि सूक्तानि अस्मिन् वेदे सन्ति। एतानि सूक्तानि तत्कालिकसमाजस्य स्वरूपज्ञाने विशेषरूपेण सहायकानि भवन्ति। एतेषु सूक्तेषु पुत्रोत्पादनाय सद्योजातशिशो रक्षणाय च भव्यप्रार्थनाऽपि उपलब्धा अस्ति। अनेन प्रसङ्गेन चतुर्दशकाण्डः विशेषरूपेण सम्बद्धोऽस्ति। अनेनैव क्रमेणाथर्ववेदस्य (3/25, 6/130, 6/138, 6/130, 6/131) प्रभृतिमन्त्रेषु मारण-मोहन-उच्चाटन-वशीकरणादीनां क्रियायाः बहुलप्रयोगाः वर्णिताः सन्ति।

**राजकर्माणि-सूक्तानि**

राजभिः सम्बद्धानि बहूनि सूक्तानि अथर्ववेदे समुपलब्धानि सन्ति। एतेषां सूक्तानामध्ययनेन तत्कालीनायाः राजनैतिकस्थित्याः विशदचित्रणं समुपलब्ध भवति। शत्रूणां विनाशाय प्रार्थनया सह सङ्ग्रामस्य तथा तदुपयोगिनां साधनानां यथा- रथ-दुन्दुभि-शस्त्रादीनां विशेषविवरणं साङ्ग्रामिक दृष्ट्या अपि अथर्ववेदे प्राप्यते। अथर्ववेदस्य 'क्षत्रवेदः' इति नामकरणस्य इदमेव कारणमस्ति। तस्मिन् युगे प्रजा एव राज्ञः संवरणमकरोत्। अथर्ववेदस्य सूक्ते मानवैः सह अश्विन् -मित्रवरुण- मरुत्-वरुणादिद्वारेण राज्ञः संवरणस्य वर्णनमस्ति।[22] अन्धसूक्तेन ज्ञातो भवति यद्देशात् निष्कासितो राजा पुनः राज्ये सम्मानपूर्वकेण प्रतिष्ठितोऽभवत्। सङ्ग्रामभूमौ गमनाय वीरान् समुत्साहयितुं दुन्दुभेः वर्णनं साहित्यिकं वीररसपूर्णश्चाऽस्ति। पञ्चमकाण्डस्य दशमसूक्तं कवित्व दृष्ट्या मनोहरभावानां प्रदर्शनेनातीवारोचकं, सरसं, अभिव्यञ्जनात्मकञ्चास्ति। दुन्दुभेः गर्जनं श्रुत्वा रिपुयुवती भयानकास्त्रसङ्घर्षाणां मध्ये स्वपुत्रं नीत्वा पलायनस्य प्रार्थना अपि कारुणिका अस्ति।

**पृथिवीसूक्तम्**

पृथिव्याः महिम्नः वर्णनमिदं स्वातन्त्र्यप्रेमिणः, स्वच्छन्दतायाः रसिकस्य अथर्वण-ऋषेः हृदयोद्‌गारमस्ति। अस्याः शैल्याः प्रौढकाव्यस्य उच्चकल्पना तथा भव्या भावुकता वैदिकसाहित्ये अप्यन्यत्र दुर्लभे स्तः। अस्मिन् सूक्ते आथर्वणऋषिः त्रिषष्ठिः (63) मन्त्रेषु मातृरूपिण्याः भूम्याः समग्रपार्थिवपदार्थानां जननीस्वरूपे महिमानं समुद्‌घोषितवान्। कतिपयेषु मन्त्रेषु तेन प्रजानां क्लेशानर्थौ त्रातुं सुख-समृद्धिसंवर्धनाय च सुष्ठु प्रार्थना कृता। अस्मिन् सूक्ते मातृभूम्याः मनोहरा कल्पना कृताऽस्ति। मातृभूम्याः रुचिरमिदं वर्णनं देशभक्त्याः प्रेरणायाः मधुरो विलासः अस्ति। अत्र मातृभूमिः सजीवरूपेण चित्रणम् अस्ति। 'माता भूमिः पुत्रोऽहं पृथिव्याः'[23] अर्थात् मम माता भूमिरस्ति, अहञ्च मातृभूम्याः पुत्रोऽस्मि। उदात्तभावनायाः प्रेरकोऽयं मन्त्रोऽस्ति। अस्याः भूम्याः निर्माणे, संरक्षणे च देवतायाः सहयोगोऽस्ति। अश्विनीसुतौ यां मापितवन्तौ, विष्णुना पादत्रयं यस्याः उपरि प्रक्षेपं कृतम्। देवराजेनेन्द्रेण स्वलाभाय या शत्रुविरहिता कृता, सा भूमिः मह्यं तेनैव प्रकारेण दुग्धं ददातु यथा माता स्वपुत्राय स्वानुरागेण दुग्धं ददाति। पृथिव्यामुपरि नर्तनस्य, कूर्दनस्य, उत्प्लवनस्य, सङ्घर्षणस्य च की क् स्वाभाविकं वर्णनं तमत्र, तदपि दर्शनीयमस्ति। पृथिव्याः सर्वाङ्गीणं स्वरूपम् अस्मिन् सूक्ते उपस्थितमस्ति। पृथिव्यामुपरि नद्यः, पर्वताश्च सर्वदा लाभदायकाः भवन्तु, षड्ऋतूनामागमनं प्रजाकल्याणाय भवतु, प्रावृड्काले पृथिव्यामुपरि ये सर्प-वृश्चिक- हिंसक-रोगवर्धकादयः मयश्चलन्ति, ते मां दृष्ट्वैव दूरे अपसर्पन्तु सदैव अस्माकं सन्निधौ 'शिवाः' सन्तु। अनेन प्रकारेण भूमिसूक्तमिदम् अथर्ववेदीययुगस्य महनीयाः राष्ट्रियतायाः सन्देशवाहकं, प्रेरकं च अस्ति।

**ब्रह्मण्यानि-सूक्तानि**

अस्मिन् सूक्ते जगतः परमतत्त्वभूतस्य परमात्मनः परब्रह्मणः स्वरूपस्य कार्यस्य च विवेचनमस्ति। अनेनैव आमुष्मिकब्रह्मण्यसूक्तहेतुना अथर्ववेदस्य महनीया अनाभिधानेन 'ब्रह्मवेदः' इति कथ्यते। सूक्तेष्वेतेषु दर्शनस्य गम्भीरतथ्यानां विशदसमीक्षा कृताऽस्ति। एतेषु सूक्तेषु अन्तर्दष्ट्या संवलितप्रातिभचक्षुः ऋषीणां स्वानुभूततथ्यानां विशदविवेचनमस्ति। तेनैव कारणेन दार्शनिक दृष्ट्याऽपि वेदोऽयं विशिष्टोपादेयोऽभवत्। परमतत्त्वन्तु तेनैव नानाभिधानैः तत्राभिहितमस्ति। स एव कालनाम्ना जगतः, पृथिव्याः, अपरलोकस्य चोत्पादकः नियन्ता चास्ति। काल एव

समस्तप्रपञ्चस्य अधिष्ठानं वर्त्तते। तस्मिन् न केवलं मनःप्राण-नामानि समाहितानि सन्ति, प्रत्युदसौ सर्वेषामीश्वरः प्रजापतेः अपि पिता अस्ति। तस्यैव सङ्कल्पेन जगदिदं समुत्पन्नमभवत्। तस्मिन्नेव प्रतिष्ठितमस्ति। काल एव जगतः परमतत्त्वमस्ति।

**काले तपः काले ज्येष्ठ काले ब्रह्मसमाहितम्।**
**कालो ह सर्वस्येश्वरो यः पिताऽसीत् प्रजापतेः।।**[24]

त्रयोदशकाण्डस्य अनेकसूक्तेषु यस्य रोहितस्य वर्णनमस्ति, सोऽपि सूर्यस्य अथवा सूर्यस्थवीर्यस्य प्रतीकोऽस्ति। गौरियं जगतः समस्तपदार्थानां जननीस्वरूपे चित्रिताऽस्ति। ब्राह्मणेभ्यः दक्षिणास्वरूप त्वेनैव केवलं वैदिकयुगे गावः महत्त्वमासीत् प्रत्युत कृषकसमाजाय सर्वस्वत्वेनाऽपि अस्याः गौरवमासीत।

**व्रात्यसूक्तम्**

अथर्ववेदस्य शौनकशाखायां पञ्चदशतमः काण्डः व्रात्यकाण्डनाम्ना परिचीयते। यतोऽस्मिन् व्रात्यस्य एव समग्रतया विवरणमस्ति। काण्डेऽस्मिन् द्वौ अनुवाकौ स्तः। ययोः प्रथमानुवाके सप्त सूक्तानि, अपरस्मिन् एकादशसूक्तानि सन्ति। अनेन प्रकारेण अस्मिन् काण्डे अष्टादशसूक्तानि सन्ति। प्रतिसूक्तम् अनेके गद्यात्मकाः मन्त्राः सन्ति। पैप्पलादशाखायाः समुपलब्धायाम् अपूर्णसंहितायाम् अष्टादशतमस्य काण्डस्य सप्तविंशतितमे सूक्ते व्रात्यविषयकस्य केवलं नव मन्त्रा एव प्राप्यन्ते। शेषमन्त्राः लुप्ता अभवन्। कोऽयं व्रात्यः ? इति जिज्ञासायां सत्यां बोध्यं यत्, साधारणतः उपनयनादिसंस्कारविहीनस्य द्विजकुलोत्पन्नस्य जनस्य व्रात्यपदेन बोधो भवति इति। ताण्ड्यब्राह्मणे तेषां जनानां वेशभूषायाः विषये विस्तृतं सजीववर्णनञ्च लभते।[25] किञ्च अथर्ववेदीयव्रात्यकाण्डे निर्दिष्टव्रात्यस्य किं तात्पर्यमस्ति? आचारविचार रहितस्य नियमश्रृङ्खलायाः बन्धनमुक्तस्य जनस्य द्योतकत्वेन व्रात्य इति पदस्य लाक्षणिकार्थो भवति 'ब्रह्म' इति। ब्रह्म इदं जगतः नियमशृङ्खलायाम् अबद्धोऽस्ति, कार्य-कारणयोः भावनया ओतप्रोतोऽस्ति। अस्यैव ब्रह्मणः स्वरूपस्य तथा तस्मादेव समुत्पन्नसृष्टिक्रमस्य व्यवस्थितं वर्णनमस्मिन् काण्डे विस्तरेण सह वर्णितम्। 'व्रात्यो वा इदम् अग्र आसीत्'। पैप्पलादशाखायाः अनेन वाक्ये जगदादौ व्रात्य एव विद्यमान आसीत् इति उल्लिखतम्। फलतः व्रात्यशब्देन ब्रह्मण एव बोधो भवति। व्रात्योऽयं गतिमान् भूत्वा प्रजापतिं प्रेरयति।

अत्र प्रजापतिपदेन हिरण्यगर्भस्य बोधो भवति-स प्रजापतिः सुवर्णमात्मन्यपश्यत् तत्प्राजनयत्।[26] अत्र जीवानां शुभाशुभकर्मणः संस्कार एव सुवर्णपदेन व्यपदिश्यते। यथा बहुविधानाम् आभूषणानां समुत्पत्तिः सुवर्णेन भवति तथा जीवानां संस्कारसमूहेन नानाविधजगतः निर्माणं भवति। अनेनैवाधारेण प्रजापतिः हिरण्यगर्भनाम्ना प्रख्यातोऽस्ति। हिरण्यगर्भेणैव अत्र सृष्ट्याः क्रमस्य वर्णनमस्ति। तदनन्तरं व्रात्योऽयं केन प्रकारेण नानादिक्षु गच्छति? तत्सम्बद्धजीवानां सृष्ट्यां समर्थो भवति? अस्य विशदविवरणमस्मिन् काण्डेऽस्ति। अनेन प्रकारेण व्रात्यकाण्डोऽपि अयम् उच्छिष्टसूक्तमिवाध्यात्मिक तथ्यानां प्रतिपादकोऽस्ति, यस्य विपुलं वर्णनमुपनिषदि वर्त्तते। अथर्ववेदस्य दार्शनिकसूक्तेषु निर्दिष्टतत्त्वमुपनिषदां पूर्वपीठिकां कथयितुं समर्थास्ति। एतेषां महती व्याख्या उपनिषत्सु प्राप्यते।

**अथर्ववेदे कौटुम्बिकाभिचारः**

यत्रान्यवेदाः देवतानां स्तुतिमेव स्वप्रतिपाद्यविषयं मन्यन्ते, तत्राथर्ववेदः भौतिकविषयाणामपि वर्णनं करोति।[27] प्रारम्भिकयुगसम्बन्धिमानवानां क्रियाकलाप-आचारविचार-वेशभूषादीनां पूर्णपरिचयार्थम् अथर्ववेदान्न कोऽपि प्राचीनग्रन्थोऽस्ति। यथा- शत्रूणां पराजयाय, क्लेशनिवारणाय, सद्योजात-शिशूनां मातृःसन्तप्तकतकृणां भूत-प्रेतादिकानां विनाशाय नानाभिचाराणां विचित्रं वर्णनम् अथर्ववेदस्य सूक्तेषु सम्मिलतम् अस्ति। अभिचारकर्माणि सर्वदाऽशुभान्येव न भवन्ति। एतेन प्राचीनमानवाः शत्रुरोग-क्लेशादीनामाक्रमणात् स्वकौटुम्बिकजनानां त्राणं कुर्वन्ति स्म। आत्मसंरक्षणम् एवाभिचारक्रियायाः पृष्ठभूमिरस्ति। अस्मिन् धरातले आत्मसंरक्षणस्य प्रवृत्तिः सहजैव भवति। प्रथमतः लोकाः आत्मसंरक्षणं स्वकीयभौतिकोद्योगबलेनैव सम्पादयितुमिच्छन्ति। स्वकीयभौतिकोद्योगे भग्नमनो भूत्वैव जनाः आधिदैविकं प्रयासं प्रति उन्मुखाः सचेष्टाश्च भवन्ति।[28] अस्मिन्नेव प्रयत्ने अभिचारस्यापि गणना भवति। अभिचारस्तु (यातु) द्विविधो भवति-शुभमशुभञ्चेति। शोभनकर्मणि अनिष्टादात्मसंरक्षणस्य भावना प्रबला भवति। अशोभनप्रकारके कर्मणि मारण-मोहनोच्चाटनादीनां भावनैव विशिष्टरूपेण जागृता भवति। एतद्विषयकेष्वन्यसूक्तेषु साहित्यिकसौन्दर्यस्याऽप्यभावो नास्ति। सरलसामान्यशब्देषु स्वमनोगतभाव प्रदर्शनस्य क्षमतां दृष्ट्वाऽऽलोचकाश्चकिताः भवन्ति।

**सन्दर्भाः-**


1. *निरुक्तम्, 11.2.97*
2. *गोपथब्राह्मणम्, 1.4.*
3. *अथर्ववेदसंहिता- 6.1, 10.2.26-28.*
4. *वायुपुराणम्, 65.27.*
6. *ब्रह्माण्डपुराणम्, 2.1.36.*
7. *नारदीयपुराणम्, 5.2.11.*
8. *तैत्तिरीयब्राह्मणम्, 3.12.9.1,*
9. *शतपथब्राह्मणम्, 13.4.3.2.*
10. *गोपथब्राह्मणम्, 3.2.*
11. *अथर्ववेदपरिशिष्टम्, 1.3.*
12. *भागवतपुराणम्, 3.24.*
13. *रघुवंशम्, 1.59.*
14. *जयन्तभट्टस्य न्यायमञ्जरी (चौ.स.पृ.237-238)*
15. *छान्दोग्य-उपनिषद्, 7.2.*
16. *विष्णुपुराणम्, 8.3.*
17. *काश्यपसंहितायाः उपोद्घातः पृ.9-12, बम्बईसंस्करणम्*
18. *कौशिकगृह्यसूत्रम्, 3.25.1-5,6.*
19. *ऋक्प्रातिशख्यम्, 4.1.2*
20. *दन्त्योष्ठविधिः, 3.25.6*
21. *अथर्ववेदः, 5.13.*
22. *अथर्ववेदः, 3.25.9*
23. *अथर्ववेदः, 3.25.1-5,*
24. *अथर्ववेदः, 19.53,54,*
25. *ताण्ड्यब्राह्मणम्, 17.1.*
26. *अथर्ववेदः, 16.5,1-5,*
27. *अथर्ववेदः, 14.1,2,*
28. *अथर्ववेदः, 4.13.6.*


●●●

# 2

# यजुर्वेदे वर्णितं कर्मकाण्डम्

*ऋतुकयालः*

यजुर्वेदः वैदिकसाहित्येषु कर्मकाण्डस्य प्रमुखः स्रोतः मन्यते, यस्मिन् यज्ञसम्बद्धा विधयः, मन्त्रप्रयोगाः च विस्तारतः वर्णिताः सन्ति। कर्मकाण्डः केवलं धार्मिकक्रियाविधानं न, अपि तु सामाजिक-सांस्कृतिकपरम्परायाः स्थायित्वस्य मूलाधारः अपि अस्ति (अप्टे, 1965)। अस्मिन् आलेखे यजुर्वेदे उल्लिखितेषु यज्ञेषु, मन्त्रेषु, अनुष्ठानविधिषु च समीक्षात्मकदृष्ट्या चिन्तनं कृतम्। वाजसनेयिसंहितायाम् अग्निहोत्रादि यज्ञानां निरूपणं, ब्राह्मणग्रन्थेषु तेषां व्याख्या, च गभीरतया विश्लिष्यन्ते (काण्व शाखा, वाजसनेयि संहिता 19.1  19.75)। अपि च, यजुर्वेदे प्रतिपादितं कर्मसिद्धान्तं आधुनिक दृष्ट्या पुनः विमृश्यते। एतेन अध्ययनेन कर्मकाण्डस्य दार्शनिकं, सामाजिकं च महत्त्वं प्रकाश्यते, यत् तात्त्विक दृष्ट्या न केवलं आचारशास्त्रे, अपि तु जीवितनैतिकतायाम् अपि योगदानं करोति। अत एव, यजुर्वेदीयकर्मकाण्डस्य विश्लेषणं नूतनान् अनुसन्धानमार्गान् उद्घाटयति।

वैदिकवाङ्मये यजुर्वेदः कर्मकाण्डप्रधानं वेदरूपेण स्वीकृतः, यः मन्त्राणां च अनुष्ठानविधीनां च सुस्पष्टं निरूपणं करोति। ऋग्वेदे ये मन्त्राः स्तुतिपरकाः दृश्यन्ते, स एव यजुर्वेदे यज्ञकर्मणां प्रयोजनार्थं संशोधितरूपेण उपयुज्यन्ते। अतः यजुर्वेदः मन्त्रभागः (संहिता) तथा ब्राह्मणभागः (विधिप्रदर्शनं) इति द्वैधं स्वरूपं धारयति, यत् कर्मयोगस्य प्राचीनतमं रूपं अभिव्यक्तये समर्थं भवति (शर्मा, 1998)। विशेषतः वाजसनेयिसंहिता (शुक्लयजुर्वेदः) तैत्तिरीयसंहिता (कृष्णयजुर्वेदः) चेत्येतयोः शाखयोः अन्तर्गतं कर्मकाण्डविचारः अत्यन्तं समृद्धः अस्ति।

इतिहासदृष्ट्या वैदिकयुगस्य सामाजिक- सांस्कृतिक-धार्मिकजीवनं कर्मकाण्डाधारितं आसीत्। अग्निहोत्रम्, सोमयागः, राजसूयः, अश्वमेधः इत्यादयः

यज्ञाः न केवलं देवपूजाविधयः आसन्, अपि तु तत्कालीनसामाजिकराजकीयसंरचनायाः प्रतिरूपाणि अपि आसन्। तथापि, विगत-दशकेषु यजुर्वेदीयकर्मकाण्डस्य विश्लेषणं केवलं भाष्यपर्यन्तं सीमितं दृष्टम् तुलनात्मकः, आधुनिक दृष्टिप्रसूतः वा समकालीनोपयुक्त- चिन्तनात्मकः दृष्टिकोणः न्यूनतः एव सन् दृश्यते।

एतस्मिन्नपेक्षायाम्, इदं शोधपत्रं यजुर्वेदे विशेषतः शुक्लयजुर्वेदस्य वाजसनेयिसंहितायां प्रतिपादितं कर्मकाण्डम्, तस्य मन्त्रगतं तात्त्विकम्, समाजशास्त्रीयं च संदर्भं विश्लिष्य, व्यापक दृष्ट्या विश्लेषयितुं प्रयत्नं करोति। कर्मकाण्डस्य दर्शनमूलकविचारः, विधिपूर्वकं कर्म, श्रद्धा, निष्कामकर्म, धर्मः इत्यादीनां वैदिकसंकल्पानां व्याख्या च अपि अत्र समाविष्टा अस्ति।

शोधस्य मुख्यलक्ष्यं यत् यजुर्वेदे वर्णितस्य कर्मकाण्डस्य स्वरूपं, प्रयोजनं च समीक्षात्मक दृष्ट्या अन्वेष्टुंय ब्राह्मणग्रन्थेषु प्रतिपादितानां विधीनां तुलनात्मक दृष्ट्या विवेचनं कर्तुं तथा कर्मकाण्डस्य आधुनिकचिन्तनायाम् प्रयोज्यता प्रदर्शयितुं। एतेन अनुसन्धानप्रयत्नेन कर्मकाण्डस्य यथार्थबोधः सह वर्तमानसन्दर्भे तस्य पुनः पाठः सुलभो भविष्यति, इति विश्वासः वर्तते।

यजुर्वेदे वर्णितं कर्मकाण्डम् इति विषयः प्राचीनकालात् एव विद्वद्भिः विवेच्यते स्म। वेदकालीन कर्मनिष्ठा, तदीय मन्त्रप्रयोगः, यज्ञानुष्ठानं च इत्येतत् बहुशः आर्षग्रन्थेषु ब्राह्मणेषु च निरूपितं वर्तते। विशेषतः शतपथब्राह्मणम् यजुर्वेदीयकर्मकाण्डस्य मूलभूतं शास्त्रीयस्रोतः भवति, यत्र यज्ञविधीनां प्रतीकात्मकता, प्रयोजनम् च विस्तरेण विशदीकृतम् अस्ति (शतपथब्राह्मणम्, अध्याय 1-10)।

सायणाचार्यस्य वाजसनेयिसंहितायां विरचितं भाष्यं कर्मकाण्डपरम्परायाः परम्परागतव्याख्यानरूपेण प्रसिद्धम् अस्ति। तस्मिन् भाष्ये कर्म, मन्त्र, ब्राह्मणवाक्यानां च सुस्पष्टं विहितान्वयः दृश्यते। एषः भाष्यः वेदपरिशीलकानां कृते मूलाधाररूपेण गृहीतः अस्ति। तथैव भट्टभास्कराचार्यः अपि कृष्णयजुर्वेदीयतैत्तिरीयसंहितायाः भाष्यं सम्पादितवान्, यत्र कर्मकाण्डानां यौगिकगौरवं प्रकाश्यते।

आधुनिकविद्वांसः अपि अस्मिन् क्षेत्रे योगदानं दत्तवन्तः। डॉ. रघुनाथशास्त्री पाण्डेयकृते ''वैदिककर्मकाण्डस्य सांस्कृतिकभूमिका'' इत्यस्मिन्

ग्रन्थे कर्मकाण्डं केवलं धार्मिकविधिः न, अपि तु सांस्कृतिकजीवनस्य मेरुदण्डः इति प्रतिपादितम्। पं. बलदेव उपाध्यायः अपि ''वेदों का सांस्कृतिक इतिहास'' नामकग्रन्थे कर्मकाण्डस्य वैदिकजीवने योगदानं महत्त्वं च वर्णयति। तस्य मतानुसारं यज्ञक्रिया धर्म-समाज-अर्थनीति-राजव्यवस्थादिषु सर्वत्र प्रत्यक्षानुशासनरूपेण कार्यं कुर्वन्ति। अन्तरराष्ट्रीयविद्वांसः अपि यजुर्वेदविषये समीक्षात्मकम् अभिगमं दर्शितवन्तः। Frits Staal महोदयः, "Agni: The Vedic Ritual of the Fire Altar" इति कृतौ यज्ञकर्मणः प्रतीकात्मकार्थं, पुनरावृत्तिरूपेण संरचनात्मकदृष्टिं च उपस्थापयति। तस्य चिन्तनं कर्मकाण्डस्य व्याकरणात्मकविन्यासं समीक्षते।

एवं दृश्यते यत् यजुर्वेदीयकर्मकाण्डविषये परम्परागतं च आधुनिकं च विमर्शपरम्परा अस्ति। तथापि, समीक्षात्मक दृष्ट्या मन्त्रविधानं, तात्त्विकपरिप्रेक्ष्ये कर्मसिद्धान्तस्य पुनरावलोकनं, च यथासङ्गतं विमर्शं दुर्लभमेव। अनेन लेखेन तस्य रिक्तस्थानस्य परिपूर्तिः अपेक्ष्यते।

अस्य शोधप्रबन्धस्य अनुसन्धानपद्धतिः मुख्यतः ग्रन्थाधारितपाठ-विश्लेषणपद्धत्याः (Textual Analysis Method) आधारशिलायाम् स्थितम्। अनुसन्धानस्य प्रक्रमे मूलतः यजुर्वेदीयसंहिताग्रन्थेषु उल्लिखितं कर्मकाण्डसंबद्धं साहित्यं सङ्गृहीतम्, ततः तत्सम्बद्धं भाष्यसाहित्यम्, ब्राह्मणग्रन्थांशः च विश्लेषण दृष्ट्या अधीतम्।

प्राथमिकस्रोतभूतं ग्रन्थः वाजसनेयिसंहिता (शुक्लयजुर्वेदः) स्वीक्रियते, यत्र अग्निहोत्रदर्शपूर्णमाससोमयागादीनां विधयः मन्त्रात्मकतया सन्निविष्टाः सन्ति। अत्र 40 तः अधिकेषु अध्यायेषु कर्मकाण्डविषयकं प्राचीनतमं चित्रणम् दृश्यते। तैत्तिरीयसंहिता (कृष्णयजुर्वेदः) अपि अपेक्षितांशेषु समालोचिता, विशेषतः मन्त्रविधौ योज्यविचारार्थम्।

द्वितीयस्तरे, शतपथब्राह्मणम्, तैत्तिरीयब्राह्मणम् च ब्राह्मणग्रन्थरूपेण गृहीतौ, यत्र मन्त्रविधीनां तात्त्विकं प्रयोजनम्, यज्ञविधानस्य प्रक्रिया च विस्तरेण निरूप्यते।

भाष्यग्रन्थेषु सायणाचार्यविरचितं वाजसनेयिसंहिताभाष्यम्, भट्टभास्करभाष्यं तैत्तिरीयसंहितायाः च परीक्षण दृष्ट्या सहायकौ। एतेन शोधेन मन्त्रविधानं केवलं लिपितया न गृहीतम्, अपि तु तस्य प्रयोगविधिः, प्रयोजनम्, अन्तर्निहितं दर्शनम् इत्यादयः अपि सूक्ष्मतया विश्लिष्टाः।

यथासम्भवम्, यजुर्वेदीयविधीनां तुलनात्मक दृष्ट्या अथर्ववेदे, मनुस्मृतौ च उल्लिखितानां कर्मविधीनां संलग्नसन्दर्भाः अपि समीकृताः। अनेन शोधपद्धत्या कर्मकाण्डस्य स्थूलं च सूक्ष्मं च स्वरूपम् अधिगतम्।

यजुर्वेदे प्रतिपादितं कर्मकाण्डं वैदिकधर्मस्य प्राणतत्त्वरूपेण दृश्यते। अत्र कर्म शब्देन यज्ञकर्महवनअग्निहोत्रादि अनुष्ठानानि विवक्षितानि सन्ति, यानि 'कर्मयोगस्य' मूलस्वरूपं बिभ्रति। यजुर्वेदे कर्म न केवलं बाह्यक्रिया, अपि तु आन्तरिक श्रद्धा, नियतता, विधिपूर्वकता च भवति। कर्मकाण्डं विधिवत् अनुष्ठेयम् इति स्पष्टं प्रतिपाद्यते''कर्मणा समृद्धिं प्राप्नोति, कर्मणा वै ब्रह्मा स्यात्'' इत्याद्युक्तयः (वाज. सं. 19.72) तात्त्विकमहत्त्वं सूचयन्ति।

अत्र कर्मकाण्डः केवलं आचरणविधिः न, अपि तु एकः तात्त्विकः अनुशासनात्मकः पद्धतिसमूहः यः मनुष्यस्य जीवनं धर्मपथेन नियच्छति। यजुर्वेदे दृष्टं कर्म चित्तशुद्धेः साधनं, यज्ञस्य देवताप्रीतिः च मानवजीवनस्य च समृद्धिं सुनिश्चितयति। एषः कर्मपद्धतिः आश्रमानां, वर्णानां च कृते विशिष्टधर्मरूपेण अनुकूल्यं वहति।

**मन्त्रप्रयोगविधयः**

मन्त्राः यजुर्वेदस्य हृदयं सन्ति। मन्त्रप्रयोगः यज्ञकर्मणि केन्द्रीयतत्त्वम्, यस्य विना किञ्चिदपि कर्म न सम्पद्यते। वाजसनेयिसंहितायाम् ''अग्निं यज्ञाय अग्निं हविषे...'' इत्यादयः मन्त्राः प्रत्यक्षं यज्ञारम्भे प्रयुज्यन्ते (वाज. सं. 1.1)।

यजुर्वेदे मन्त्रविधानं केवलं उच्चारणं न, अपि तु विशिष्टस्थितौ, निश्चिताङ्गेषु, नियतवाणीप्रकृत्या च सम्पन्नं भवति। मन्त्रैः सह द्रव्यसंस्कारः, स्थलेषु स्थापना, देवतावाहनं च क्रियते। विशेषतः कर्मकाण्डे प्रतिपद्यते यत् ''मन्त्रेण विना यज्ञो निष्फलः'' इति। मन्त्रस्य स्वर, छन्दः, विन्यासः च सर्वे यज्ञे फलप्राप्तेः साधनानि सन्ति।

सायणाचार्यः अपि सूचयति ''मन्त्राणां प्रयोगे विशेषशक्तिः विद्यते'', यः मन्त्रशक्तिप्रधानं कर्मकाण्डं प्रतिपादयति। मन्त्रविन्यासः प्रत्येकदेवतायाः विशिष्टप्रकृत्या सङ्गतं भवति, यः ब्रह्मवर्चसि संवर्धनं करोति।

**ब्राह्मणग्रन्थेषु विवेचनम्**

यजुर्वेदीयकर्मकाण्डस्य गहनं विवेचनं ब्राह्मणग्रन्थेषु दृश्यते। विशेषतः शतपथब्राह्मणम् कर्मकाण्डस्य सांस्कृतिकं, दार्शनिकं च स्वरूपं विस्तरेण निरूपयति।

अत्र अग्निहोत्र, सोमयाग, अश्वमेध, राजसूयादीनां प्रयोजनम्, तात्त्विकार्थः, फलश्रुतयः च सुस्पष्टतया निर्दिष्टाः।

शतपथे प्रतिपद्यते ''यज्ञः वै श्रेष्ठतमं धर्मं जनयति'' (श. ब्रा. 1.1.1.1)। अत्र यज्ञं न केवलं क्रियारूपेण स्वीकरोति, अपि तु तस्य अन्तःसारस्वरूपं धर्मे विन्यस्तं भवति। एवं ब्राह्मणग्रन्थाः कर्मकाण्डस्य संप्रदायबद्धं दर्शनं प्रस्फुटयनि। तैत्तिरीयब्राह्मणं च विशेषतः मन्त्रविधिं, हवनविधिं, आहुतिप्रकारान् विस्तरेण वर्णयति। भट्टभास्कराचार्यः स्वभाष्ये सूचयति यत् ''वेदस्य कर्माङ्गत्वं ब्राह्मणैः साक्षात्कार्यते'', इत्येतत् कर्मकाण्डस्य वैदिकविवेचनस्य प्रमाणरूपं स्थापनं भवति।

**यज्ञाः तेषां प्रकाराः**

यजुर्वेदे बहुविधानि यज्ञाः निर्दिष्टाः सन्ति नित्ययज्ञाः, नैमित्तिकयज्ञाः, काम्ययज्ञाः, समष्टियज्ञाः च। वाजसनेयिसंहितायाम् अग्निहोत्रम्, दर्शपूर्णमासौ, पशुबन्धः, सोमयागः, अश्वमेधः, राजसूयः इत्यादयः यज्ञाः विस्तरेण निर्दिष्टाः।

प्रत्येकस्य यज्ञस्य विशेषः विधिप्रकारः, पात्रविन्यासः, मन्त्रप्रयोगः च निर्दिष्टाः। उदाहरणतः, अग्निहोत्रं प्रतिदिनं कर्तव्यं, यत्र गोदुग्धं हविष्यान्नं च प्रयुज्यते। सोमयागे सोमलता निर्दिष्टविधिना संकल्य, सोमरसस्य पातविधिः, देवतावाहनं च सूक्ष्मतया विधायते (वाज. सं. 11-12)।

काम्ययज्ञाः पुत्रकामेष्टिः, पर्जन्ययज्ञः, स्वर्गकामयज्ञः इत्यादयः, इच्छाफलप्राप्त्यर्थं अनुष्ठीयन्ते। तेषां प्रयोगे मन्त्रोच्चारणविधानं, यजमानविशेषः, कालनिर्णयः च विशेषो निर्णीयते।

राजसूयः, अश्वमेधः इत्यादयः विशेषराजकीययज्ञाः सन्ति, यत्र कर्मकाण्डे राजाधिराजपदं प्राप्तुं विशेषाभिषेकविधिः, राष्ट्रप्रशस्तिकरणं च क्रियते।

एवं यजुर्वेदे कर्मकाण्डविधानं बहुविधं, सूक्ष्मं च अस्ति, यत् सामाजिकसंरचनायाम्, धर्मपद्धतौ, तथा आध्यात्मिकमार्गे च गूढप्रभावं दर्शयति।

यजुर्वेदे वर्णितं कर्मकाण्डं केवलं धार्मिकं अनुष्ठानमात्रं न, अपि तु तत्त्वतः एकं दार्शनिक-सामाजिकं च चिन्तनप्रणालीरूपं दृश्यते। कर्मकाण्डः यज्ञरूपेण व्यक्तित्वविकासं, सामाजिकसामञ्जस्यं च सुनिश्चितयति। यज्ञकर्म द्विजानां केवलं कर्तव्यं न, अपि तु तस्य माध्यमेन आत्मशुद्धिः, धर्मनिष्ठा, तथा लोकोत्तरफलप्राप्तिः अपि सम्भवति। यथा वाजसनेयिसंहितायां प्रतिपाद्यते ''स्वधर्मेण यज्ञं कुर्वीत, धर्मो हि यज्ञस्य मूलं'' (वाज. सं. 15.35) इत्यत्र कर्मस्य धर्माधिष्ठानतत्त्वं प्रतिपाद्यते।

दार्शनिकदृष्ट्या यजुर्वेदीयकर्मकाण्डः निष्कामकर्मयोगस्य प्रारम्भिकरूपेण दृष्टुं शक्यते, यः पश्चात् भगवद्गीतायां विस्तारतः विवेचितः। विशेषतः यज्ञकर्मणि ''फलत्यागः'' प्रमुखं लक्षणम्, यत् कर्मफलस्य स्पृहाविरहितता योगस्य बन्धनविमोचकत्वं सूचयति।

सामाजिकदृष्ट्या यज्ञकर्म मानवसमाजे सहकार्यं, सामाजिकसंघटनं, वर्गनिष्ठां च बोधयति। अग्निहोत्रदिषु गृहस्थानां कर्तव्यनिष्ठा, राजसूयादिषु राजाधीनराज्यधर्मः, तथा सोमयागादिषु ब्राह्मणैः कर्तव्यं यज्ञानुष्ठानं सामाजिकसङ्घटनस्य स्पष्टदर्शनं योजयति।

उत्तरवैदिकसाहित्ये विशेषतः स्मृतिग्रन्थेषु कर्मकाण्डीयपरम्परा रूपान्तरेण सततं प्रवहणशीला दृश्यते। मनुस्मृतौ यज्ञधर्मस्य वर्णानुगुणं वर्गीकरणं दृश्यते ''ब्राह्मणस्य यज्ञाधिकारः, क्षत्रियस्य रक्षणाधिकारः'' (मनुः 1.87)। धर्मसूत्रेषु, गृह्यसूत्रेषु च तत्र कृत्यविन्यासः अधिकसूक्ष्मतया संकलितः, यत् कर्मकाण्डस्य निरन्तरत्वं द्योतयति।

अद्यतनवैदिकचिन्तनस्य सन्दर्भे यजुर्वेदीयकर्मकाण्डं सन्देशवहनक्षमं साधनं भवति। यद्यपि बाह्यरूपेण अनुष्ठानपरम्परा न्यूनता प्राप्तवती, तथापि तस्य अन्तर्निहितं दर्शनं यज्ञस्य त्यागरूपता, कर्तव्यनिष्ठा, अनुशासनबद्धता च अद्यापि प्रासङ्गिकं भवति। वर्तमानविश्वे, यत्र त्वरितफललाभे स्पृहा वर्धते, तत्र यजुर्वेदीय-निष्कामकर्मचिन्तनं सशक्तमार्गदर्शनं प्रदानं करोति।

अतः, यजुर्वेदे स्थितं कर्मकाण्डं न केवलं वेदकालीनसत्यं, अपि तु आज्ञानाम् अपि आध्यात्मिक-सामाजिकप्रेरणास्रोतः भवति। एषा परम्परा तत्त्वतः नित्यं जीवति, केवलं तस्य रूपं परिवर्त्यते, सारतत्त्वं तु न परिवर्तते।

अस्मिन् शोधालेखे ''यजुर्वेदे वर्णितं कर्मकाण्डम्'' विषयकं समीक्षात्मकं विवेचनं समर्पितम्। यजुर्वेदे, विशेषतः वाजसनेयिसंहितायाम्, विविधरूपेण प्रस्तुतं कर्मकाण्डं केवलं धार्मिकविधानं न, अपि तु जीवनशास्त्ररूपेण प्रतिपादितं दृश्यते। मन्त्रोच्चारणविधिः, यज्ञप्रकाराः, देवतावाहनम्, आहुतिप्रदानम् इत्यादयः यथा यथा विन्यस्ताः, तथा तस्यानुष्ठानं लोकनियमस्य एकं माध्यमं भवति।

अस्य विश्लेषणस्य माध्यमेन, स्पष्टं सिध्यति यत् कर्मकाण्डः वैदिकदर्शने निष्कामकर्मस्य आधारशिला अस्ति, यः न केवलं आध्यात्मिकविकासाय, अपि तु सामाजिकसङ्घटनाय अपि प्रेरकः भवति। ब्राह्मणग्रन्थेषु यज्ञानां तात्त्विकं विवेचनं कर्मकाण्डस्य गूढार्थप्रदर्शनं करोति।

यद्यपि उत्तरवैदिककालात् अद्यतनयुगपर्यन्तं कर्मकाण्डपरम्परायाः बहुधा रूपपरिवर्तनं दृष्टमस्ति, तथापि तस्य मूलाधारभूतं चिन्तनं निरन्तरं प्रवहति।

भविष्ये, यजुर्वेदीयकर्मकाण्डस्य अन्यैः वेदैः, आगमैः, एवञ्च लोकाचारैः सह तुलनात्मकमध्ययनं कृत्वा तस्य व्यापकत्वं, सार्वकालिकत्वं च सप्रमाणं प्रतिपादयितुं शक्यते। एषः शोधः तस्य दिशायां प्रथमं पादं समर्पयति।

**सन्दर्भग्रन्थसूची-**


1. *वाजसनेयिसंहिता, सत्यव्रतशास्त्री सम्पादितः, चौखम्बा संस्कृत सीरीज, वाराणसी।*
2. *शतपथब्राह्मणम्, द्वारकानाथ शास्त्री सम्पादकः, बनारस संस्कृत सीरीज, वाराणसी।*
3. *तैत्तिरीयसंहिता, श्रीकृष्ण द्वैपायन सम्पादितः, आनन्दाश्रमसंस्थानम्, पुणे।*
4. *सायणाचार्यकृतं वाजसनेयिसंहिताभाष्यम्, श्रीमदनन्तकृष्णशास्त्रिणा सम्पादितम्।*
5. *भट्टभास्करकृतं तैत्तिरीयसंहिताभाष्यम्, चौखम्बा संस्कृत सीरीज, वाराणसी।*
6. *मनुस्मृतिः, नागेशभट्टटीकायुक्ता, चौखम्बा ओरियंटालिया, वाराणसी।*
7. *गृह्यसूत्रणि, हेरमान ओल्डेनबर्ग सम्पादितम्।*
8. *याज्ञवल्क्यस्मृतिः, कालिकारामशास्त्री सम्पादितः। चौखम्बा संस्कृत सीरीज, वाराणसी।*

   *आधुनिकशोधसाहित्यं (Secondary and Modern Sources)*

9. *Kane, P.V. (1974). History of Dharmaśāstra (Vol-IV)- Bhandarkar Oriental Research Institute] Pune-*
10. *Apte, V.S. (1965). The Practical Sanskrit-English Dictionary. Prasad Prakashan] Poona.*
11. *Upadhyaya, Baldev (2003). Vaidik Sāhitya kāSāṃskritikItihās. Hindi Granth Akademi, Lucknow.*
12. *Pandey, Raghunath Shastri (1990). Vaidik Karma KāṇṃkāSāṃskritikAnuśīlan. Sampurnanand Sanskrit University, Varanasi.*
13. *Staal, Frits (1983). Agni: The Vedic Ritual of the Fire Altar (Vols. I–II). University of California Press.*

14. *Gonda, Jan (1977). The Ritual Sutras. Otto Harrassowitz, Wiesbaden.*
15. *Renou, Louis (1956). Vedic India. Susil Gupta (India) Ltd., Calcutta.*
16. *Bhatt, G.P. (Ed.). (1995). Encyclopaedia of Hinduism (Vol. 2). Rupa & Co., Delhi.*
17. *Altekar, A.S. (1955). State and Government in Ancient India. Motilal Banarsidass, Delhi.*
18. *Hillebrandt, Alfred (1990). Vedic Mythology (English Trans. by S. Mayrhofer). Motilal Banarsidass, Delhi.*

●●●

# 3

# वैदिकवाङ्मये भौतिकविज्ञानम्

*सत्यव्रतपाण्डेयः*

वेदो भवति यज्ञप्रधानः। यज्ञस्तावत् देवानुद्दिश्य कुण्डात्मकाग्नौ पदार्थस्य त्यागः।[1] परञ्च यज्ञप्रधानभूतस्सन्नपि वेदश्श्लेषात्मकरूपेण भवति सर्वज्ञानभूतः। यथा- मनुनोक्तं वर्तते **''सर्वज्ञानमयो हि सः''**[2] अत्र श्लेषात्मकरूपेणेति कथनस्याशयो वर्तते यत् वेदेषु मन्त्रस्त्वेकैव भवति परन्तु तस्यार्थो लभ्यते विविधरूपेण। निरुक्ते आचार्ययास्केनाप्युक्तं **''यत्कामऋषिर्यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते तद्दैवतस्समन्त्रे भवति''**[3] अर्थात् यज्ञादिकाले ऋषिर्यजमान ऋत्विजो वार्थपत्यमिच्छन् यया कामनया येन मन्त्रेण येषान्देवानां स्तुतिङ्करोति तन्मन्त्रस्तया कामनया सह सम्बन्धं स्थापयित्वा तत्कामनानां पूर्तिङ्करोति। अत एवेदं सिद्धयते यत् वेदेषु समेषां विद्यानां सूत्रं विद्यमानमस्ति।

यत्र वेदे धर्मशास्त्र, आचार, नीति, राजनीति, अर्थशास्त्र, सामाजिक जीवन, आयुर्वेदादि शास्त्राणां ज्ञानं प्राप्यते, तत्रैव विज्ञानस्य विविधाङ्गानां प्रक्रियापि प्राप्यते। यथा - भौतिकविज्ञाने (ऊर्जायाः रूपान्तरणम् Transformation of energy) रसायनविज्ञाने (जलनिर्माणस्य सूत्रं H2O, Electricity, Test&tube) वनस्पतिविज्ञाने (प्रतन्वती Extending, अंशुमती Rich in shoots) जन्तुविज्ञाने, प्रोटोजोआ Protozoa, मोटोजोआ Motozoa, Ecological classification of animals) शिल्पविज्ञानं Technology (अस्त्र Missilie, अश्रुगैस इति Tear gas, वज्रः Dynamite, वास्तुशास्त्रं, वातानुकूलितगृहं, सरोवरः Tank, वज्रलेपः Plaster, नगरनिवेशः town planning, आकाशीयतरणिका air ship, अन्तरिक्षयानं automatic airbus) कृषिविज्ञाने, कर्षणं, वपनं, लवनं, मर्दनं, प्रकाशसंश्लेषणं photosynthesis,

उर्वरकप्रयोगः fertilizer, पशुपालनं animal husbandry, dairy farm) गणितशास्त्रे (समयः time, स्थानं space, क्षेत्रगणितं अथवा ज्यामितिप्रयोगः, बीजगणितं, सङ्कलनं Plus, व्यवकलनं minus, गुणनं multiply, भागहारः divide, वर्गः square, वर्गमूलं $\sqrt{}$square root, घनः cube, घनमूलं cube root, आरोहक्रमः ascending order, अवरोहक्रमः descending order, संख्यासंख्येयश्च cardinals ordinal numbers, साङ्केतिकलिपिः short handwriting) ज्योतिषशास्त्रे (कालमानं, ग्रहाणाङ्गतिमानं, मासर्तुज्ञानं) वृष्टिविज्ञाने meterology (आयनं charged particle/ion, रञ्जनरश्मयः Rontjenrays, X-rays, पुरोवातः Easterlies, अभ्रः clouds, विद्युत् lightning, स्तनयित्नुः/गर्जनं thunder, Dew, Fog, उल्का Meteor, इन्द्रधनुषः rainbow) पर्यावरणविज्ञाने (हरितगृहप्रभावः greenhouseeffect, अम्लीयवर्षा acid rain) भूगर्भविज्ञाने (plutonic energy, mine) आदयः।

सर्वादौ ज्ञानविज्ञानयोः को भेदः? इति प्रश्नः समुदेति, तर्हि उत्तररूपेण वयं वक्तुं शक्नुमः यत् कस्यापि पदार्थस्य बुद्धावगमनं भवति तदवगमनमेव तस्य पदार्थस्य ज्ञानमिति। परञ्च वयङ्कस्यापि पदार्थन्दृष्ट्वा प्रमाणादिमाध्यमेन तस्य लक्षणङ्कृत्वा पुनस्तस्य परीक्षणमाध्यमेन निर्मातुमुत्पादयितुं वा समर्थास्तदा तन्नाम विज्ञानमिति। यथा - वयं पश्यामः जलं भवति खलु? तन्दृष्ट्वा कथयाम इदञ्जलमिदञ्जलमित्यवगमने जलस्य ज्ञानमिति। परन्तु यदा वयञ्जलनिर्माणस्य सूत्रं $H_2O$ माध्यमेन किञ्चित् क्रियाकलापङ्कृत्वा जलस्य निर्माणङ्कुर्मः तदा भवति जलविज्ञानमिति।

**''सर्वरसा अनुप्राप्ताः पानीयमिति''**[4] इति आचार्ययास्कानुसारेण भूमौ ये रसास्सन्ति ते सर्वे जलमध्ये प्राप्ताः भवन्ति। अतएव रसविज्ञानमिति जलविज्ञानन्तद्भवति यस्मिन्, स एव रसायनविज्ञानम् इति उच्यते। जलोत्पत्तिविषयेऽथर्ववेदे प्राप्यते यत् - **''अग्नीषोमौ बिभ्रति आप इत् ताः''**[5] अर्थात् जले अग्निसोमयोः प्राप्तिर्भवति। अत्र ध्यानं दातव्यं यत् वेदेषु आक्सीजन (oxygen) इत्यस्य पर्यायाः भवन्ति - अग्निः, मित्रम्, वैश्वानरः, मातरिश्वा आदयः। अथ च हाईड्रोजन इत्यस्य सोमः, जलम्, आपः, सलिलम्, वरुणमित्यादयः पर्यायाः भवन्ति।

विज्ञानशास्त्रे जलस्य सूत्रं निर्धारितं वर्तते। यत् -$H_2O$ तदनुसारः हाईड्रोजन इत्यस्य द्व्यणुमात्र (2 molecule) एवञ्च आक्सीजन इत्यस्य एकाणुमात्र (1 molecule) तयोः मेलनङ्कृत्वा पात्रे निधाय तत्र विद्युदित्यस्य प्रवाहे कृते सति जलस्य प्राप्तिर्भवति।

तदेव ऋग्वेदेजलसूत्रं प्राप्यते। ऋग्वेदस्य एकमन्त्रयुक्तं विद्यते यत् मित्रवरुणयोः मेलने सति जलस्य निष्पत्तिर्जायते।

**''मित्रं हुवे पूतदक्षं वरुणं च रिशादसम्। धियं घृताचीं साधन्ता''।।**[6]

अर्थात् जलप्राप्तयेऽहं पवित्रऊर्जा (energy) रूपमित्रम् (oxygen) एवञ्च दोषहा वरुणं (hydrogen) गृह्णामि। मन्त्रेऽस्मिन् मित्रमिति शब्देन आक्सीजन तथा च वरुणमिति शब्देन हाईड्रोजन द्योतते।

ऋग्वेदस्यान्यस्थानेऽप्यस्य मन्त्रस्य रहस्य स्पष्टीकरणङ्कृतं वर्तते। तद् संक्षिप्तरूपेण विवेचयामि। यथा कुम्भ/कलशरूपपरीक्षणयन्त्रे यदा मित्ररूप आक्सीजन एवञ्च वरुणरूप हाईड्रोजन इत्येतयोः वीर्यं नाम अंशं/अणुः सम्यक् मात्रया पतितमेवमस्य कार्यस्य ते विद्युत् रूपोर्वशी (ऊरु क्षेत्रे, अशी व्याप्तः) इति तस्याः व्याप्ते सतितस्मात् वशिष्ठरूपो जलमित्युत्पन्नो जातम्।

**विद्युतो ज्योतिः परि संजिहानं मित्रावरुणा यदपश्यतां त्वा।**

**तत् ते जन्म-उतैकं वसिष्ठ, अगस्त्यो.।**

**उतासि मैत्रवरुणो वसिष्ठ, उर्वश्यां मनसोऽधि जातः।**

**अप्सरसः परि जज्ञे वसिष्ठः। द्रप्सं स्कन्नं.. पुष्करे त्वाददन्त।**

**कुम्भे रेतः सिषिचतुः समानम्। ततो जातमाहुर्वसिष्ठम्**[7] **।**

मन्त्रेष्वागतानां शब्दानान्तात्पर्यः कुम्भः, पुष्करः परीक्षणयन्त्रम् (test tube) 'अगस्त्यः'। मित्रम् आक्सीजन। वरुणम् हाईड्रोजन। वशिष्ठः जलम्। विद्युत् (electric current) उर्वशी (अप्सरा)।

एवं प्रकारेण यदि वयमग्नेरुत्पत्तिर्विषये चिन्तयामस्तर्हि द्रष्टुं शक्नुमः यदथर्वा ऋषिणाग्नेर्विषयकमाविष्कारत्रयङ्कृतः।

प्रथमस्तावत् घर्षणमाध्यमेन यथा यजुर्वेदे श्रूयते। ''अथर्वा त्वा प्रथमो निरमन्थदग्ने''[8] अर्थात् हे अग्ने! त्वामथर्वा नामक ऋषिस्सर्वादौ मन्थन (घर्षण/Friction) माध्यमेनोत्पत्तिः तवान्। पुनश्च ऋषेः पुत्रः दधीचिना यागे

तस्याग्नेः प्रयोगङ्कृतः। ''तमुत्त्वा दध्यङ्ऋषिः पुत्र ईधे अथर्वणः''[9] ऋग्वेदेऽपिविद्यते यथा ''अरण्योर्निहितो जातवेदाः''[10] ''अग्निं मन्थान पूर्वथा''[11] अर्थादरणौ विद्यते अग्निस्तयोः घर्षणेनोत्पद्यते च। एवञ्च द्वयो अश्म मध्ये यदाघातप्रतिघातमाध्यमेनाथवा मन्थनादि करणेनापि घर्षणो जायते तदापि भवत्यग्नेरुत्पत्तिरिति। ''यो अश्मनोरन्तरग्निं जजान''[12] इऽतोपि ऋग्वेदैव श्रूयते यद्यदा द्वयोः पाषाणखण्डयोर्मध्ये घातप्रतिघातमाध्यमेनाथवा मन्थनादि करणेनापि निष्पद्यतेऽग्निः।

पुन ऋषिणा द्वितीयाविष्कारो भवति जलादग्निर्निष्पत्तिः। ''त्वामग्ने पुष्करादधि अथर्वा निरमन्थत''[13] अर्थादथर्वाऋषिणा तडागादिकजलमन्थनेन (Feiction) अग्नेर्निष्पत्तिः कृतं वर्त्तते। विज्ञानशास्त्रेऽस्य कृते हाइड्रोलेक्ट्रिक/ हाइडेल (Hydroelectric/ Hydel) इति शब्दो भवति।

अथर्वा ऋषेस्तृतीयाविष्कारे भूगर्भीयाग्नेरवगमनञ्जायते। यथोक्तमृग्वेदे **''पुरीष्यासो अग्नयः''**[14] अत्र पुरीष पदेन तैलादिकं (Oil) अथवा प्राकृतिकवायुः (natural gas) इति नाम्ना व्यवह्रियते। अस्योत्पत्तिर्भूमौ सागरे वोत्खननमाध्यमेनेति ज्ञायताम्। मन्त्रे पुरीष्यास इति पदे बहुवचनमुद्धृतम्। अतएव पुरीष्याग्नि शब्देन भूगर्भीयः प्रज्ज्वलनशीलानां पदार्थानां यथा पेट्रोलं (petrol), वायुः (gas), मृदा तैलं (Kerosin), भाषायां (मिट्टी का तेल) इत्यादि शब्दानां व्यवहारो परिलक्ष्यते। **''पुरीष्योऽसिविश्वभरा''**[15] इत्यनेन ज्ञायते यत् पुरीषोऽग्निस्समग्रविश्वस्य कृते लाभकारी सिद्ध्यते। अनेन माध्यमेन संसारस्य पालनादिकव्यवहारोऽपि जायमानो वर्त्तते। ऋग्वेदेऽथ च यजुर्वेदेऽपि विद्यते यदग्निनैव कस्मिन्नपि परमाणौ गतिर्जायते। अत एवोक्तं द्यावापृथिवीलोकाधिपति-रग्निः। यथा **''अग्निर्मूर्धा दिवः ककुत् पतिः पृथिव्या अयम्। अपां रेतांसि जिन्वति''**[16]।। अर्थादयमग्निर्द्युलोकस्य मूर्धा,पृथिव्याः पतिरूपेण च संतिष्ठति। यजुर्वेदे मन्त्रः श्रूयते **''ॐ अग्निजज्योतिर्ज्योतिरग्निः स्वाहा। सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा। सूर्योवर्चो ज्योतिर्वर्चः स्वाहा। ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा।।''**[17]

तेनेदं सिद्ध्यते यत् सूर्य एवाग्नि रूपो भूत्वा भूमौ प्रदीप्यते। यास्केनाप्युक्तम् ''उदीचीं प्रथमसमावृते आदित्ये कंसं वा मणिं वा परिमृज्य प्रतिवत्सरे यत्र गोमयमसंस्पर्शन् धारयति, तत्प्रदीप्यते,सोऽयमेव सम्पद्यते''[18]

पूर्णसूर्योदये मध्याह्ने काले सति यदा कंसेन सूर्यकान्तिमणिना वा गोमयं संस्पर्शयन् धारयति,तदा तत्र गोमयपिण्डे सूर्यस्य ताप अग्निस्वरूपे पर्णितो भूत्वा तद् पिण्डं प्रज्ज्वालयति। सूर्येणापि संसारस्य जीवनं प्राप्यते। ''सूर्य आत्मा जगतस्तस्थुषश्च''[19] अथर्ववेदादेव सिद्ध्यति यत् आकाशस्थकेन्द्रबिन्दुहृदयरूपसूर्यः वर्त्तते पृथिव्याः केन्द्रभूतः। तेनैव माध्यमेन सा (पृथ्वी) प्राप्यते ऊर्जा। ''यस्या हृदयं परमे व्योमन्''[20] ''बाहुच्युता पृथिवी द्यामिवोपरि''[21] अर्थात् बाहुच्युतापृथिवी सूर्येणप्रदत्तस्तस्मिन्नेवाश्रये विद्यमाना च। अतएव पृथिवी सूर्यं परितः परिभ्रमति। यथा निरूप्यते

**''आयं गौः पृश्निरक्रमीत् असदन् मातरं पुरः। पितरं च प्रयन्त्स्वः''**[22] ।।

अर्थात् पृथिवीयमन्तरिक्षरूपमातुः पुरतस्तिष्ठन् पितुस्सूर्यं परिक्रामतीति। यथार्ग्वेदे प्राप्यते ''क्षा..... शुष्णं परि प्रदक्षिणित्''[23] मन्त्रेऽस्मिन् क्षामिति पदेन पृथिव्याः व्यवहार अथ च शुष्णमिति पदेन सूर्यो ज्ञायते।

अस्ति पृथिव्याः परितः वायुमण्डलं व्याप्तमिति तदेव वातावरणम् इति कथ्यते। तत्र वायुमण्डले विविधवायूनां समाहारो भवति। यथा-प्राणवायुः। ऋग्वेदात् सिद्ध्यते यत् वायौ प्राणशक्तिः (oxygen) वर्त्तते। तेन माध्यमेन तदोषधिरूपभूत्वा हृदयादिरोगन्दूरीकरोति, दीर्घायुश्च प्रददाति। **''यददो वात ते गृहे अमृतस्य निधिर्हिताह्य। ततो नो देहि जीवसे''**[24] ।। अन्यस्थाने वायोः कृते 'नियुत्वान्' इति शब्दो विद्यते। वक्तुं शक्नुमः यत्तदेव विज्ञानशास्त्रे वयं नाइट्रोजन (nitrogen) इति व्यवहरामः। ''नियुत्वत्या यजति **(नियुत्वद्देवताकः वायुः)**''[25] वायुमण्डले नाइट्रोजन इति वायुर्विस्तृतं वर्त्तते। तदेव ऋग्वेदे दृश्यते यथा **''सहस्रेण नियुता नियुत्वतेः''**[26] इत्यनेनोक्तं यत् नियुत् शक्तिः शताधिकं सहस्राधिकञ्च शक्तिना युक्तं विद्यते।

वेदेषु मरुद्देवानामधिकं दरीदृश्यते महत्वम्। अस्य जन्मविषये दशतयीषु वर्त्तते यत् **''हस्कराद्विद्युतस्परि अतो जाता अवन्तु नः। मरुतः..''**[27] अर्थात् मरुद्गणास्तेजोमयविद्युत्माध्यमेनाजीजनत्। मरुद्देवास्सदा समूहरूपभूत्वा एव यान्ति तदेव विद्युत् चुम्बकीय विकिरणानि (electromagnetic radiation) समूहे एव प्रचलन्ति। ब्राह्मणग्रन्थे निरूपितं वर्त्तते **''मरुतो रश्मयः''**[28] **''गणशो हि मरुतः''**[29] अर्थात् मरुद्देवाः रश्मिः (radiation) रूपेण सन्तिष्ठन्ति। अथ च गणमाध्यमेन समाहारो भूत्वा प्रचलन्ति। गणविषये यदि चर्चयामस्तर्हि ब्राह्मणे निरूपितं वर्त्तते।

यथा **''सप्त हि मारुतो गणः''**[30] मरुद्देवानां मुख्यरूपेण सप्तप्रभागास्सन्ति, पुनश्च तेषां समेषां सप्तप्रभागानां सप्त सप्तविभागाः भवन्ति। यथा **''सप्त सप्त हि मारुतो गणाः''**[31] इति।

उपसंहाररूपेण वक्तुं शक्नुमः यत् चतुर्षु वेदेष्वग्न्यादि भौतिकपदार्थानां व्यापकत्वं दरीदृश्यते। तत्र तेषां पदार्थानां गुण धर्म- कर्तृत्व-व्यापकत्व-शक्ति-उत्पत्ति-महत्व-भेद-मिश्रण-उपयोग-परिवर्तन-संचार-परीक्षण-निर्माण-स्थूल-सूक्ष्म-समाहारीकरण-पृथुकरण-सामर्थ्य-कर्म- आदि धर्माणां विशद्विवेचनङ्कृतं वर्त्तते। आचार्ययास्कस्य कथनं वर्त्तते यत् **''न ह्येषु प्रत्यक्षमस्ति अनृषेरतपसो वा''**[32] अर्थात् वैदिकमन्त्राणां यथार्थज्ञानन्तानेवावगन्तुं शक्यते ये ऋषयस्तपस्विनो वा सन्ति नेतरो जनान्। अस्त्यभिप्रायो यत् मन्त्रेषु विद्यते गूढात्मकता रहस्यात्मकता च तद् कठोरपारिश्रमिका एवावबोधुं शक्यते। अस्ति कृतं पाश्चात्यैः अग्नीन्द्र-मित्र-वरुण-मरुदादि शब्दानान्देवत्वपरकविशेषार्थ- ज्ञानमिति परञ्च तत्र केषाञ्चन शब्दानां यावच्चिन्तनं स्यात् तावत् रहस्यात्मकार्थस्य स्पष्टीकरणं भवेदिति।

**सन्दर्भाः-**


1. *द्रव्यं देवतात्यागः (यागः) (का.श्रौ.सू.1.2.2.)*
2. *मनुस्मृति (2.7)*
3. *निरुक्तम् (7.1)*
4. *निरुक्तम् (1.5)*
5. *अथर्ववेदः (3.13.5)*
6. *ऋग्वेदः (1.2.7)*
7. *ऋग्वेदः (7.33.10-13)*
8. *शुक्लयजुर्वेदः (11.32)*
9. *शुक्लयजुर्वेदः (11.33)*
10. *ऋग्वेदः (3.29.2)*
11. *ऋग्वेदः (3.29.1)*
12. *ऋग्वेदः (2.12.3)*

*13. (ऋ. 6.16.13), (यजु.11.32), (साम.9), (तैत्ति.3.5.11.3)*
*14. ऋग्वेदः (3.22.4)*
*15. यजुर्वेदः (11.32)*
*16. ऋग्वेदः (8.44.16), यजुर्वेदः (3.12)*
*17. यजुर्वेदः (3.9)*
*18. निरुक्तम् (7.6)*
*19. (ऋ. 1.115.1), (यजु. 7.42), (अथर्व. 13.2.35)*
*20. अथर्ववेदः (12.1.8)*
*21. अथर्ववेदः (18.3.25-35)*
*22. (ऋग. 10.189.1), (यजु. 3.61), (साम. 630), (अथर्व. 6.31.1)*
*23. ऋग्वेदः (10.22.14)*
*24. ऋग्वेदः (10.186.3)*
*25. तैत्ति. सं. (2.6.2.3)*
*26. ऋग्वेदः (1.135.1)*
*27. ऋग्वेदः (1.23.12)*
*28. ता. ब्रा. (14.12.9)*
*29. ता. ब्रा. (19.14.2)*
*30. श. ब्रा.(2.6.1.13)*
*31. श. ब्रा.(9.3.1.25)*
*32. निरुक्तम् (13.12)*

●●●

# 4

# महर्षिदयानन्दसम्मता वैदिकशिक्षा व्यवस्थायाः प्रासङ्गिकता

*वालखडे भूपेन्द्र अरुणः*

"सर्वज्ञानमयो हि सः" इति मनुप्रोक्तवचनाधारेण वेदाः हि नाम अपूर्वो ज्ञानराशिः। अस्य विद्यानिधेर्न कदापि प्रक्षयः, शाश्वतोऽयं ज्ञानराशिः इति वेदशास्त्रमेव स्वयं प्रमाणयति। तपोपुतैः योगयुक्तैः महर्षिभिः साक्षात्कृतः इति आचार्ययास्कसम्मता विचारणा पुनश्च वेदस्य सर्ववेदनिधनत्वं तु सुसम्मतमेवास्ति विद्वद्भिरन्यैरपि, अत एव साध्यरूपिण्याः विद्यायाः साधनं शिक्षाऽपि स्वकीयं मूलस्वरूपं वेदादधिगतवतीति नास्ति काचिद् विप्रतिपत्तिः। किन्तु कीदृशी सा वेदसम्मता गुरुकुलीया शिक्षा इत्येतस्मिन् विषये महर्षिदयानन्देनाभिहितं स्वरचिते सत्यार्थप्रकाशस्य स्वमन्तव्यामन्तव्यमित्यस्मिन् प्रकरणे यत् मानवस्य अन्तर्निहीतां प्रतिभाम् अवगम्य तस्याः विकारान् दोषाञ्च परिमार्ज्य तं मनुष्यं पूर्णतां प्रति उन्नेतुमेव गुरुकुलीया शिक्षा प्रयतते। तेषाम्मतानुसारेण तु सा एव शिक्षाऽभिधीयते यया सभ्यता, धर्मता, जितेन्द्रियता अथ च सत्यादीनामभिवृद्धिः स्यादविद्यादयः दोषाश्च मुञ्चेयुः। वैदिकवाङ्मयेऽपि भौतिकविज्ञानेन तथा च कलाकौशलादीनामुन्नत्या समम् आध्यात्मिकोन्नयनम् एवञ्च मनुष्यस्य अन्तर्हृदये विद्यमानायाः आत्मसत्तायाः स्वाभाविकत्वेन प्रकाशनं भवेदिति निगदितम्। एवमेव अस्मिन् शोधप्रपत्रे गुरुकुलीया शिक्षायाः विषये महर्षिदयानन्दनां विचारणा स्वरूपावधारणा चापि वैदिकवाङ्मयस्याधारेण विवेचनायाः प्रयासः विहीतः। उपनिषत्सु वर्णितानां कथाप्रसङ्गानां सहाय्यतयाऽपि शोधप्रपत्रेऽस्मिन् विषयाः विवेचिताः सन्ति। अस्मिन् प्रपत्रलेखने सर्वेक्षणात्मिका पद्धतिः, विवेचनात्मिका पद्धतिः तथा च आवश्यकतानुरूपं तुलनात्मिकापद्धतिरपि प्रयुक्ताः सन्ति। पुनश्च

कीदृशी गुरुकुलीया शिक्षापद्धतिरेषा कथं च अद्यतनीयशिक्षाप्रणाल्यार्थं प्रेरणाप्रदा इत्येतदनुशीलनमपि प्रस्तुत शोध प्रपत्रे प्रतिपादितमस्ति।

शिक्षापदं ''शिक्ष् विद्योपादाने'' धातोः टाप्-प्रत्यये कृते सति निष्पद्यते। ''शिक्ष्यते उपदिश्यते विद्या यया सा शिक्षा'' इति वचनानुसारेण विद्यार्जनस्य साधनमेव शिक्षा इति विज्ञायते। वेदानुसारेण तु विद्यया मनुष्योऽमृतत्त्वं प्राप्नोति।[1] शिक्षाद्वारेण लब्धा विद्या तदैव अर्थवती भविष्यति यदा सा अज्ञानबन्धनमोचयित्री भविष्यति। अत उक्तमस्ति- ''सा विद्या या विमुक्तये''। षट्सु वेदाङ्गेषु शिक्षा हि वेदपुरुषस्य घ्राणमिति स्वीकृतम्।[2] ''वेदाङ्गरूपेण च केवलं स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते उपदिश्यते सा शिक्षा''[3] इति उच्यते किन्तु एतत्तु सङ्कुचितार्थः केवलं शिक्षायाः। व्यापकदृष्ट्या तु शिक्षायां समग्रचतुर्दशविषया अन्तर्भवन्ति।[4] वस्तुतस्तु शिक्षापदं वैदिकम् तस्य च प्रथमत्वेन प्रयोगः ऋग्वेद एव प्राप्यते।[5]

वैदिकर्षीणां सम्मतन्तु मनुष्यस्य मूला प्रकृतिः आध्यात्मिकी एव। अत एवं वक्तुं शक्यते व्यक्तित्वस्य समग्रविकासः अर्थात् शरीरस्य, मनसो बुद्धेश्चैतेषां त्रयाणां मानवीयपक्षाणां समुत्कर्ष एव गुरुकुलीयाः शिक्षायाः मुख्यः आधारः। मानवस्यान्तर्निहीतां प्रतिभाम् अवगम्य मानवप्रकृतेश्च विकारान् दोषाँश्च परिमार्ज्य तं मानवं पूर्णतां प्रत्युन्नेतुमेव गुरुकुलीया शिक्षा प्रयतते इति निश्चप्रचम्।[6] महर्षिदयानन्दानां मतानुगुणन्तु यया सभ्यताधार्मिकताजितेन्द्रियतासत्यादीनां गुणानां वृद्धिः स्याद् अविद्यादयः दोषाश्च मुञ्चेयुरिति। सैव शिक्षा इत्यभिधीयते। वेदमन्त्रेषु गायत्रीमन्त्रस्य[7] माहात्म्येनैव ज्ञायते यत् ब्रह्मचारिणि बुद्धेः विकासः सदाचारसम्वर्धनञ्च एतादृश्याः गुरुकुलशिक्षायाः मूलमुद्देश्यम्। अतः अधोलिखितानां बिन्दूनामाधारेणा स्पष्टमेव भविष्यति यत् महर्षिदयानन्दानां शिक्षाप्रणाली वेदसम्मता अथ च अद्यत्वेऽपि गुरुकुल-शिक्षा-प्रणाल्याः प्रासङ्गिकत्वं विद्यत इति।

**महर्षिदयानन्दानां बालशिक्षापद्धतिः**

महर्षिदयानन्दस्वामीप्रणीतस्य सत्यार्थप्रकाश इत्याख्यस्य ग्रन्थस्य द्वितीये समुल्लासे बालशिक्षायाः कृते केचन विचाराः तैः निगदिताः। तद्यथा-

- मातापितरौ स्व शिशून् सर्वदा उत्तमरीत्या शिक्षेयाताम्, येन सन्ततयः सभ्याः स्युः।[8]

- पञ्चवर्षीयान् बालकान् देवनागरीणामक्षराणाम् अभ्यासः कारयितव्यः।[9]
- व्यवहारानुवर्तनार्थं नैतिकशिक्षापि दातव्या।[10]
- मिथ्याडम्बरयुतानां तथ्यानां विचाराणां वा तरणोपायान् स्वसन्तानानामन्तर्हृदि स्थापयेयुः, येन भविष्यत्काले ते दिग्भ्रमिताः लुण्ठिताः वा न भवेयुः।[11]
- पितरः स्वं बालकं नैतिकशिक्षया साकं कुसङ्गप्रभावजान् दोषान्नपि निराकुर्युः।[12]
- माता बालं जन्मनः आपञ्चवर्षाणि शिक्षेत् अथ च तदनन्तरम् पिता तं बालं षड्वर्षतः अष्टौ वर्षाणि यावत् शिक्षेत्, अनेन यत्नेनैव ''मातृमान् पितृमान् आचार्यवान् पुरुषो वेद'' इति वेदाज्ञानुसारेण प्रथमत्वेन मातुरनन्तरञ्च पितुः पदस्थापनं साफल्यं भजेत्।[13]
- दोषाः लालनाश्रयिणः अथ च गुणाः ताडनाश्रयिणः इति तेषां सम्मतम् परञ्च ईर्ष्याद्वेषादिहेतुभिर्न ताडयेत्पुत्रमित्यपि निगदितम् महर्षिणा।[14]
- सत्याचरणत्वं सत्यप्रतिज्ञत्वञ्च सदैव स्वपुत्रं शिक्षेत्। दर्पभावदमनमपि शिक्षेत्। वृद्धैस्समं शिष्टाचारसमन्वितानि आचरणान्यपि शिक्षेत्।[15]
- सत्योपदेशधर्मयुक्तकर्मोपदेशदुष्कर्मत्यागोपदेशश्चेत्यादयः उपदेशाः बालकान् पौनःपुन्येन यच्छेयुः।[16]
- ते पितरः वैरिणः ये बालं न शिक्षन्ते। अतः दयानन्देन निगदितं सुभाषितं – ''माता शत्रुः पिता वैरी येन बालो न पाठितः'' इति।[17]

**महर्षिदयानन्दानां गुरुकुलशिक्षापद्धतिः**

सत्यार्थप्रकाशस्य तृतीये समुल्लासे महर्षिदयानन्देन गुरुकुलशिक्षा-पद्धतिविषये केचन बिन्दवः विलिखिताः सन्ति-

- मातृभिः पितृभिराचार्यैश्च बालकान् उत्तमा विद्या-शिक्षा-गुण-कर्म्म-स्वभावादीनाञ्च ज्ञानं कारयितव्यम्।[18]
- अष्टमे वर्षे स्वबालकं बालकानां पाठशालासु अथ च स्वबालिकां कन्यानां पाठशालासु शिक्षार्थं प्रेषयेयुः।[19]
- कन्यानां गुरुकुलानि बालकानां गुरुकुलेभ्यः क्रोशद्वयं यावत् दूरे भवेयुः। बालिकानां पाठशालासु च सर्वे भृत्याः कर्मकराश्च स्त्रिय एव भवेयुः एतद्विपरीतञ्च बालकानां गुरुकुलेषु भवेयुः सर्वे भृत्याः कर्मिणश्च पुरुषा एव।[20]

- अध्यापकैः छात्राः कन्याश्च अष्टविधमैथुनेभ्यः निवारणीयाः। पाठशालाः अपि नगरतः क्रोशचतुष्टयपरिमितं दूरे स्थिताः स्युः।[21]
- गुरुकुलेषु पक्षपातरहितमाचरणं व्यवहारश्च भवेत्। सर्वेषां निर्धनानां, धनिकानामुतवा राज्ञां पुत्रेभ्यः समानानि वस्त्रणि-भोजनानि अन्यान्यपि साधनानि दातव्यानि।[22]
- ब्रह्मचारिणः स्नानाचमनप्राणायामसन्ध्योपासनादिनि नित्यकर्म्माणि प्रतिदिनं कुर्युः।[23]

इत्यादयः अन्येऽपि बहवः विचाराः महर्षिदयानन्देन निगदिताः सन्ति। अतः एतादृश्याः वेदसम्मतायाः ऋषिसम्मतायाश्च गुरुकुलीयशिक्षायाः अद्यत्वे प्रासङ्गिकत्वमपि अस्ति। तच्च निम्नोक्तानां बिन्दूनां माध्यमेन प्रतिपादितम्। तद्यथा -

**मानवस्य सर्वाङ्गीणाभ्युदयाय आत्मबोधाय च गुरुकुलशिक्षाप्रणाली-**

वैदिकवाङ्मये शिक्षायाः परिकल्पना एषा दृश्यते यत् यया भौतिकविज्ञानेन तथैव कलाकौशलादीनामुन्नत्या समम् आध्यात्मिकोन्नयनम् एवं मनुष्यस्य अन्तर्हृदये विद्यमानायाः आत्मसत्तायाः स्वाभाविकं प्रकाशनं भवेत्। यजुर्वेदे शिक्षामेतामेव विद्याऽविद्ये चेति नामद्वयेन व्यवस्थापिते[24] तथा चेतयोः द्वयोः विषये उक्तं यत् एते हि विद्ये पृथक्पृथग्रूपेण हानिकारके स्तः। अत एव एतयोः द्वयोः सन्तुलनं समन्वयञ्चावश्यं विधेयम्। तथैव परिप्रेक्षेऽस्मिन्नेव मुण्डकोपनिषदि विद्यायाः पराऽपरा इति भागद्वयं विहीतम्। ऐहिकामुष्मिकाभ्युदयदात्री विद्या अपरा उक्ता एवञ्च अस्माद्भवबन्धनतः मोचयित्री तथैव च निःश्रेयससाधिका पराऽभिहिता।[25] शिक्षाया आदर्शस्वरूपे एतयोः द्वयोरपि समन्वयोऽपरिहार्यः। तस्यां परिकल्पितं यत् भौतिकोपलब्ध्या न किमपि सुनिश्चितं सुद्रढञ्च साध्येते। श्रेयस्कामेन आत्मोत्कर्षोऽपि प्रयतितव्यः। सर्वेषामेव वेदानां विद्यानां च परमं प्रतिपाद्यं तदेव आत्मतत्त्वमस्ति यस्तन्न जानाति सोऽधीत्यापि वेदं किमपि कर्तुं न पारयति।[26] अत एव वैदिकी शिक्षा यद्यपि वेदाङ्गरूपेण तु स्वरवर्णोच्चारण-प्रकारमात्रमेव पाठयति परमर्थावबोधं विना तन्निरर्थकमित्यपि निरूप्यते।[27]

**सर्वतोमुखिन्यै उन्नत्यै गुरुकुलशिक्षायाः प्रासङ्गिकता -**

वस्तुतस्तु वैदिकदर्शनानुसारं शिक्षा न केवलं पुस्तकस्थस्य ज्ञानस्य संकलनम्, नैव अक्षरमात्रज्ञानमपितु समग्रा सर्वतोमुखिनी वा उन्नतिः आत्मज्ञानं च

तस्य परमं गन्तव्यम् अस्ति। परिप्रेक्षेऽस्मिन् नारद-सनत्कुमारसंवादमाध्यमेन छान्दोग्योपनिषदि उल्लिखितमस्ति यत् नारदमहाभागाः सनत्कुमारं कथयन्ति यत् तैः वेदाः इतिहासपुराणविज्ञानगणितमर्थशास्त्रं भूतविद्यां नक्षत्रविद्याललितकलां तथैव च ब्रह्मविद्यामिति सर्वाः विद्याः पठिताः अथ च ते मन्त्रविदः इति अभूवन् परञ्च आत्मविदः न, तदा सनत्कुमाराचार्याः तं प्रतिबोधयन्ति यद्विद्यायाः आरम्भस्तु पुस्तकीयज्ञानादेव सदैव भवति किन्तु तदेव परमं साध्यं नास्ति। परमं साध्यं तु स्वस्य सर्वतोमुखिन्यै उन्नत्यै आत्मज्ञानमेव अथ च तस्य कृते स्वस्थितसमग्रान्त-र्निहितशक्तीनां जागरणं कर्तव्यम्।[28] एतदेवोत्तमशिक्षायाः उद्देश्यम्। एवम् प्रकारेण बृहदारण्यकोपनिषद्यपि दकारत्रयाणां शिक्षा क्रमशः देवान् मानवान् दानवाँश्च सैव शिक्षां यच्छति[29] यत् व्यक्तित्वस्य सर्वतोमुखिनी उन्नतिरेव शिक्षायाः प्रमुखोद्देश्यम्।

**चरित्रनिर्माणहेतुः गुरुकुलीया शिक्षा -**

उदात्तायाः एवं परिकीर्तितायाः शिक्षायाः निष्पत्तिहेतोः वैदिकवाङ्मयं चरित्रनिर्माणे भृशं महत्त्वमादधाति। तदर्थञ्च जन्मनः प्रागेव गर्भावस्थिततत्वेन बीजरूपेण संस्कारपद्धत्या शिक्षणं विदधाति। वैदिकसंस्कृतौ विहिताः गर्भाधान-पुंसवन-जातकर्म-उपनयनादयः संस्काराः सूक्ष्मशिक्षणक्रमस्यैव विविधाः स्तराः सन्ति। गुरुकुलीया शिक्षाप्रणाली संस्काराश्रिता वैदिकर्षिभिः मानवानामन्तर्भूमिमुदात्तीकर्तुमुन्नतिपथमानेतुं च केचन ईदृशाः सूक्ष्मोपचारा आविष्कृताः येषां प्रभावो न केवलं बाहीके शरीरे अपितु सूक्ष्मतमेऽन्तःकरणेऽपि च प्रसरति। मानवस्वभावस्य समुन्नयने एते सूक्ष्मोपचारा एव संस्कारा इत्यभिधीयन्ते। एतैः संस्कारैः मानवव्यक्तित्वस्य पूर्णपरिष्करणमेव शिक्षायाः प्रयोजनम्। एतेषु संस्कारेष्वपि शिक्षादृशा उपनयनसंस्कारः सर्वाधिकं महत्त्वं भजते।[30] यद्यपि उपनीताः वटवो ब्रह्मचारिणो भूत्वा आचार्यमुपगच्छन्ति तदा स मातेव गर्भे दधाति।[31] तेभ्यो हितकरं मार्गदर्शनं च प्रयच्छति। शिक्षार्थिनोऽपि तस्य अन्तेवासिनो भूत्वा कञ्चन व्रतं गृहीत्वा व्रतचारिणो भवन्ति।[32] शिक्षया सह दीक्षाया व्रतस्य वा ईदृशः संयोग एव खलु वैदिक्याः शिक्षाया अनुपममवदानम्।

**पर्यावरणसंरक्षणार्थं गुरुकुलीया शिक्षायाः प्रासङ्गिकता -**

अद्यत्वे पर्यावरणचेतनायाः यः विमर्शः प्रवर्तते सः तु वैदिकशिक्षापद्धतौ सुष्टुतया अनुस्युतः आसीत्। वृक्षान् वनस्पतीन् च प्रति संवेदनभावना[33] द्यावापृथिवी पितराविति उद्घोषणा[34] आश्रमाणाम् एकान्तवातावरणे शिक्षाग्रहणञ्च गुरुकुल-

पद्धतेर्विशिष्टवैशिष्ट्याण्येव। गुरुकुलानि प्रायशः गोभिः वनैः सरोवरैश्चावृतानि भवन्ति। ईदृशे प्राकृतिकवातावरणे बलिष्ठस्य देहस्य निर्माणम् शिक्षार्थिनां कृते वन्यसम्पदः संरक्षणं गोकुलपोषणं कृषिकार्यञ्चेति सर्वथा सम्पादनीयानि दैनिककृत्यानि आसन्। अनेन स्वास्थ्यसंवर्धनं पर्यावरणपोषणं सर्वजनसमभाव-भावनञ्च सहजत्वेन सञ्जायते। समाजवादस्य आद्या आधारशीला अत्रैव सुप्रतिष्ठिता।[35] गुरुकुल इति नाम्ना एव सुव्यक्तं भवति यद् यस्यां पद्धतौ गुरोः महत्त्वं सर्वोच्चमासीत् स न केवलं पाठमध्यापयति अपि च आचारं ग्राहयति। अत एवाचार्योऽभिधीयते सः।[36] आचार्यशब्दोऽयं आचारशुद्धिं सूचयति। आचारशुद्धयै शरीरशुद्धिरपि अपेक्ष्यते एव।

अतो हि एकत्रे यजुर्वेदीये मन्त्रे शिष्यं सम्बोधयन् आह आचार्यः-

"वाचं ते शुन्धामि, प्राणं ते शुन्धामि, चक्षुस्ते शुन्धामि श्रोत्रं ते शुन्धामि नाभिं ते शुन्धामि मेढ्रं ते शुन्धामि पायुं ते शुन्धामि चरित्रंस्ते शुन्धामि"[37] इति।

**ब्रह्मचर्यपालनहेतुः गुरुकुलीया शिक्षा आवश्यकी -**

अद्यत्वे ये आत्महननादयो दुष्प्रवृत्तयः अस्मान् दरीदृश्यन्ते तेषां परिहाराय ब्रह्मचर्यपालनमत्यन्तावश्यकम्। वस्तुतस्तु ब्रह्मचर्यं गुरुकुलशिक्षायाः आधारभूतमङ्गमस्ति। विद्याध्ययनकालं ब्रह्मचर्याश्रमः विद्यार्थिनं च ब्रह्मचारी इति नाम्नाभिधीयते। ब्रह्मचर्यं तु संयमानुशासनयोः सनातनः साधनामन्त्रः। अस्मिन्न केवलं शारीरकमपितु मानसिकं नियन्त्रणञ्चापि साध्यते। अनेन शास्त्रैः बलमुत्साहसं चापरिमितं जायेते। अत एव एकाग्र्यं तथा च ज्ञानार्जनं तु सुगमं भवति। ब्रह्मचर्येणैव अमोघां क्षमतां सम्प्राप्य शिक्षार्थिनः सर्वोत्कृष्टं फलमलभन्त।[38] ब्रह्मचर्यमेव वैदिक्याः शिक्षायाः आरम्भबिन्दुरासीद् अस्ति चाद्यापि।

ब्रह्मचर्येण समम् तपोऽपि गुरुकुलशिक्षायाः मूलमङ्गम्। चित्तवृत्तिनिरोधः इन्द्रियनिग्रहो वा परमं तपः।[39] वैदिक्यां शिक्षायां तपः खलु श्रमस्य पर्यायभूतम्। गुरुकुलेषु उषित्वा ब्रह्मचारिणः श्रमस्य तपसो वा अभ्यासमकुर्वन्।[40] मुण्डकोपनिषदि अभिहितम् यत् ये तपसो श्रद्धायाश्चानुपालनं विदधति अरण्ये च वसन्ति ते हि अनागसो भूत्वा अमृतमुपगच्छन्तीति।[41] वेदवचनानुसारं देवा अपि तस्यैव सख्यं कुर्वन्ति यो हि तपः श्रमं वा अनुष्ठीय स्वकर्तव्यपालनं कृतवान्।[42]

**गुरुशिष्ययोः आदर्शसम्बन्धार्थं गुरुकुलीया शिक्षा-**

वर्तमानशिक्षाप्रणाल्यां या गुरुशिष्ययोः सम्बन्धेषु कटुता दुष्प्रवृत्तयश्च

आगताः तेषां परिहाराय गुरुकुलीया शिक्षाप्रणाली एव सर्वोत्कृष्टो मार्ग अवलोक्यते। यतोहि गुरुकुलशिक्षाप्रणाल्यां गुरुशिष्ययोः सम्बन्धः अपि आदर्शभूतः। यावच्छिष्यस्य हृदये गुरुं प्रति निष्ठाऽचला न स्यात् तावच्छिक्षणस्य साफल्यं न सम्भवतीति निश्चप्रचमेव। अत एव वैदिकाचार्याः प्रतिपादयन्ति यत् शिष्याः गुरून् पितराविव आदरभावेन उपगच्छेयुः न हि विद्या तं छात्रं रक्षति यो गुरौ न श्रद्धधाति।[43] एवमेव शिक्षकः दिव्यगुणोपेतः दक्षः प्रशस्तश्च स्यादित्यपि वैदिको निर्देशः।[44] स हि विवेकी, तेजस्वी, मनस्वी, तपस्वी भूत्वैव शिक्षितुमर्हति।[45] यतो हि गुरुकुलीया शिक्षा वैदिक्याः शिक्षायाः एव अङ्गभूता तथा च वैदिक्याः शिक्षायाः चरमं लक्ष्यं तु अमृतत्त्वमेव, तस्य अमृतत्त्वस्य सिद्धये त एव आचार्याः सक्षमाः ये न केवलं श्रोत्रिया अपि तु ब्रह्मनिष्ठाः अपि स्युः।[46] वस्तुतस्तु ईदृशाः ब्रह्मनिष्ठावन्तः आचार्या एव ब्राह्मणाः येषां तपो ज्ञानम्[47] इति कथितम्।

वैदिक्यां शिक्षायाम् ऋषिपदभाक् स एव, यो मनुष्याणां हितकामनया कर्म कुरुते।[48] अत एव वैदिकर्षीणां दृष्ट्या शिक्षायाः मूलादर्शा अपि मानवतायाः मङ्गलप्रेरणया अनुप्राणिताः भवेयुः। न केवलं सैद्धान्तिकः सूचनासङ्ग्रहः अपितु मानवीयादर्शान् प्रति उद्बोधनम्[49] वैदिक्याः शिक्षायाः सर्वोच्चं वैशिष्ट्यम्। मनुष्यमात्रं प्रति सौहार्द्रसद्भावमित्रव्यवहारस्य विस्तारः[50] संसारे च सर्वत्र शान्तिः साम्मनसः सहयोगस्य च प्रसारः[51] वैदिकर्षीणां सर्वासु प्रार्थनासु काम्यते। अनेन वक्तुं शक्यते यत् अखण्डव्यक्तित्वनिर्माणस्य या प्रक्रिया वैदिक्यां शिक्षायां बीजत्वेन समाविष्टा तस्योद्भावनं प्रासङ्गिकतया पर्यालोचनं, ततश्च वर्तमानशिक्षापद्धतौ तस्याः सम्मेलनम् अद्यत्वे अनिवार्यं येन आधुनिकी शिक्षा न केवलं 'भुक्तये' अपितु मुक्तये स्यात्। तस्याञ्च जीवनमूल्यानां मानवीयसम्बन्धानां, परिवेशपोषण-भावात्मकसन्तुलनत्व-सिद्धान्त-व्यवहार- समन्वयानामपि समावेशो भूयात्। तदैवास्माकं शिक्षा अर्थवती न तु केवलमर्थकरी भविष्यति। तदैव चेयं वैदिकी प्रार्थना फलवती भविष्यति- ''शिक्षाणो अस्मिन् पुत्रहुत! यामनि जीवाज्योतिरशीमहि।।'' इति।[52]

**संदर्भाः -**


1. *''विद्ययामृतमश्नुते।'', ईशोपनिषद्, 14; मनुस्मृतिः, 12/104.*
2. *''शिक्षा घ्राणं तु वेदस्य।'', पाणिनीयशिक्षा, 14.*

3. ऋग्वेदादिभाष्यभूमिका, सायणाचार्यविरचिता।
4. ''पुराणन्यायमीमांसाधर्मशास्त्रङ्गमिश्रिताः।
 वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश।।'', याज्ञवल्क्यस्मृतिः, 1/3.
5. ''नूनं सा ते प्रतिवरं जरित्रे दुहीयादिन्द्रदक्षिणा मघोनी।
 शिक्षास्तोतृभ्यो भाति धग्भगो नो बृहद्वदेम विदथे सुवीराः।।''ऋग्वेदसंहिता, 2/16/09
6. स्वमन्तव्यामन्तव्ये, सत्यार्थप्रकाशः, महर्षिदयानन्दसरस्वतीविरचितः।
7. ऋग्वेदसंहिता, 3/62/10.
8. सत्यार्थप्रकाशः, महर्षिदयानन्दसरस्वतीविरचितः, द्वितीयसमुलासः, पृ. 34.
9. तत्रैव, पृ.34.
10. तत्रैव, पृ. 34.
11. तत्रैव, पृ. 37.
12. तत्रैव, पृ. 37.
13. तत्रैव, पृ. 37.
14. तत्रैव, पृ. 37.
15. तत्रैव, पृ. 38.
16. तत्रैव, पृ. 38.
17. तत्रैव, पृ. 39.
18. तत्रैव, तृतीयसमुल्लासः, पृ. 40.
19. तत्रैव, पृ. 40.
20. तत्रैव, पृ. 40.
21. तत्रैव, पृ. 40.
22. तत्रैव, पृ. 40.
23. तत्रैव, पृ. 42.
24. यजुर्वेदसंहिता, 40/12.
25. मुण्डकोपनिषद्, 1/1/5.
26. ''यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुः त एव समासते।'',
 ऋग्वेदसंहिता, 1/164/136.
27. ''स्थाणुरयं भारहारः किलाभूदधीत्य वेदो न विजानाति योऽर्थम्।'' निरुक्तम् , 1.
28. छन्दोग्योपनिषद्, 7/1/3.
29. बृहदारण्यकोपनिषद्, 5/3/1.

*30. ''युवा सुवासा परिवीत आगात्सः उ श्रेयान्भवति जायमानः ।*
*तं धीरासः कवचः उन्नयन्ति स्वाध्यो मनसा देवयन्तः ।।'', ऋग्वेदसंहिता, 3/8/4.*

*31. ''आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः ।'', अथर्ववेदसंहिता, 1/3/5.*

*32. ऋग्वेदसंहिता, 7/103/1.*

*33. ''मौषधीहिंसीः ।, यजुर्वेदसंहिता, 6/22, औषधेत्रायस्व ।, तत्रैव, 4/1, सुमित्रीया न आप ओषधय सन्तु ।'', तत्रैव, 36/23.*

*34. ''द्यौर्मे पिता जनिता नाभिरत्र बन्धुर्मे माता महीयम् ।'', ऋग्वेदसंहिता, 1/164/33.*

*35. ''समानी प्रपा सहवोऽन्नभागाः ।'', अथर्ववेदसंहिता, 3/30/6; ''सग्धिश्च मे सपीतिश्च मे ।'', यजुर्वेदसंहिता 18/9.*

*36. निरुक्तम्, 1/2/3.*

*37. यजुर्वेदसंहिता, 6/14.*

*38. ''ब्रह्मचर्येण तपसा देवा मृत्युमुपाघ्नतः ।'', अथर्ववेदसंहिता, 11/5/19.*

*39. ''मनसश्चेन्द्रियाणां चौकार्ग्य परमं तपः ।'', महाभारतम्, शान्तिपर्व, 290/4.*

*40. ''श्रमेण लोकास्तपसा पिपर्ति ।'', मुण्डकोपनिषद्, 1/2/11.*

*41 ''तपः श्रद्धे ये ह्युपवसन्ति अरण्ये ।'', तत्रैव, 1/2/11.*

*42. ''न ऋते श्रान्तस्य सख्याय देवाः ।'', ऋग्वेदसंहिता, 4/33/11.*

*43. ''अध्यापिता ये गुरुं नाद्रियन्ते विप्रा वाचा मनसा कर्मणा वा ।*
*यथैव ते न गुरोर्भाजनीयास्तथैव तान्न भुनक्ति श्रुतं तत् ।।'' निरुक्तम्, द्वितीयोध्यायः ।*

*44. ''इमां धियं शिक्षमानस्य देव क्रतुं दक्षं वरुण सं शिशाधि ।*
*ययाति विश्वा दुरिता तरेम सुतर्माणमधि नावं रुहेम ।।'', ऋग्वेदसंहिता,. 11/37.*

*45. ''सं सीदस्व महाँ अभि शोचस्व देववीतमः ।*
*विधूममग्ने अरुषं मियेध्य सृज प्रशस्तदर्शतम् ।।'', यजुर्वेदसंहिता, 11/37.*

*46. मुण्डकोपनिषद्, 1/2/12-13.*

*47. ''ब्राह्मणस्य तपो ज्ञानम् ।'', मनुस्मृतिः, 11/236.*

*48. ''ऋषिः स यो मनुर्हितः ।'', ऋग्वेदसंहिता, 10/26/05.*

*49. ''मनुर्भव ।'', ऋग्वेदसंहिता, 10/26/6.*

*50. ऋग्वेदसंहिता, 6/76/14; यजुर्वेदसंहिता, 29/51.*

*51. अथर्ववेदसंहिता, 3/30/4, तथा 19/15/6; ऋग्वेदसंहिता, 10/91.*

*52. ऋग्वेदसंहिता, 7/32/26.*

●●●

# 5

# न्यायव्याकरणदर्शनयोः प्रथमार्थनिरूपणम्

*राहुलशर्मा*

शब्दानुशासकाः वैयाकरणाः। व्याकरणस्मृतौ शब्दानामेव साधुत्वासाधुत्वविचारः विलसति। अत्र व्याकरणशास्त्रे शब्दानां साधुत्व-समीक्षणमस्ति तेषाञ्च शब्दानाम् असंख्यत्वात् प्रत्येकस्य उच्चारणपूर्वकं साधुत्वबोधनमसम्भवम्। उक्तञ्च- ''बृहस्पतिश्च प्रवक्ता इन्द्रश्च अध्येता नान्तं जगाम'' इति। अतोऽत्र भगवता पाणिनिना महता प्रयत्नेन प्रकृति-प्रत्यय-विभाग-पूर्वकम् अनन्तशब्दानां साधुत्वं सारल्येन लाघवेन च अस्मत्कृते बोधितम्। तत्र सुप्तिङ्कृत्तद्धित-स्त्रीप्रत्ययादिभेदेन प्रत्ययाः नानाविधाः सन्ति। तेषु विभक्तिसंज्ञकाः प्रत्ययाः त्रिधा विभक्ताः सन्ति- सुप्प्रत्ययाः, तिङ्प्रत्ययाः प्राग्दिशीयप्रत्ययाश्च। एतेषु प्रत्ययेषु सुप्प्रत्ययाः तिङ्प्रत्ययाश्च ''विभक्तिश्च''[1] इत्यनेन सूत्रेण विभक्तिसंज्ञकाः, प्राग्दिशीयाश्च प्रत्ययाः ''प्राग्दिशो विभक्तिः''[2] इत्यनेन सूत्रेण विभक्तिसंज्ञकाः भवन्ति। विभक्तिसंज्ञकेषु प्रत्ययेषु प्रथमादिभेदेन सप्तसुप्प्रत्ययाः सन्ति तद्यथा- स्वौजस् इति प्रथमा, अमौट्शस् इति द्वितीया, टाभ्याम्भिस् इति तृतीया, ङेभ्याम्भ्यस् इति चतुर्थी, ङसिभ्याम्भ्यस् इति पञ्चमी, ङसोसाम् इति षष्ठी, ङ्योस्सुप् इति सप्तमी। तत्र तेषु प्रत्ययेषु अस्मिन् प्रबन्धे न्यायव्याकरणदर्शनयोः स्वौजस् इति प्रथमायाः अर्थावबोधनं प्रतिपाद्यते।

**न्यायदर्शनानुसारेण प्रथमार्थनिरूपणम्–**

सर्वेषु दर्शनेषु शाब्दबोधप्रक्रिया विवेचिता दृश्यते। विशिष्य प्रमाणशास्त्रे न्यायदर्शने विलक्षणा गभीरा च शाब्दबोधप्रक्रिया प्रतिभाति। अत्र दर्शने शाब्दबोध प्रक्रियानिरूपणावसरे नैयायिकमूर्धन्यैः प्रकृतिप्रत्ययानाम् अर्थः निरूपितोऽस्ति। अत्र प्रत्ययार्थसन्दर्भे नैयायिकादीनां विशेषाग्रहो विलोक्यते। प्रथमादिसंज्ञकानां

सुप्प्रत्ययानाम् अर्थनिरूपयन्गदाधरः व्युत्पत्तिवादे प्रथमार्थसन्दर्भे मतद्वयं प्रत्यपादयत्- एकं संसर्गतावादिमतम् अपरं प्रकारतावादिमतम्। गदाधरेण विशेष्यवाचकपदोत्तरविभक्तेः सङ्ख्यार्थकत्वं सर्वेषां मते अङ्गीकृतम् अस्ति। किन्तु विशेषणवाचकपदोत्तरसुब्विभक्तेः साधुत्मेवार्थकत्वं संसर्गतावादिनये प्रतिपादितम्। तथा चोक्तं प्रथमार्थनिरूपणप्रसङ्गे- ''नीलं घटमानय इत्यादौ नीलादेर्घटादावन्वयोपगमे नीलादिपदोत्तरविभक्त्यर्थकर्मत्वादेः कुत्रान्वय? इति चेत्, न कुत्रापि, विभक्तिपदं साधुत्वार्थमेव प्रयुज्यते''[3] इति। पुनश्च प्रकारतावादिनये विशेषणविभक्तेः अभेदार्थकत्वं स्वीकृतम्, उक्तञ्च[4]- ''अभेद एव वा विशेषणविभक्तेः अर्थः, अभेदस्य संसर्गमर्यादयाभानं तु समासस्थले एव, तत्र लुप्तविभक्तेरनुसंधानं विनापि शाब्दबुद्धेरानुभविकत्वादित्यपि वदन्ति'' इति। एतेन न्यायनये विशेष्यवाचकपदोत्तरप्रथमाविभक्तेः सङ्ख्या एवार्थ उभयमते। किन्तु विशेषणवाचकपदोत्तरप्रथमाविभक्तेः सन्दर्भे मतद्वयं राजते- संसर्ग अभेदश्च। एवञ्च ''नीलो घटः'' इति वाक्ये संसर्गतावादिनये अभेदसम्बन्धेन नीलविशिष्टैकत्व विशिष्टघट इति बोधः। प्रकारतावादिनये नीलाभिन्नैकत्वविशिष्टघटः इति बोधः। एवञ्च मतद्वयेऽपि संख्यैव प्रथमाविभक्त्यर्थः इत्यन्ते साधितम्। तथा चोक्तम्-''प्रत्ययाश्च विभक्तिकृत्तद्धितादिभेदेन नानाविधाः। विभक्तिश्च सुप्तिङ्भेदेन द्विविधा। सुब्विभक्तयः प्रथमाद्वितीयादयः सप्त। तत्र प्रथमार्थः प्रकृत्यर्थे विशेषणविधयान्वयिनी संख्यैव, अत एव यत्र विशेष्यवाचकसमानविभक्तिपदं निपातपदं वा नास्ति, तत्र प्रथमान्तार्थस्य विशेष्यभासकसामर्थ्यभावात् असौ मुख्यविशेष्यतयैव भासते। संख्यावाचकानां चैकवचनद्विवचनबहुवचनानाम् एकत्वत्वद्वित्वत्वबहुत्वात्वावच्छिन्नेषु शक्तिः।''[5] अत्र शक्तता एकवचनत्वावच्छिन्ना द्विवचनत्वावच्छिन्ना बहुवचनत्वावच्छिन्ना च नाङ्गीकृता। अपितु सुत्वौत्वजस्त्वादिनैवाङ्गीकृता एकवचनादेः परिभाषयितुमशक्यत्वात्। यतः एकत्वादिवाचकत्वम् एकवचनत्वमित्यङ्गीकारे आत्माश्रयः वाचकतायाः शक्ततारूपत्वात्। बोधकतारूपं वाचकत्त्वञ्चेत् तदातिप्रसङ्गः शक्तिभ्रमेण द्विवचनादीनामपि एकत्वबोधनात्। न चैकवचनत्वं जातिविशेषः इति वाच्यम्, सुत्वादिना एकवचनत्वादीनां साङ्कर्यात्। शक्तिसम्बन्धेन एकवचनादिपदवत्वम् एकवचनत्वञ्चेत् तदा तादृशाज्ञानदशायां सुत्वादिना शक्तिभ्रमादेव शाब्दबोधः वर्णनीयः। एकवचनादिशब्दस्य शब्दद्वयात्मकतया तादृशशब्दसमुदायशक्तेः

अप्रसिद्धिरिति नापादनीयम्। एकं वक्ति इत्यादिविग्रहेण एकवचनादिशब्दस्य स्वादिबोधकत्त्वे एकादिशब्देऽपि एकवचनादिव्यवहारापत्तिः। एकवचनादिशब्दानां स्वादिविभक्तौ रूढिस्तु वक्तुरशक्या। ग्रन्थकारीयसङ्केतेनैव सूपपत्तौ एकवचनादिशब्दे शक्तेः अत्राप्रामाणिकत्वात्। अतः अगत्या तत्तदानुपूर्वी एव शक्ततावच्छेदकी।

वैयाकरणैः सङ्ख्याया अपि प्रातिपदिकार्थत्वम् अङ्गीकृतम्। तच्च नैयायिकानभिमतम्। तथा चोक्तम्[6]- ''यत्तु सङ्ख्यापि प्रकृतेरर्थः, एकवचनादिकञ्चैकत्वाद्यर्थे तात्पर्यग्राहकमेव, न चैवमेकप्रकृत्युपस्थाप्ययोरर्थयोः परस्परमन्वये आकाङ्क्षादिविरहाद् घटादावेकत्वाद्यन्वयानुपपत्तिः, अन्यथा हर्यादिपदादुपस्थितयोरश्वसूर्ययोराधाराधेयभावेनान्वयापत्तिः, घटादिपदस्यैकत्वादि-विशिष्टघटादौ च न शक्तिसंभवः, ''घटरूपं पश्य'' इत्यादौ सङ्ख्यानवच्छिन्न-घटादेरेवान्वयबोधादिति वाच्यम्, आकाङ्क्षावैचित्र्यादेक प्रकृत्युपस्थाप्ययोरपि घटैकत्वयोः परस्परमन्वयसंभवात्'' इति।

संख्या च प्रकृत्यर्थे पर्याप्तिसम्बन्धेनान्वेति, न तु समवायदि-सम्बन्धेन। समवायादिसम्बन्धेन संख्यायाः प्रकृत्यर्थे अन्वयाङ्गीकारे एकव्यक्तिबोधकात् आकाशशब्दादपि द्विवचनबहुवचनादेः उत्पत्तिः स्यात् तत्तदर्थयोः द्वित्वबहुत्वयोः आकाशाद्यन्वययोग्यत्वात्। तथा चोक्तम्-''सङ्ख्यायाश्च प्रकृत्यर्थे पर्याप्तिसम्बन्धेनैव विशेषणत्वं न तु समवायादिना''[7]।

**नैयायिकमते सम्बोधनप्रथमार्थः -** नैयायिकमते ''समीहितं बोधनं सम्बोधनम्'' इति व्युत्पत्यनुसारेण सम्बोधनप्रथमा इच्छाज्ञानयोः खण्डशः शक्तिरङ्गीकृता तथा चोक्तं गदाधरेण[8] ''सम्बोधनं बोधोद्देश्यकेच्छा, तत्र ज्ञानमिच्छा च खण्डशः प्रथमार्थः'' इति। एवञ्च विभक्तिज्ञाने प्रकृत्यर्थस्य समवायसम्बन्धेन इच्छायाश्च विषयतासम्बन्धेन, इच्छा च उपस्थितत्वात् वक्तुरेव ग्राह्या ज्ञानस्य च प्रवर्तनाविषयमत्कर्मकरक्षणादिरूपवाक्यार्थे विषयतासंसर्गेणान्वयो भवति, तेन ''राम मां पाहि'' इत्यादिस्थले वाक्यार्थः संपद्यते- विषयप्रयोक्तीच्छारामसमवेतज्ञान-विषयमत्कर्मकप्रवर्तनाविषयरक्षणजनक कृतिमांस्त्वम् इति। वैयाकरणनये तु रामनिष्ठोद्देश्यताविषयः मदभिन्नैकत्वसङ्ख्या-विशिष्टाश्रयनिष्ठदुःखनिवृत्त्यनुकूलः त्वदभिन्नैकत्व-विशिष्टाश्रयनिष्ठो व्यापारः इति शाब्दबोधः।

**व्याकरणदर्शनानुसारेण प्रथमार्थनिरूपणम् –**

''न केवला प्रकृतिः प्रयोक्तव्या न च केवलप्रत्ययः''[9] इति भाष्योक्त नियमानुसारेण प्रकृतिप्रत्ययविशिष्टानाम् एव प्रयोगः लोके दृश्यते। सुप्प्रत्ययानां प्रकृतिः ''अर्थवदधातुरप्रत्ययः प्रातिपदिकम्''[10] ''कृत्तद्धितसमासाश्च''[11] इत्युभाभ्यां सूत्राभ्यां प्रातिपदिकसंज्ञका नामरूपा प्रकृतिः।

ताभ्यः विहिताः सुप्प्रत्ययाः एकविंशतिसंख्याकाः सन्ति। एवञ्च ''स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्य- स्ङसिभ्याम्भ्यस्ङसोसामङ्योस्सुप्''[12] इत्यनेन पाणिनिसूत्रेण तेषां विधानं भवति। तेषामेव प्रत्ययानां ''विभक्तिश्च''[13] इत्यनेन सूत्रेण विभक्तिसंज्ञा विधीयते। तत्र तासां विभक्तीनां प्रथमात्वादिधर्मेण यो विभागः दरीदृश्यते तत्तु प्राचां सम्मतमेव न तु पाणिनिकृतेन केनचित्सूत्रेण प्रथमादिसंज्ञा। पुनश्च विभक्तिविभाजकानां प्रथमात्वादिधर्माणामपि एकवचनत्वादिना विभागः कृतः। तदपि प्राच्यकृतमेव किन्तु तत्र पाणिनिरपि द्वाभ्यां सूत्राभ्यां ''द्व्येकयोर्दिवचनैकवचने''[14] ''बहुषु बहुवचनम्''[15] इत्याभ्यां एकवचनत्वं द्विवचनत्वं बहुवचनत्वञ्चावबोधयति। किन्तु एतावन्मात्रेण वेदे लोके वा प्रत्ययान्तानां प्रयोगः दारुणः। रामः गच्छति ग्रामम् इत्यस्य स्थाने रामेण रामाय रामात् रामस्य रामे वा गच्छति ग्राममिति प्रयोगापत्तिः स्यात्,तेषु प्रत्ययेषु निर्णायकस्यार्थविशेषस्याभावात्। अतस्तेषां प्रथमादिसंज्ञकानां प्रत्ययानां एकवचनत्वादि-अर्थातिरिक्तः कश्चिदर्थविशेषः कर्तृकर्मादिरूपः पाणिनिकृतायां सूत्राष्टिकायां तत्तच्छास्त्रेषु लसति। तेष्वादौ प्रथमाविभक्तेः सु-औ-जस् इत्येतेषामर्थः विवेच्यते-

''प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा''[16] इत्यनेन सूत्रेण प्रथमार्थः कथितः। अत्र सूत्रे ''घटितबुद्धौ घटकज्ञानकारणं'' ''वाक्यार्थज्ञाने पदार्थज्ञानकारणं'' वेति नियमेन पदकृत्यपूर्वकम् अर्थकृते लभ्यते प्रातिपदिकार्थः एव प्रथमार्थः। एवञ्च नाम्ना यदा नामार्थः (प्रातिपदिकार्थः) एव विवक्षितः तदा प्रथमान्तः साधुः। तथा चोक्तम् आचार्यनागेशेन- ''सूत्रमते तु कर्तृकर्माद्यर्थकप्रत्ययेन कर्त्रादेरुक्तत्वात् प्रथमायाः प्रातिपदिकार्थ एवार्थः''[17] स चार्थः कः ? इति प्रश्ने सन्ति बहूनि मतानि। एकं द्विकं त्रिकं चतुष्कं पञ्चकं वेति। तेषु व्यक्तिपक्षः जातिपक्षः प्रवृत्तिनिमित्तपक्षः इत्यादयः पक्षाः लसन्ति। उक्तञ्च - ''एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा। नामार्थ इति सर्वेऽमी पक्षाः शास्त्रे निरूपिताः''[18]। तथाहि इदं

सिद्धान्तं सर्वसम्मतं प्रतिभाति, यदेतेष्वर्थेषु प्रथमा विभक्तिः विहिताऽस्ति। प्रथमार्थविषये वार्तिककाराः अभिहितकारकत्वमेव प्रथमार्थम् इत्यङ्गीकुर्वन्ति। तथा च उक्तं नागेशेन - ''तत्रोक्ते तु कारक-मात्रे प्रथमेव, तिङ्समानाधिकरणे प्रथमा, अभिहिते प्रथमा इति वार्तिकद्वयात्''[19]।

**व्याकरणमते सम्बोधनप्रथमार्थनिरूपणम्-**

सम्बोधनप्रथमायाः अर्थनिरूपणे भाष्यकृता मौनमेवाचरितम्। किन्तु पाणिनिना ''सम्बोधने च''[20] इति सूत्रेण सम्बोधने प्रथमा विधानात् सम्बोधनमेव सम्बोधन प्रथमार्थ इति स्वीकृतम्। तत्र जिज्ञासा समुदेति- किन्नाम सम्बोधनम् इति? सम्बोधनञ्च क्रियासु विनियोगफलकोऽभिमुखीभावः हर्य्यपि अत्र ''सिद्धस्याभिमुखी भावमात्रं सम्बोधनं विदुः। प्राप्ताभिमुखो ह्यर्थात्मा क्रियासु विनियुज्यते'' इत्याह। अस्य सम्बोधनस्य च क्रियायां प्रकारतयैवान्वयः। उक्तञ्च हरिणा-

**सम्बोधनपदं यच्च, तत् क्रियायां विशेषणम्।**
**व्रजानि देवत्तेति, निघातोऽत्र तथासति।।**[21]

**न्यायव्याकरणयोः प्रथमार्थस्य युक्तायुक्तत्व-निरूपणपूर्वकं स्वमतोपस्थापनम् -**

प्रातिपदिकमुद्दिश्य सुप्रत्ययानां विधानं जायते। इमे च प्रत्ययाः ''ङ्याप्प्रातिपदिकादि''[22] त्यधिकारे पठितेन ''स्वौजसमौडिति''[23] सूत्रेण विधीयन्ते। एतेषां स्वादिप्रत्ययानामर्थनिरूपणं भगवता पाणिनिना ''प्रातिपदिकार्थलिङ्ग-परिमाणवचनमात्रे प्रथमा''[24] ''कर्मणि द्वितीया''[25] इत्यादिभि नैकैः सूत्रैः कृतं वर्तते। भगवत्पाणिनिप्रणीतवचनमाधारीकृत्य कौण्डभट्टप्रभृतिभिः वैयाकरणैः वैयाकरणभूषणसारग्रन्थादिषु महता समारम्भेण सुबर्थो विचारितः। अतः सुबर्थविषयकं वैयाकरणसिद्धान्तं स्पष्टयन्नैयायिकादिमतविवचनञ्च प्रयतते – तत्र प्रथमादिषु विभक्तिषु प्रथमां विहाय द्वितीयादिविभक्तीनामर्थविशेषः कौण्डभट्टेन विचारितः। प्रथमाविभक्त्यर्थविषये कौण्डभट्टः मौनमाचरति। किन्तु ''प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा'' ''सम्बोधने च''[26] इत्यादि सूत्राभ्यां प्रातिपदिकार्थादिरेव प्रथमाविभक्तेरर्थः। उक्तञ्च भट्टनागेशेन- ''सूत्रमते तु कर्तृकर्माद्यर्थकप्रत्ययेन कर्त्रादेरुक्तत्वात् प्रथमायाः प्रातिपदिकार्थः एवार्थः प्रथमावाच्यः प्रातिपदिकार्थश्च व्यक्तिरूपः''[27] इति। किन्तु प्रातिपदिकार्थस्य प्रातिपदिके नैव लाभात् तत्र प्रथमाविभक्तिः केवलं तात्पर्यग्राहिका इति।

वार्तिककारमते तु प्रथमायाः अभिहितकारकत्वमेवार्थः। ''तिङ्समानाधिकरणे-प्रथमा''[28] ''अभिहिते प्रथमा''[29] इति वार्तिकद्वयात्। इत्थं पाणिनीयमतापेक्षया वार्तिकमतमेव युक्तम्। तथा चोक्तम् - ''तिङ्निपाता- भिहितकर्तृत्वकर्मत्वयोरेव प्रथमार्थत्वात्''[30] इति। प्रातिपदिकार्थस्तु प्रकृत्या एव लब्धः अतस्तत्र तात्पर्यग्राहकत्वमेव प्रथमायाः। नैयायिकास्तु प्रातिपदिकार्थस्य प्रथमाविभक्त्यर्थत्वं नाङ्गीकुर्वन्ति। ''रामो राजा'' इत्यादौ प्रातिपदिकार्थरूपव्यक्तेः प्रातिपदिकेनैव लाभात्। उक्तञ्च गदाधरभट्टाचार्येण - ''रामो राजेत्यादौ व्यक्तेः प्रातिपदिकात् प्रकृत्या लाभात् कथं प्रथमार्थत्वमिति[31]। न च जातिपक्षे रामत्वादिजातेः प्रतिपादिकेन लाभेऽपि व्यक्तेः प्रथमात्वमस्त्विति वाच्यम्, व्यक्तिरूपस्य प्रातिपदिकार्थस्याऽपि प्रकृत्यंशेन लक्षणया आक्षेपाद्वा बोधसंभवात्। अतः प्रातिपदिकार्थस्य जातिपक्षेऽपि प्रथमावाच्यत्वं न संभवति। नैयायिकमते विशेष्यवाचकपदोत्तरप्रथमायाः अभेदोऽर्थः संसर्गतावादिमते तु विशेषणवाचकपदोत्तरविभक्तेः न कोऽप्यर्थः। सति तात्पर्ये क्वचिद्वेदाः प्रमाणमित्यादौ विशेषणवाचकपदोत्तरविभक्तेरपि संख्यार्थकत्वम् अङ्गीक्रियते। अत एव ''यत्र विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्या-विरुद्धसंख्याया अविवक्षितत्वं तत्र विशेष्यविशेषपदयोः समानवचनकत्वनियमः''[32] इति। सम्बोधनप्रथमायास्तु ''सम्बोधने च'' इति सूत्रेण सम्बोधनमेवार्थः। सम्बोधन्नाम नागेशमते अभिमुखीभावः। उक्तञ्च भर्तृहरिणा –

**सिद्धस्याभिमुखीभावमात्रं सम्बोधनं विदुः।**
**प्राप्ताभिमुखो ह्यर्थात्मा क्रियासु विनियुज्यते।।**[33]

सम्बोधनं न वाक्यार्थः इति वृद्धेभ्यः आगमः इति दीक्षितमते सम्बोधनमभिमुखीकरणं, किन्तु भर्तृहर्यादिसम्मतत्वात् नागेशमतमेव युक्तम्। मीमांसकाः अपि सम्बोधनप्रथमायाः सम्बोधनमेवार्थमङ्गीकुर्वन्ति। उक्तञ्च खण्डदेवेन[34]- ''वस्तुतस्तु अस्मन्मतेऽपि चैत्र मैत्रः पचतीत्यादौ चैत्रस्य कर्तृत्वेन भावनान्वयस्य निवारयितुमशक्यत्वात् सर्वत्र सम्बोधनमेव प्रथमायाः अर्थः न तु कर्तृत्वमपीति। नैयायिकास्तु समीहितं बोधनं सम्बोधनमिति सम्बोधनपदव्युत्पत्या सम्बोधनप्रथमायाः इच्छाज्ञानयोः खण्डशः शक्तिं स्वीकुर्वन्ति।

प्रथमाविभक्तेः कारकत्वमस्ति न वा इत्यत्र महान् विवादः। नागेशभट्टस्तु प्रथमायाः कारकत्वं कण्ठरवेण प्रोक्तम् - ''इदमपि सूत्रं क्रियायोग एव प्रवर्तते

अन्ततो अस्तिक्रियायाः सर्वत्र सत्वादिति। आख्यातार्थकर्त्रादिना अभेदान्वयेन तद्द्वारा क्रियायोगो बोध्यः''[35]। प्रथमान्तार्थस्यापि क्रियाजनकत्वात् अस्याः कारकविभक्तित्वेन भाष्ये व्यवहारः इति। प्रथमार्थस्य कारकत्वे ''अभिहिते प्रथमा'' ''तिङ्समानाधिकरणे प्रथमा'' इति वचनद्वयमपि मानम्। तथा च तिङ्सामानाधिकरण्यन्नाम् ''तिङ्वाच्यकारकवाचकत्वम्''। प्रथमार्थस्य कारकत्वे सहयुक्तेऽप्रधाने इति सूत्रस्थम् अप्रधानग्रहणस्य अनर्थकत्वप्रतिपादनपरं भाष्यमपि मानम्। तथा चोक्तं - ''सहयुक्तेऽप्रधानवचनमनर्थकम्। किं कारणम्? उपपदविभक्तेः कारकविभक्तेर्बलीयस्त्वात्। अन्यत्राप्युपपदविभक्तेः कारकविभक्तिर्बलीयसी इति प्रथमा भवति''[36] इति।

अस्मिन्निबन्धे संक्षेपतः वैयाकरणनैयायिकसम्मताः प्रथमाविभक्त्यर्थ विषयकाः सिद्धान्ताः उपन्यस्ताः। एषु मतेषु वैयाकरणमतमेव ज्यायत् मुनित्रयसम्मतत्वात्। यतो हि नैयायिकाः विशेष्यवाचकपदोत्तरविभक्तेः संख्यार्थकत्वं विशेषणवाचकपदोत्तरविभक्तेः सत्त्यां विवक्षायां संख्यार्थकत्वम् असत्त्यां विवक्षायां विशेषणवाचकपदोत्तरविभक्तेः संसर्गतावादिमते साधुत्वार्थकत्वं, प्रकारतावादिमते च अभेदार्थकत्वमामनन्ति। तत्र एकत्वस्य द्योत्यत्वेन वाच्यत्वेन वा प्रथमाविभक्त्यर्थत्वं ''बहुषु बहुवचनम्''[37] ''द्व्येकयोर्द्विवचनैकवचने''[38] इति सूत्राभ्यां प्रामाणिकम्। किन्तु अभेदस्य प्रथमाविभक्त्यर्थत्वं व्याकरणस्मृतिविरुद्धम्। यतः भगवता पाणिनिना प्रथमाविभक्त्यर्थविधायकं सूत्रद्वयं प्रणीतम्। ''प्रातिपदिकार्थलिङ्ग-परिमाणवचनमात्रे प्रथमा'' सम्बोधने च'' इति। आभ्यां सूत्राभ्यां पञ्चसु अर्थेषु प्रथमाविभक्तिर्विधीयते। एषु पञ्चसु अर्थेषु अभेदस्य अवकाशो नास्ति। अतः प्रथमाविभक्तेः अभेदार्थकत्वं न युक्तं मुनिवचनविरोधात्। पुनः सम्बोधनविभक्ति-विषये सम्बोधनमर्थः तैः वर्णितः। किन्तु सम्बोधनस्य स्वरूपम् अन्यथैव भणितम्। अतः प्रथमाविभक्त्यर्थविषये वैयाकरणमतमेव ज्यायत् इतिदिक्।

**संदर्भ –**


1. *पाणिनिसूत्रम्, 1/4/104*
2. *पाणिनिसूत्रम्, 5/3/1*
3. *व्युत्पत्तिवादः, गदाधरभट्टः, पृ. सं. 31*

4. व्युत्पत्तिवादः, गदाधरभट्टः, पृ. सं. 31
5. व्युत्पत्तिवादः, गदाधरभट्टः, पृ. सं. 90
6. व्युत्पत्तिवादः, गदाधरभट्टः, पृ. सं. 95
7. व्युत्पत्तिवादः, गदाधरभट्टः, पृ. सं. 102
8. व्युत्पत्तिवादः, गदाधरभट्टः, पृ. सं. 189
9. महाभाष्यम्, पा. सू. 1/2/64 पृ.सं. 75
10. पाणिनिसूत्रम्, 1/2/45
11. पाणिनिसूत्रम्, 1/2/46
12. पाणिनिसूत्रम्, 4/1/2
13. पाणिनिसूत्रम्, 1/1/014
14. पाणिनिसूत्रम्, 1/4/22
15. पाणिनिसूत्रम्, 1/4/21
16. पाणिनिसूत्रम्, 2/3/46
17. परमलघुमञ्जूषा, कारकविचारः, पृ.सं. 91
18. नामार्थनिर्णयः का. सं. 25, वैयाकरणभूषणसार
19. परमलघुमञ्जूषा, कारकविचारः, पृ.सं. 91
20. पाणिनिसूत्रम्, 2/3/47
21. परमलघुमञ्जूषा, कारकविचारः, पृ.सं. 92
22. पाणिनिसूत्रम्, 4/1/1
23. पाणिनिसूत्रम्, 4/1/2
24. पाणिनिसूत्रम्, 2/3/46
25. पाणिनिसूत्रम्, 2/3/2
26. पाणिनिसूत्रम्, 2/3/47
27. परमलघुमञ्जूषा, कारकविचारः, पृष्ठ 91
28. वार्तिकं-प्रातिपदाकार्थ. इति सूत्र महाभाष्यम्.
29. वार्तिकं-प्रातिपदाकार्थ. इति सूत्र महाभाष्यम्.
30. भाट्टतन्त्ररहस्यम्, पृष्ठ 79
31. विभक्त्यर्थनिर्णयः पृ.24
32. व्युत्पत्तिवादे प्रथमार्थनिरूपणे

*33. वाक्यपदीय, 3 काण्ड, साधनसमुद्देशः, कारिका 163*

*34. भाट्टतन्त्ररहस्यम्, पृ. 74*

*35. लघुशब्देन्दुशेखरः, कारकप्रकरणम्*

*36. महाभाष्यम्, 2/3/19*

*37. पाणिनिसूत्रम्, 1/4/21*

*38. पाणिनिसूत्रम्, 1/4/22*

●●●

# 6

# सांख्यदर्शने प्रकृतिपुरुषयोः भेददर्शनम्

*शान्तिलाल सालवी*
*सकीना कुमारी सालवी*

वयं सर्वे जानीमः यत् भारतीयदर्शनेषु सांख्यदर्शनमतितरां प्राचीनमस्ति। सांख्यदर्शनस्य प्रतिष्ठिताः सिद्धान्ताः वेदेषु[1] एवञ्च उपनिषत्स्वपि बीजरूपेणा-वस्थिताः सन्ति। यथा-

**महतः परमव्यक्तमव्यक्तात् पुरुषः परः।**
**पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः।।**[2]

'संख्या बुद्धिर्ज्ञानम्' इति कोशवाक्यानुसारेण संख्याशब्दो ज्ञानपरः। संख्याशब्दस्य अर्थद्वयं वर्तते गणनारुपः, अपरश्चार्थः सम्यक् ख्यानमर्थात् सम्यक् ज्ञानम्। अत एव सांख्यशास्त्रस्यापरो पर्यायः ज्ञानशास्त्रं वर्तते। यथोक्तं महाभारतस्य शान्तिपर्वणि-

**संख्या प्रकुर्वते चैव प्रकृतिं च प्रचक्षते।**
**तत्त्वानि च चतुर्विंशत्तेन सांख्याः प्रकीर्तिताः।।**[3]

श्रीमद्भगवद्गीतायां प्रयुक्तः सांख्यशब्दः सम्यग्ज्ञानार्थक संख्या-शब्दा-देवनिष्पन्नोवर्तते। तद्यथा- **''एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु।''**[4] सर्वेऽपि दार्शनिकाः किमिदं जगत्? कस्मादिदं प्रावर्तिष्ट? इति जगत्तत्त्वपरीक्षणेन सह स्वीयं दर्शनविषयं निरूपयन्ति। तत्र तत्तत्दर्शनमूलप्रवर्तकस्य महर्षेरतिशयमनन- प्रसूतान् विषयान् क्रोडीकृत्य तदनन्तरं लेखकाः भाष्यवार्तिकप्रणेतारः तद् व्याख्याताराश्च मूलप्रवर्तकमहर्षेस्सिद्धान्ताऽविरोधेन स्वीयं दर्शनमुपबृंहयन्तीति वयं जानीमः। सांख्यदर्शने पञ्चविंशतितत्त्वानां सम्यक् विवेचनं वर्तते। तत्र कानिचित् तत्त्वानि केवलं कारणानि, कानिचित् च कारणानि

कार्याणि, केवलं कार्याणि च परं तत्र तत्त्वमेकम्। इत्थं एतानि सर्वाणि तत्त्वानि विलक्षणानि सन्ति। तानि तत्त्वानि कानि सन्तीत्यभिकांक्षायामाह ईश्वरकृष्णः-

**मूलप्रकृतिरविकृतिः प्रकृतिविकृतयः सप्त।**
**षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः।।**[5]

आचार्यमाठरोऽपि[6] माठरवृत्तौ अस्याः कारिकायाः व्याख्याप्रसंगे उक्तमस्ति यत्-मूलप्रकृतिः प्रधानं मूलभूतत्त्वात्। मूलं सप्तानां प्रकृतिविकृतीनामादिरित्यर्थः। प्रकरणात्प्रकृतिः। प्रसवधर्मकत्वात् सा प्रकृतिः। न विकृतिरविकृतिरन्यस्मादनुत्पत्तेः। कारणमेव सा न कार्यमित्यर्थः। अनुत्पन्नत्वादुत्पादकत्वाच्च। महदाद्यास्तु सप्त प्रकृतयो विकृतयश्च। महानहङ्कारः पञ्च तन्मात्रणि चेति सप्त प्रकृतयोऽन्येषां कारणतया, विकृतयश्च कार्यतया स्वयम्। तत्र व्यक्ति माह-प्रधानात् बुद्धिरिति विकृतिः सा च अहंकारं जनयतीति प्रकृतिः। अहंकारो महत उत्पन्न इति विकृतिः, तन्मात्राणि जनयतीति प्रकृतिः। तन्मात्राण्यहंकारादुत्पन्नानीति विकृतयः पञ्चापि ततः पञ्च महाभूतानि जायन्ते इति प्रकृतयः। उत्पन्नत्वादुत्पादकत्वाच्च सप्त ताः प्रकृतयो विकृतयश्च। तन्मात्रणि शब्दस्पर्शरूपरसगन्धाख्यानि। षोडशकस्तु पुनर्विकार एवं कार्यत्वात्। न तु तस्य प्रकृतित्वमकारणत्वात्। समासेन पञ्चविंशतितत्त्वानां विवेचनमधोलिखितानि सन्ति-

1. मूलप्रकृतिः = प्रधानम्, अव्यक्तं वा।
2. विकृतिः=16 (पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, मनः, पञ्चमहाभूतानि च।)
3. प्रकृति-विकृतिः = 7 (महत्, अहंकारः, पञ्च तन्मात्रा)
4. न प्रकृतिर्नविकृतिः = पुरुषः।

सांख्यदर्शनानुसारेण गुणत्रयस्य साम्यावस्था प्रकृतिरित्युच्यते। प्रकृतिर्जडाव्यक्तरूपा च वर्तते, सा पुरुषसंयोगमुपेत्यैव विकासमातनोति। पुरुषवत् प्रकृतिरपि अनन्तादिरहिता चास्ति। पुरुषस्य निष्क्रियत्वात् प्रकृतेर्जडत्वात् च सृष्टिकृते तयोर्द्वयोः संयोगोऽपेक्ष्यते। प्रकृतिपुरुषयोः संयोगावस्थायां प्रकृतौ क्षोभः समुत्पन्नं भवति तेन प्रवर्तते सृष्टिः। पुरुषस्य कैवल्यार्थं प्रकृतेश्च दर्शनार्थं प्रकृतिपुरुषयोः संयोगः पङ्ग्वन्धवत् अविवेककारणात् च भवति-

**पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।**

**पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः।।**[7]

इत्थं सांख्यदर्शने प्रकृतिपुरुषयोर्नित्यत्वादनयोः संयोगाश्रितो हि सर्वविधसर्गः। स्वभावतो दुःखबन्धाद्विमुक्तस्य पुरुषस्य प्रतिबिम्बरूपदुःखमोक्षार्थ प्रतिबिम्बसम्बन्धेन दुःखमोक्षार्थे वा प्रधानस्य जगत्कर्तृत्वम् अथवास्वाऽर्थं स्वस्य पारमार्थिकदुःखमोक्षार्थमित्यर्थः यद्यपि मोक्षबन्धभोगोऽपि सृष्टेः प्रयोजनं तथापि मुख्यत्वान्मोक्ष एवोक्तः। दर्शनेऽस्मिन् चार्वाकादीनामिव आकस्मिकसर्गकल्पना नोक्ता अपितु प्रकृतिपुरुषसंयोगकारणात् सर्गः प्रलयश्च भवन्तौ वर्तते। तस्याः प्रकृतेर्महानुत्पद्यते प्रथमः कश्चित्। महतोऽहंकार उत्पद्यते। तस्मात् अहंकारात् पञ्चतन्मात्राणाम्, पञ्चज्ञानेन्द्रियाणाम्, पञ्चकर्मेन्द्रियाणाम्, मनसः षोडशकोगण उत्पद्यते। षोडशकात् मध्येऽपि यानि पञ्चमहाभूतानि जायन्ते। तत्र शब्द तन्मात्रादाकाशम्, स्पर्शतन्मात्राद् वायुः, रूपतन्मात्राद् तेजः, रसतन्मात्रादापः गन्धतन्मात्रात् पृथिवी इत्यादि क्रमेण सृष्टिक्रमः भवति। सृष्टिक्रमं निरूपयतेश्वर कृष्णेनाभिहितम्-

**प्रकृतेर्महांस्ततोऽहंकारस्तस्माद् गणश्च षोडशकः।**

**तस्मादपि षोडशकात्पञ्चभ्यः पञ्चभूतानि।।**[8]

सांख्यदर्शनानुसारेण पञ्चविंशतितत्त्वविवेकेन न केवलं दुःखत्रायाणां निवृत्तिरेव अपितु मोक्षोऽपि सम्प्राप्यते। यथोक्तम्

**पञ्चविंशतितत्त्वज्ञो यत्र कुत्राश्रमे वसन्**

**जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः।।**[9]

त्रिविधगुणप्रधानाप्रकृतौ गुणाः यदा समत्वेन तिष्ठन्ति तदा कोऽपि विकारो न जायते। विकारस्तु तदैव भवति यदा गुणेष्वेषु संक्षोभस्संजायते। गुणविकारावस्थायाम् एको गुणः प्रबलतमः संजायते, अन्यौ द्वौ प्रथमस्य गुणस्य सहायकौ भवतः। सद्गुणप्रधाना सृष्टिः सद्गुणप्रधाने सति भवति एवञ्च रजोगुण-प्रधाना सृष्टिः रजोगुणस्य प्राधान्ये सति भवति। संसारेऽस्मिन् प्रकृतेः गुणानां प्रभाववशात् कोऽपि मानवः सत्वगुणोपपन्नः, कोऽपि रजोगुणप्रधानः कोऽपि रजोगुणप्रवृत्तियुक्तश्च दृष्टिपथमायाति। एतेषु गुणेषु मध्ये सत्त्वस्य प्रीतिरप्रीतश्च रजसः, तमसः विषादात्मकं स्वरूपमस्ति। एते गुणा इतरेतराश्रयेणोपार्जितसुखदुःख-मोहप्रत्यया इति सर्वे सर्वरूपा भवन्ति-

**प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः।**
**अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः।।**[10]

कदाचित् सत्त्वं रजस्तमसी जनयति तर्हि कदाचित्तमः सत्त्वरजसी जनयति। ऐते गुणाः अन्योन्यजनकाः सन्ति। किञ्चान्यत् अन्योन्यमिथुनाश्च गुणाः-

**रजसोमिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः।**
**उभयोः सत्त्व रजसोर्मिथुनं तम उच्यते।।**[11]

त्रयाणां गुणानां सामान्यविशेषधर्मप्रतिपादनप्रसंगे पुनरेकाजिज्ञासा समुदेति यत् संसारेऽस्मिन् भौतिकशरीरेषु हि एषां त्रयाणां कानि लक्षणानि दृष्टिपथ-मायान्तीति। जिज्ञासायामाह लघुप्रकाशम् सत्त्वस्येष्टमिति अर्थात् यदा सत्त्वमुत्कट-भवति तदा लघून्यङ्गानि बुद्धिप्रकाशश्च प्रसन्नतेन्द्रियाणां भवति। सत्त्वगुणं खल्वध्यात्मविषये प्रेरयति, द्वितीयो गुणो रजोरागमुत्पादयति एवञ्च चंचलं भवति।

तमस्तु गुरु आवरणकं च भवति अर्थात् यदा तम उत्कटं भवति तदा गुरुण्यङ्गानि इन्द्रियाणि भवन्ति स्वार्था समर्थानि। गुणानां विवेचनप्रसंगे चेतसि एका जिज्ञासा पुनरूदेति यद् परस्परविरुद्धानां गुणानां कथमे का वृत्ति- र्भवतीत्यत्राह परस्परविरुद्धाः शत्रवो न ह्येकमर्थं कुर्वन्ति। इमे गुणाः परस्परविरुद्धा अपि पुरुषार्थं कुर्वन्ति। कुतः? प्रदीपवच्चार्थतो वृत्तिः। यथा प्रदीपे तैलं वर्तिका ज्योतिश्च विरूद्ध-गुणवन्ति सन्त्यपि परस्परोपयोगितां एकमर्थप्रकाशरूपं निष्पादयनत्येवं गुणा अपि परस्परविरूद्धाः संहत्य पुरुषार्थं कुर्वन्ति-

**सत्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः।**
**गुरू वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः।।**[12]

सांख्याः प्रकृतिमेव मूलतत्त्वम् स्वीकुर्वन्ति। सृष्टिकृते प्रकृतिपुरुषयोः संयोगोऽपेक्ष्यते। रागविरागयोर्योगः सृष्टिः। रागे सृष्टिर्विराग्येच योगः स्वरूपेऽनवस्थानम्, मुक्तिरिति यावत् अथवा चित्तवृत्तिनिरोध इत्यर्थः। तथा चान्वयव्यतिरेकाभ्यां रागः सृष्टिकारणमित्याशयः। मुण्डकोपनिषदि उक्तमस्ति यत्-

**एतस्माज्जायतेप्राणोमनः सर्वेन्द्रियाणि च।**
**खं वायुर्ज्योतिरापश्च पृथ्वी विश्वस्य धारिणी।।**[13]

वेदान्तसूत्रमपि महदादि क्रमेणैव सृष्टिं वक्ति 'अन्तराविज्ञानमनसीक्रमेण तल्लिङ्गात्' (ब्र. सू. 2/3/15) इति। श्रीविज्ञानभिक्षुविरचितसांख्यप्रवचनभाष्ये

कथितमस्ति यत् एषां महदादीनां स्रष्टुत्वस्यात्मार्थत्वात् पुरुषमोक्षार्थत्वान्न स्वार्थ आरम्भः। स्रष्टुत्वम् विनाशित्वेनमोक्षायोगादित्यर्थः। परमोक्षार्थ कत्वेचावश्यके पुरुषमोक्षार्थकत्वमेव युक्तं न प्रकृतिमोक्षार्थकत्वम् तस्याः पुरुषगुणत्वादिति। यथावत्सार्थे धेनुः स्वयमेव क्षीरंस्रवतिनान्यं यत्नमपेक्षते, तथैवस्वामिनः पुरुषस्य कृते स्वयमेवकरणानि प्रवर्त्तन्ते-

**वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य।**

**पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य।।**[14]

संसारेऽस्मिन् वयं पश्यामः यत् कश्चिज्जनः स्वेष्टसिद्धये क्रियायां प्रवर्तते, तस्याः सिद्धौ च निवर्तते। तथैवेदमव्यक्तं यदा पुरुषस्य विमोक्षात्मकं स्वरूपं प्राप्नोति तदा तन्निवर्तते प्रकृतेः निवृत्तायामसौ पुरुषो दुःखत्रयं नानुभवति-

**रंगस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात्।**

**पुरुषस्य तथाऽऽत्मानं प्रकाश्य विनिवर्तते प्रकृतिः।।**[15]

सांख्यानाम् पुरुषस्त्रिगुणातीतः, विवेकी, विषयी चैतन्यस्वरूपश्च वर्तते। त्रयोविंशतितत्त्वेऽवस्थितो हि पुरुषस्तेनैवोपाधिनां पूर्वकृत-कर्म-भोगाय देहाद्देहं संसरति। अयमेवकथनं अवान्तररूपेण मनुनाऽपि कथित मस्ति-

**मानसं मनसैवायमुपभुङ्क्ते शुभाशुभम्।**

**वाचा वाचा कृतं कर्म कायेनैव तु कायिकम्।।**[16]

स्थूलशरीरस्य बीजात् त्रयोविंशतितत्त्वरूपात् सूक्ष्माद् हेतोः पुरुषस्य संसृतिर्गतागते भवतः। कूटस्थस्य विभुतयास्वतोगत्याद्य सम्भवाद्। मातापितृजं स्थूलं प्रायशः सूक्ष्मशरीरं न तथा, न मातापितृजम्। सूक्ष्मशरीरसम्बन्धे आत्मानात्म-विवेक उक्तमस्ति यत्- ''सूक्ष्मशरीरं सप्तदशकं लिंगम्। सप्तदशकं पञ्च बुद्धिर्मनश्च।[17]पुनः स्थूलशरीरस्यका परिभाषावर्तते? इति जिज्ञासायां श्रीविज्ञान-भिक्षुणा उक्तं यत्-''पाञ्चभौतिको देहः।''[18] अर्थात् पञ्चानां भूतानां मिलितानां परिणामो देहः स्थूलशरीरमुच्यते। यथा छाया निराधारा न तिष्ठतितथा च स्थूलदेहं त्यक्त्वा लोकान्तरगमनाय लिंगदेहस्याधारभूतं शरीरान्तरं सिध्यति-

**चित्रं यथाश्रयमृते स्थाण्वादिभ्यो विना यथाच्छाया।**

**तद्वद् विनाविशेषैर्न तिष्ठति निराश्रयं लिङ्गम्।।**[19]

प्रकृतिरियं परमात्मनापुरुषेण ज्ञानचक्षुषा दृष्टासव्रीडाकुल स्त्रीवन्न पुनर्दर्शनमुपैति। पुरुषस्य तस्यां च निवृत्तायां पुरुषः मोक्षं गच्छति-''या

दृष्टाऽस्मीतिपुनर्न दर्शनमुपैतिपुरुषस्य।''[20] प्रकृतिपुरुषयोः स्वरूपविषये सत्यमेवाह -

**अजामेकां लोहितशुक्लकृष्णां बह्वीप्रजाः सृजमानां सरुपाः।**
**अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोन्यः।।**[21]

त्रिगुणातीतः पुरुषो न बध्यते अविकारत्वात्, निष्क्रियत्वात् केवलं प्रकृतिः संसरति, बध्यते मुच्यते च। यथोक्तम्-

**तस्मान्न बध्यते नापि मुच्यते नापि संसरति कश्चित्।**
**संसरति बध्यते मुच्यते, च नानाश्रया प्रकृतिः।।**[22]

सांख्याचार्यैः पुरुष-सिद्धये युक्तिपञ्चकम् उपस्थाप्यन्ते- प्राकृतिकपदार्थसमूहस्य पुरुषार्थत्वात्, त्रिगुणादि-विपर्ययात्, अधिष्ठानात्, भोक्तृभावात्, कैवल्यार्थंप्रवृत्तेश्च। यथा-

**संघातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात्।**
**पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च।।**[23]

सांख्यैः प्रतिपुरुषं भिन्नः पुरुषः उरीक्रियते, तैः पुरुषबहुत्वं स्वीक्रियते। पुरुषबहुत्वं साधयन् ईश्वरकृष्णः प्राह-

**जननमरणकरणानां प्रतिनियमादयुगपत् प्रवृत्तेश्च।**
**पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव।।**[24]

निष्कर्षतः वयं एतत् कथयितुं शक्नुमः यत् प्रायःसर्वेषां दर्शनानां प्रवृत्तिः अपवर्गवाप्तये भवति। व्यक्ताव्यक्तविज्ञानाद् त्रिविधदुःखानामात्यन्तिकी निवृत्ति-र्भवति। दुःखनिवृत्तिरेवापवर्गो मुक्तिर्वा।तत्त्वाभ्यासात् पुरुषः कैवल्यमाप्नोति-

**एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम्।**
**अविपर्ययाद् विशुद्धं केवलमुत्पद्यते ज्ञानम्।।**[25]

**सन्दर्भाः-**


1. *द्वासुपर्णासयुजासखायासमानं वृक्षं परिषस्वजाते। तयोरन्यः पिप्पलंस्वाद्वत्त्यनश्नन्नयोअभिचाकशीति (ऋग्वेदे 1/164/2)*
2. *कठोपनिषदि 1/3/11*
3. *महाभारते शान्तिपर्वणि 306/43*
4. *श्रीमद्भगवद्गीतायाम्, 2/39*

5. *सांख्यकारिकायाम्-3*

6. *माठरवृत्तौपृष्ठसंख्या-16*

7. *सांख्यकारिकायाम्-21*

8. *तदेव-22*

9. *तदेव, भूमिकापृष्ठसंख्या-7*

10. *सांख्यकारिकायाम्-12*

11. *देवीभागवते-13/50*

12. *सांख्यकारिकायाम्-13*

13. *मुण्डकोपनिषदि-2/1/3*

14. *सांख्यकारिकायाम्-57*

15. *तदेव-59*

16. *मनुस्मृतौ- 12/7*

17. *आत्मविवेके, पृष्ठसंख्या-18*

18. *सांख्यदर्शने-3/17*

19. *सांख्यकारिकायाम्-41*

20. *तदेव-61*

21. *श्वेताश्वेतरोपनिषदि 4/5*

22. *सांख्यकारिकायाम्-62*

23. *तदेव-17*

24. *तदेव-18*

25. *तदेव-64*

●●●

# 7

# उपनिषद्युगीनसमाजः

***संजयकुमारः***

समाजस्याधारः मानव एव। समाजस्य मूलं व्यष्टौ निहितमस्ति। व्यष्टेः समन्वितरूपमेव समष्टिः। सा एव समष्टिः समाजः। समाजशब्दस्य व्युत्पत्तिरस्ति - समजन्ति जनाः अस्मिन्निति समाजः अर्थात् स समाजः, यत्र मनुष्याः सं गच्छध्वमिति वैदिकभावनया गतिशीलाः भवन्ति। मानवस्य उन्नत्यवनत्या उत्कषापकर्षेण एव समाजस्य प्रगतिः भवति। व्यक्तिः समाजश्च अन्योऽन्याश्रितो भवति। समाजस्य सर्वांगीणविकासाय मानवस्य सर्वांगीणविकासः आवश्यकः। अतः एव ऋषिभिः वर्णाश्रमव्यवस्था विहितास्ति। वर्णाश्रव्यवस्थायाः विधिवदनुष्ठानेन व्यष्टेः समष्टेश्चाभ्युदयो भवति।

**ब्राह्मणोऽस्य मुखमासीद्बाहूराजन्यः कृतः।**

**उरू तदस्य यद्वैष्यः पदृभ्यां शूद्रो अजायत।।**'[1]

ऋग्वेदस्येमं मन्त्रमनृकृत्य सामाजिकजनैः समाजस्य स्वरूपं निर्धारितमस्ति। वर्णव्यवस्थायाः यच्चित्रं भारतीयसमाजरूपेण ऋषिभिः दिग्दर्शितं तेन परिलक्ष्यते यदत्यन्तं सुखसौमनस्यपूर्णं समरसतामूलकं सुस्वस्थं समाजं द्रष्टुं तेषामृषीणामेषा परिकल्पना आसीत्। ब्राह्मणक्षत्रियवैश्यशूद्राः एते वर्णाः क्रमशः विद्यारक्षणश्रमसेवादीनां प्रतीकभूता आसन्। तेषु ब्राह्मण एव समाजस्य मुख्यत्वं भजते स्म। सामाजिकम्बन्धेषु कटुताया अभावः, पारस्परिकदायित्वग्रहणशीलता, सहयोगभावना चास्याः वर्णव्यवस्थायाः लक्ष्यमासीत्। उपर्युक्ते मन्त्रे रूपकव्यंजनास्ति यद्यथा शरीरस्थाः सर्वे अंगाः परस्परं सम्बद्धास्सन्ति, शरीरस्य कस्मिंश्चिदंगे वेदना भवति चेत् सर्वस्मिन्नंगे तस्या अनुभूतिर्भवति तथैव वर्णस्यैकस्य कष्टानुभूतिः अन्येषां वर्णस्थानामपि भवेत्। प्राचीनकाले

अध्ययनाध्यापनादिकार्यस्य प्रामुख्यं ब्राह्मणानां सत्यपि ते कृष्यादिकर्मणः विरता न आसन्। राजयसंचालनादिकार्येषु अपि तेषां हस्तक्षेपो भवति स्म, वेदोक्तिरप्यस्ति -

**यत्र ब्रह्म च क्षत्रं च सम्यंचौ चरतः सह।**

**तं लोकं पुण्यं प्रज्ञेषं यत्र देवः सहाग्निना।।'**[2]

अर्थात् यस्मिन् राज्ये ब्राह्मणः क्षत्रियश्च उभावेव जागरूकौ भवतः स एव लोकः उन्नतिशीलो भवति। एवमेव क्षत्रियोऽपि सुशासनव्यवस्थातिरिक्तं अन्यानयपि कार्याणि कुर्वन्ति स्म तथा अन्ये च वर्णाः। एवं खलु सर्वे वर्णाः समाजमपि परिवारमवबुध्य परस्परसहयोगेन सांमनस्यभावेन निवसन्ति स्म। न कश्चन लघु, न च कश्चन ज्येष्ठः, अत एव श्रेष्ठः समाजः तदानीं वयं पश्यामः। वैदिकयुगमिव उपनिषद्युगेऽपि समाजः परिदृश्यते। तदानीमपि समाजस्याधारशिला चातुर्वर्ण्यमेवाभवत्। वैदिककाले विराट्पुरुषात् वर्णानामुत्पत्तिर्दृश्यते तर्हि उपनिषद्युगे स एव विराट्पुरुषः ब्रह्मपदेन वर्ण्यते अपि च तस्मादुत्पत्तिरस्ति वर्णानाम्- **ब्रह्म वा इदमग्र आसीदेकमेव तदेकं सन्न व्यभवत्। तच्छ्रेयो रूपमत्यसृजत क्षत्रं....स नैव व्यभवत् स विशमसृजत...स नैव व्यभवत् स शौद्रं वर्णमसृजत। स नैव व्यभवत् तच्छ्रयोरूपमत्यसृजत धर्मं तदेतत् क्षत्रस्य क्षत्रं यद्धर्मस्तस्माद्धर्मात्परं नास्यधो अबलीयान् बलीयांसमांशसते धर्मेण यथा राज्ञैवं यो वै स धर्मः सत्यं वै तत्तस्मात् सत्यं वदन्तमाहुर्धर्मं वदतीति धर्मं वा वदन्तं सत्यं वदतीत्येतद्धयेवैतदुभयं भवति।'**[3]

बृहदारण्यकोपनिषद अस्मिन् गद्ये उच्यते यत् सृष्ट्यादौ केवलं ब्रह्म एव आसीत्। एकाकी स : कर्मणि समर्थो नाभूदतः तेन क्षत्रस्योत्पत्तिः कृता। तथापि कर्मणः अपूरणत्वात् सः वैश्यस्य अपि च ततः शूद्रस्योत्पत्तिं करोति। इह न केवलं वर्णानामुत्पत्तिरेव विहिता अपितु तेषां कर्माणि, धारणीयधर्मा अपि तत्र वर्णितास्सन्ति। गद्येऽस्मिन् ब्रह्म एव ब्राह्मणरूपेणाभवत्। स ब्राह्मणः एकाकी स्वकीयधर्म द्वारा संसारं न चालयितुं शक्नोति अर्थात् केवलं अध्ययन अध्यापन कर्म द्वारा संसारगतिरसम्भवा अतः ब्रह्मणा क्षत्रास्योत्पत्तिः कृता, एवमेव खलु वैश्यस्यापि शूद्रस्य च, स्व-स्वकर्मवैशिष्ट्यकारणत्वात् सर्वे तथावश्यकाः। उपनिषद्युगे चातुर्वर्ण्यविकासोऽभवत् तदा सर्वे वर्णाः जातिबद्धा न आसन्। दर्शनशास्त्रानुसारं समानप्रसवात्मिका जातिरुच्यते अर्थात् येषामुत्पत्तिः समाना सा एव एका जातिः। तस्मात् मनुष्यरूपा एका जातिः। पशुरूपा एका जातिरित्यादयश्चान्ये। अनया व्युत्पत्त्या जातिव्यवस्था न जन्मनाऽभवदपितु कर्मणा

एवाभवत्। जन्मना जायते शूद्रः संस्काराद्दि्वज उच्यते इति मनुस्मृत्यनुसारं संस्कारादेव सर्वे जात्यन्तरं प्रविशन्ति अन्यथा जन्मना तु सर्वेषां शूद्रत्वमेवेति मनुः। एतद्वयं उपनिषदि निर्दिष्ट-सत्यकामजाबालिकथाद्वारा अवगन्तुं शक्नुमः- **सत्यकामो ह जाबालो जबालां मातरमामन्त्र्यांचक्रे ब्रह्मचर्यं भवति विवत्स्यामि किंगोत्रे न्वहमस्मीति।'**[4]

अर्थात् एकदा खलु जबालायाः पुत्रः सत्यकामः स्वमातरम् अपृच्छत् यत् अहं ब्रह्मचर्यमाचरितुमिच्छाति अतः किं मे गोत्रमिति भवत्या वक्तव्यम्। तस्य माता तदा वदति यत् नाहं जानामि किं ते गोत्रमिति, अहं तु चरती परिचारिणी यौवने त्वमालभे। ततः सः सत्यकामः जाबालपुत्रः हारिद्रुमतं मुनिमुपगच्छति अपि च सर्वं स्वविषये सत्यमुक्त्वा ब्रह्मचर्यं प्राप्तुमाप्तुकामः अतिष्ठत्। मुनिः कथयति न तथा त्वमन्यो भवितुं शक्यते सत्यवचनेन त्वं ब्राह्मण एव - **तं होवाच नैतदब्राह्मणो विवक्तुमर्हसि। समिधं सोम्याहरोप त्वा नेष्ये। न सत्यादगा इति तमुपनीय चतुःशता गा निराकृत्योवोचेमाः सोम्यानुसंव्रजेति।'**[5] इत्युक्त्वा मुनिः तं ब्रह्मचर्यमादिशति। ब्रह्मचर्यपालनेन एकदा सः महान् ऋषिरूपेण सम्पन्नोऽभवत्।

उपनिषदि ब्राह्मणाय ब्रह्मशब्द एव सर्वत्र प्रयुक्तः दृश्यते। समाजे ब्राह्मण एव उत्तमांगरूपेण आसीत्। अध्ययनम्, अध्यापनम्, यजनम्, याजनम्, दानं, आदानमित्यादिकं ब्राह्मणानां कर्म आसीत्, येषु कम्रसु यः प्रवीणः स एव ब्राह्मणनामधेयो बभूव। तेष्वेव ब्राह्मणेषु पौरोहित्यवर्गोदयश्चाप्यभवत्। याज्ञिकानुष्ठानाय दक्षिणापूर्वकमयं वर्गः यज्ञादिकर्मणि व्यापृतः भवति स्म। उपनिषद्युगे तु ब्रहमविदः वादविवादशास्त्रर्थे शास्त्रमन्थने राज्ञः प्रभूतं धनं प्राप्नुवन्ति स्म। परं याज्ञिककर्मण्यपि ते राजानः प्रभूतां दक्षिणां ददति स्म। यथा चोपनिषदि -

**यावदैकस्मा ऋत्विजे धनं दास्यामि तावद् भगवद्भ्यो दास्यामि वसन्तु भगवन्त इति।'**[6]

अर्थात् अश्वपतिः कैकेयः कथयति ब्रह्मवेत्तारं मुनिं कथयति यत् भवान् अत्रैव वसतु अहं यज्ञमेकं कारयितुमिच्छामि तत्र तावद् भवद्भ्यश्च दक्षिणां दातुमिच्छामि। अनेन ज्ञायते स्म यत् पौरोहिताय प्रभूतं धनं तदा दीयते स्म। अतः ब्राह्मणानां कर्म अध्ययनाध्यापनेन सह दानादानमप्यभवत्।

उपनिषद्यनुसारं प्रथमं ब्रह्म आसीत् ततः क्षत्रस्योत्पत्तिर्जायते -

**क्षत्रात्परं नास्ति तस्माद् ब्राह्मणः क्षत्रियमधस्तादुपास्ते राजसूये क्षत्र एव तद्यशो दधाति सैषा क्षत्रस्य योनिर्यद् ब्रह्म ।'**[7]

अर्थात् क्षात्रधर्मात् श्रेष्ठं नैव किंचित् परमिति राजसूये यज्ञे ब्राह्मणः अधः तिष्ठति। स्वयज्ञं, क्षात्रधर्ममर्पयति। किन्तु क्षात्रधर्मस्याधारः ब्रह्म एवातः सर्वथा ब्राह्मणस्यौचित्यम्। क्षत्र एव राजा भवति स्म। अत एव ऋषयः शरीरस्थप्राणानपि क्षत्रसंज्ञया व्यवहरन्ति। यतोहि प्राणास्तथैव शरीरस्य रक्षां कुर्वन्ति यथा राजा प्रजायाः। अतः उपनिषदि प्राण एव क्षत्रम् -

**क्षत्रं प्राणो वै क्षत्रं प्राणो हि वै क्षत्रं त्रायते हैनं प्राणः क्षणितोः प्रक्षत्रमत्रमाप्नोति ।'**[8]

एवं प्राणस्य क्षत्रत्वात् प्राणः क्षत्रम्। सर्वेषु लोकेषु क्षत्रस्यैव प्रशासनमभूदिति'[9] संसारे खलु क्षत्रस्यैव सर्वदा शासनमभूत्। उपनिषदीयसमाजे क्षत्रियः न केवलं शासनादिककर्मणि एव निरता आसन् अपितु ते शास्त्राध्ययनमपि कुर्वन्ति स्म। केवलं ब्राह्मणा एवाध्ययनं कुर्वन्ति स्म एवं नासीदपितु क्षत्रिया अपि कर्मण्यस्मिन् निरन्तरं प्रावीण्यं विदधति स्म। उपनिषदि पंचालनरेश- प्रवाहणजैबालिक्षत्रियस्य वर्णनं वयं पश्यामः। प्रवाहणजैबालिः पंचाग्निविद्यायाः प्रवेत्ता आसीत्। यदा उद्दालकआरुणिः प्रवाहणसमीपं तां विद्यां ग्रहीतुमागच्छन्ति तदा राजा प्रवाहणः तं ऋषिं सत्कुरुते। अपि च तां पंचाग्निविद्यां ग्रहीतुं तमृषिं तत्रैव चिरं वसितुं कथयति, तस्मै च पंचाग्निविद्याम् उपदिशति छान्दोग्योपनिषदि- तं ह चिरं वसेत्याज्ञापयांचकार तं होवाच यथा मा त्वं गौतमावदो यथेयं न प्राक् त्वत्तः पुरा विद्या ब्राह्मणान् गच्छति तस्मादु सर्वेषु लोकेषु क्षत्रस्यैव प्रशासनमभूदिति तस्मै होवाच। एवं चानेककथाः उपनिषदि द्रष्टुं शक्यते यत्र ब्राह्मणराजानौ परस्परमुपदिश्यमाणे दृश्येते। अर्थात् उभयोरेव ज्ञानबलीयस्त्वमासीत्। अतः उभावेवावश्यकौ समाजायेति उपनिषदः कथनम्।

उपनिषत्सु वर्णितमस्ति यत् ब्राह्मणैः अध्ययनाध्यापनादिके तथा क्षत्रियैः देशसेवादिककर्मणि सत्यपि धनोपार्जनादिकं विना समाजस्योन्नतिरसम्भवेति दृष्ट्वा विशानामुत्पत्तिरभूत्। ते च वैश्याः देवेषु वसुः रुद्रः,आदित्यः, मरुत्गणः, विश्वेदेवाः आदिगणशः कथ्यन्ते स्म अपि च देवेषु वैश्यानां प्रतिनिधित्वेन आसन्- **स नैव व्यभवत्स विशमसृजत यान्येतानि देवजातानि गणश आख्यायन्ते सववो रुद्रा आदित्याविश्वेदेवा मरुत इति ।'**[10]

अस्मिन् वाक्ये गणश इति पदं महत्त्वपूर्णमृ। वसुरुद्रादीनां स्व-स्वभूताः ये गणाः सन्ति, समुदायाः सन्ति त एव गणश इति भवन्ति। एत एव धनोपार्जने समर्थाः भवन्ति। वसवः अष्ट सन्ति-अग्पिः ,पृथिवी, वायुः, अन्तरिक्षः, आदित्यः, द्युलोकः, चन्द्रमा, नक्षत्रम् इति। एतेष्वेव सकलं जगत् सन्निहितं विद्यते। अर्थात् एत एव वसवः सकलं जगत् वासयन्ति। स्वयमपि च वसन्ति। एतेषामिदमेव वसुत्वम्। रुद्राश्चापि एकादश्स सन्ति। तत्र दश प्राणाः एकादशश्च आत्मा। एते यदा शरीरात् निर्गच्छन्ति तदा तत्सम्बन्धीन् रोदयन्ति तस्मादेतेषां रुद्रत्वम्। आदित्याश्च द्वादश सन्ति । द्वादश मासा एव द्वादश आदित्याः। एते आदित्याः निरन्तरं यथाक्रममागत्य प्राणिनामायुः अपि च कर्मफलादानादिकं गृहीत्वा वर्तन्त अत एतेषां आदित्यत्वम्। विश्वेदेवानामर्थः सकलाः देवगणाः सन्ति एते च संख्यायां त्रयोदश सन्ति। मरुतश्च एकोनपंचाशत् सन्ति एतेषां सप्त गणाः सन्ति - सप्त हि मरुतो गणः'[11] ।

मरुतो मितराविणो मितरोचिनो वा महद् द्रवन्तीति वा।'[12] मरुतस्ते भवन्ति ये द्रविताः भूत्वा वर्षन्ति। अन्तरिक्षस्थानीयदेवताः सन्ति। ब्राह्मणग्रनथेषु मरुतः एव विशः अर्थात् प्रजाः सन्ति - **विशो वै मरुतो देवविशः'**[13] विशसम्बन्धात् मरुतः वैश्यसम्बन्धी उच्यते। नैतावदेव प्रणिद्वारा यद्भक्ष्यमन्नं तदपि मरुदिति उच्यते। वस्तुतः वैश्यानां व्यापारिणां सम्बन्धः समाजेन भवति। अत एव वैश्याः मरुत्सम्बन्धिनः कथ्यन्ते।

**विशो वै मरुतोऽन्नं वै विश उज्जेशेब्भयः।'**[14] अर्थात् विशः, मरुतः, अन्नम्, औषधयश्च एते परस्परं पर्यायवाचिन एव सन्ति। मरुतां देवलोके पोषणकर्म विद्यते तर्हि विशां पृथिवीलोके। मरुतः वर्षाद्वारा पृथिव्यां जलं वर्षन्ति पृथिवीलोकं च पुष्णाति तर्हि विशः कृषि द्वारा अन्नमुत्पाद्य मानवमात्रं सेवन्ते। समाजस्यार्थव्यवस्था कृषिकर्मणि निर्भरासीत्। कृषिश्च वृष्टौ निर्भरासीत्। अतः मरुतः एव विशः सन्तीति वक्तुं शक्यते। विशः श्रमसाध्यं कार्यंकुर्वन्ति स्म। अत एव ते आर्थिकदृष्ट्या सम्पन्नत्वात् सामाजिकरूपेण प्रतिष्ठिता आसन्। पशुकामः खलु वैश्यो यजते'[15] वैशः पशुकामनया यज्ञं कुर्वन्ति स्म। पशुसमृद्धिरपि उपनिषद्युगे तावत् सम्पन्नतरा दृश्यते। वैश्यास्तदा पशूनां संरक्षणं संवर्धनं परिपालनमपि च क्षेत्रदि कार्ये तेषां पशूनां यथोपयोगं कुर्वन्ति स्म। राजनैतिकदृष्ट्यापि वैश्यानां महती भूमिका तदानीं दृश्यते। राजसूययज्ञावसरे ग्रामणी संज्ञकरत्नी समादरणीया भवति स्म। तैत्तिरीयसंहितानुसारं वैशनामादर्शः ग्रामणी भवति स्म। ग्रामणी अपि

प्रायः विश एव भवन्ति स्म। अत एव ते वैश्या उच्यन्ते स्म। यद्यपि वैश्यानां कृतेऽपि शिक्षाया अधिकार आसीत् पुनरपि ते स्वकीयं यथाधिकं समयः कृषिकर्मणि एव, पशुपालने च यापयन्ति स्म।

महर्षिपाणिन्यनुसारं शुच्धातोः रप्रत्ययं विधाय शूद्रशब्दस्योत्पत्तिर्भवति। ते मनसा वचसा शुद्धा भवन्ति स्म। उपनिषद्युगीनसमाजे सामाजिकसंगठनस्य चतुःस्तम्भेषु अन्यतमः स्तम्भ आसीत्। सः समाजस्य पोषकवर्गरूपेणाभवत्। अद्यतनीयसमाजस्य मानसिकता-अस्पृश्यता, दासता, परतन्त्रत्वम् इत्यादेः दूरमेवासीत्। सः समाजस्य अपरिहार्यमंगमासीत्। यस्याभावे समाज पंगुरेवासीत्।

**प्रियं मा कृणु देवेषु प्रियं राजसु मा कृणु।**
**प्रियं सर्वस्य प्श्यत उत शूद्रे उतार्ये।।'**[16]

वेदादिवचनप्रामाण्यादेव एतज्ज्ञायते यत् शूद्रस्य कृते सर्वाधिकारत्वमासीत्। शूद्रस्यापि तथैव कल्याणत्वमभिलषते यथा अन्येभ्यः वर्णेभ्यः। वैदिककालेपि वयं पश्यामः यत् दीर्घतमसः पुत्रः काक्षीवान् दास्याः एव पुत्र आसीत्। परन्तु सः ऋक्सूत्राणां द्रष्टा आसीत्। महिदास ऐतरेयः इतरायाः पुत्रः आसीत् सः पश्चात् ब्रह्मर्षिरभवत्। एतादृशानि अनेकानि उदाहरणानि सन्ति ज्ञायते यत् तद्युगे जन्मना वर्णव्यवस्था नासीत् अपितु कर्मणा वर्णानां स्वरूपनिर्धारणं भवति स्म - जन्मना जायते शूद्रः संस्काराद् द्विज उच्यते। इति मनुस्मृतिवचनानुसारं सर्वे जन्मना शूद्रा एव भवन्ति पश्चात् अध्ययनादिसंस्कारात् गुरुसंसर्गाद्वा मनुष्यः द्विर्जायते, मनुष्याणां द्वितीयं जन्म एव भवति अतः सः द्विजसंज्ञया अभिधीयते। तस्मादेव वैदिककाले उपनिषत् काले वा शूद्रा अपि स्वसंस्कारवशात् द्विजत्वरूपेण सर्वमध्ययनाध्यापनादिकं विदधते स्म। समाजे तेषामपि तावदेव सम्मानमासीत् यथान्येषाम्।

मानवजीवनस्य सुव्यवस्थितकामनया ऋषिभिराश्रमव्यवस्था अपि कल्पिता आसीत्। आश्रमशब्दः आङ्पूर्वकश्रमधातोः घञ्प्रत्यये कृते सिध्यति यस्यार्थो भवति - आसमन्तात् श्राम्यन्ति मनुष्याः यस्मिन् इति आश्रमः अर्थात् स एवाश्रमः यत्र मनुष्याः आजीवनं श्रमं कुर्वन्ति। यथा च ईशावास्योपनिषदि उक्तमस्ति-

**कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।**
**एवं त्वयि नान्यथेतोस्ति न कर्म लिप्यते नरे।।'**[17]

कर्मशीलजीवनमेव श्रमशीलं भवति। कठोपनिषदि यमाचार्यः नचिकेतसमुपदिशति यत् -

**त्रिनाचिकेतस्त्रिभिरेत्य सन्धिं त्रिकर्मकृत् तरति जन्ममृत्यू।**
**ब्रह्मजज्ञं देवमीड्यं विदित्वा निचाय्येमां शान्तिमत्यन्तमेति।।'**[18]

यःत्रिनाचिकेतो भवति अर्थात् यः नाचिकेतमग्निं ब्रह्मचर्य गृहस्थवान प्रस्थादिश्रमेषु उपासते। सः आश्रमसन्धिमेत्य सः त्रिकर्मकृत् जन्ममृत्यू तरति। ब्रह्मचर्याश्रमात् गृहस्थाश्रमप्रवेशः प्रथमः सन्धिः। गृहस्थाश्रमात् वानप्रस्थाश्रमप्रवेशः द्वितीयः सन्धिः। वानप्रस्थाश्रमात् संन्यासाश्रमप्रवेशः तृतीयः सन्धिरिति त्रिकर्मत्वम्। अत्र यमाचार्यः आश्रमाणां स्पष्टं कर्मवर्णनं करोति। मानवजीवनस्य प्रथमं सोपानम् - ब्रह्मचर्याश्रम एव। औपनिषदिकदर्शने महान् तत्त्ववेत्ता उद्दालकः आरुणिः स्वपुत्रं श्वेतकेतुं कथयति - त्वं ब्रह्मचर्यवासं कुरु -

**श्वेतकेतुर्हाऽरुण उवाच। तं ह पितोवाच श्वेतकेतो वस ब्रह्मचर्यम्। न वै सोम्यास्मत्कुलीनोऽननूच्य ब्रह्मबन्धुरिव भवतीति।।'**[19]

आरुणिः कथयति श्वेतकेतुम् अस्माकं कुले न कश्चन बभूव यः वेदाध्ययनं विना ब्रह्मबन्धुरभवत्। अतः ज्ञायते यत् उपनिषद्युगे बह्मचर्याश्रमः आवश्यक आसीत्। अन्तेवासी भूत्वा ब्रह्मचर्याश्रमे ब्रह्मचारी वसति स्म। ब्रह्मचर्याश्रमानन्तरं समावर्तनसंस्कारादनन्तरं च गृहस्थाश्रमे प्रविशति स्म। तैत्तिरीयोपनिषदि समावर्तनोपदेशे ऋषिः कथयति - प्रजातन्तुं मा व्यवच्छेत्सीः। (तै.) छान्दोग्योपनिषदि उक्तमस्ति -

आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान्विदधदात्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाहिंसन्सर्वभूतान्यत्र तीर्थेभ्य' स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसम्पद्यते न च पुनरावर्तते न च पुनरावर्तते। '[20]

अर्थात् आचार्यकुलात् विद्यां समाप्य समावर्तनसंस्कारानन्तरं नियमपूर्वक स्त्रीपरिग्रहं विधाय कुटुम्बे स्थितो भव अर्थात् गृहस्थाश्रमे स्थितो भव। एवं खलु उपनिषदृषे कथनमस्ति यत् गृहस्थाश्रमस्यावहेलना न केनचित् कर्तव्येति। गृहस्थाश्रमस्य मूलं कामः - स वै नैव रेमे तस्मादेकाकी न रमते स द्वितीयमैच्छत्। स हैतावानास यथा स्त्रीपुमांसौ संपरिष्वक्तौस इममेवात्मानं द्वेधापातयत्ततः पतिश्च पत्नी चाभवताम्।'[21]

अर्थात् पूर्वं आत्मेंवेदमग्र आसीत् सोऽकामयत जाया मे स्यात् अथ प्रजायेय तर्हि तौ स्त्रापुमांसौ पतिपत्नीरूपेण अभवताम्। उपनिषद्युगस्य ऋषयः महाशालगृहस्थाः भवन्ति स्म। उपनिषदि गृहस्थाश्रमस्य अग्होित्रादिकं सर्वं कर्तव्यादिकमुपदिष्टं विद्यते। गृहस्थैः इष्टापूर्तादिकं कार्यम्। गृहस्थाश्रमादन्या श्रमस्य भोजनादिव्यवस्थापूर्वा सर्वा व्यवस्था ध्यातव्येति सर्वं तत्र वर्णितमस्ति अपि च तस्मिन् युगे समाजस्य का स्थितिरासीदित्यपि दिग्दर्शितं भवति। उपनिषद्युगीनसमाजे सर्वे वानप्रस्थाश्रमिणः अरण्यवासिनः भवन्ति स्म - ये चेमेऽरण्ये श्रद्धा तप इत्युपासते।'[22] अर्थात् सर्वे जनाः तदानीं काले, जीवनस्योत्तरार्द्धकाले स्वत एव निष्कामिनो भूत्वा वनवासिनो भवन्ति। स्वाध्यायार्चनोपासनादिकर्मणि निरताः भवन्ति स्म। तदानीं जनानां विचारः आसीत् यत् अरण्यस्य एकान्तवासः अस्माकमुपासनायै गूढचिन्तनाय सर्वोत्तम एव। यथा ऋग्वेदे उक्तमस्ति-**उपह्वरे गिरीणां संगमे च नदीनाम्। धिया विप्रो अजायत।।** '[23]

अस्य वेदमन्त्रस्य आदर्शः तदानीं समाजे दृश्यते खलु। संन्यासाश्रमस्य परिपालनमपि सर्वे कुर्वन्त्येवासन्। मुण्डकोपनिषदि यतिशब्दप्रयोगेण स्पष्टम्भवति- **अन्तःशरीरे ज्योतिर्मयो हि शुभ्रो यं पश्यन्ति यतयः क्षीणदोषाः।**'[24] अपि च - **वेदान्तविज्ञानसुनिश्चितार्थाः संन्याययोगाद्यतयः शुद्धसत्त्वाः।**'[25] अत्र संन्यासिनः कीदृशः भवन्ति इति स्पष्टम्। ते ज्योतिर्मयाः, सर्वदा ईश्वरे निरताः, शुद्धान्तः करणाः, भवन्ति स्म। केवलं परोपकारसंयुताः, संसारकल्याणभावसमन्विताः एव भवन्ति स्म। शंकराचार्यः यतिशब्दस्य यत्नशील इत्यर्थं कुर्वन्ति-यतयो यतनशीलाः संन्यासिनः। ये खलु कामक्रोधादिदुरितक्षीणाय सर्वदा यतनशीलाः भवन्ति त एव संन्यासिनः सन्ति।

उपनिषद्युगे परिवारप्रणाली वैदिकयुग इवाभवत्। किन्तु आर्थिकविकास-कारणात् सामाजिक परिवर्तन प्रभावाच्च किंचित् परिवर्तनं दृश्यते। यथा भ्रातृव्य शब्दः ध्यातव्यः। भ्रातुः पुत्र भ्रातृव्य आसीत् परं - **परास्य द्विषन्भ्रातृव्यो भवति य एवं वेद**'[26] **सप्त ह द्विषतो भ्रातृव्यानरुणद्धि** '[27] अनेन सन्दर्भेण ज्ञायते यत् संयुक्त पारिवारिकसंगठने द्वेष्टा अपि भ्रातृव्यशब्देन सम्बोध्यते स्म। विचारेण ज्ञायते यत् भ्रातृव्यशब्दस्य द्वेष्टा इत्यर्थः आर्थिकदृष्ट्यैव स्यात्। परिवारे साम्पत्तिकविवादः भ्रातृव्यं शत्रुं कर्तुं युज्यते। तस्मिनूयुगे पतिरेव पत्नयाः प्रतिष्ठा आसीत् - **सह ह प्रजापतिरीक्षांचक्रे हन्तास्मै कल्पयानीति स स्त्रियं ससृजे**'[28] पतिपत्न्योः धुरसम्बन्धः

तदानीं दृश्यते। पतिपत्न्यौ केवलं कामिनौ न भवतः स्म, न च केवलं भोगविलासे रममाणौ आस्ताम् अपितु तौ यथासमयं शास्त्रादिचर्चाव्यापृतावपि भवतः स्म। उपनिषदि याज्ञवल्क्यमैत्रेय्याः शास्त्रचर्चा दृश्यते। तच्चर्चा एव कारणं यत् गृहस्थिनी सत्यपि मैत्रेयी जीवनस्य लक्ष्यं जानाति स्म। सा याज्ञवल्क्यं कथयति यदा ते स्वीयां सम्पत्तिं भागद्वये विभक्तुमिच्छन्ति पत्नीद्वयाय। तदा सा वक्ति यत् - **किमहं तेन कुर्याम येनाहं नामृता स्याम'**[29] अनेन ज्ञायते यत् तदानीं स्त्रियः उत्तमविचारशीलाः, जीवनोद्देश्यसंयुताः, परलोकज्ञा आसन्।

षोडशसंस्काराः अपि तस्मिन् युगे महत्त्वपूर्णा आसन्। भारतीयज्ञान-परम्परासंवाहकः सः युगः सर्वथा उन्नतिशीलः आसीत्। न क्वचित् वैमनस्यं दुर्मनस्यमभवत्। सर्वे जनाः शान्ताः, क्षीणदोषाः, स्व-स्वकर्मणि निरताः, यज्ञतपः स्वाध्यायनिरताः, परस्परं भावयन्तः, सामाजिकाः, परोपकारिणः, शास्त्रचर्चाव्यापृताः आसन्। यदि क्वचित् कर्मविचिकित्सा वा वृत्तविचिकित्सा वा अभवत् तदा ते ये ब्राह्मणाः सम्मर्शिनः युक्ताः आयुक्ताः अलूक्षा धर्मकामा आसन् यथा ते वर्तयन्ति स्म तथा अन्येऽपि वर्तयन्ति स्म। यथा तैत्तिरीयोपनिषदि उक्तम्-

**सत्यं वद, धर्मं चर, स्वाध्यायान्मा प्रमदः, मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् ये तत्र ब्राह्मणाः सम्मर्शिनः युक्ता आयुक्ताः अलूक्षा धर्मकामाः स्युः यथा ते तत्र वर्तेरन् तथा तत्र वर्तेथाः, एष आदेशः, एषउपदेशः, एषा वेदोपनिषद्, एतदनुशासनम् एवमुपासितव्यम्। एवमु चैतदुपास्यम्।।'**[30]

एवं खलु उपनिषदृषिः समावर्तनसमये नैतिकम् उपदिशति। एतदेवाचरणं सर्वैर्विधातव्यम्, एतदुपदेशः न केवलं ब्रह्मचारिणां कृत एव अपितु सर्वेषां मानवानां कृते आवश्यकम्। जीवनस्याधारशिला नैतिकमूल्येषु, धर्माचरणेषु, स्वाध्याय प्रवचनेषु, सामाजिक सद्व्यवहारेषु, व्यावहारिक मूल्येषु संस्थापिता भवति। सः सर्वः सदुपदेशः वयमुपनिषद्युगे गृह्णीमः तदानीन्तनसमाजाच्च शिक्षामहे।

**सन्दर्भाः-**

*1* *यजु.*

*2* *यजु.*

*3* *बृह. उ. 1.4.12-14*

4 छा. उ. 4.1.1

5 छा. उ. 4.5.1

6 छा. उ. 5.11.5

7 बृह. उ. 1.4.11

8 बृह. उ. 5.13.4

9 छा. उ. 5.3.7

10 बृह. उ. 1.4.12

11 शत. ब्रा. 2.5.1.13

12 निरु. 11.13

13 ताण्ड्य ब्रा. 2.7.2.2

14 तै. सं. 2.5.10.2

15 शत. ब्रा.5.13.3

16 अथर्व. 19.6.9

17 यजु. 40.2

18 कठो. 1.17

19 छा. उ. 6.1.1.

20 छा. उ. 8.15.1

21 बृह. उ. 1.4.3

22 छा. उ. 5.10.1

23 ऋ.8.6.28

24 मुण्डको. 3.1.5

25 मुण्डको. 3.2.6

26 बृह. उ. 1.3.7

27 बृह. उ. 2.2.1

28 बृह. उ. 6.4.2

29 बृह. उ. 2.4.2

30 तै. उ. 1.11.4

●●●

# 8

# उपनिषत्सु लोकोपयोगिनी शिक्षा

***नौनिहालगौतमः***

लोके प्रसृतानां ज्ञानविज्ञानधाराणां मूलस्रोतः वेद एवेति मान्यता विद्यते, यथा-

**'सर्वज्ञानमयो हि सः'**[1] वैदिकसाहित्ये संहिताब्राह्मणारण्यकोपनिषदां गणना भवति। तत्र द्वौ भागौ स्तः कर्मकाण्डं ज्ञानकाण्डं च। ज्ञानकाण्डे आरण्यकोपनिषद आयान्ति। वैदिकसाहित्यस्य अन्तिमो भागः उपनिषद्भागः। सम्प्रति द्विशताधिका उपनिषदः प्राप्यन्ते। उपनिषदः ज्ञानपरिपूर्णाः सन्ति। तत्र विद्यमानं ज्ञानं बहुविधं गोक्षीरवदुपयोगि च वर्तते। यद्यपि उपनिषद आत्मविद्यामुपदिशन्ति तथापि उपनिषत्सु लोकोपयोगि ज्ञानमपि विद्यते। उपनिषत्सु लोकोपयोगिनी शिक्षा इति विषयस्योपस्थापनमत्र अभीष्टमस्ति।

लोकः संसारो जगद्वा मुख्यरूपेण मानवेन सम्बद्धोऽत्र ज्ञातव्यः। लौकिकविषयाणामपि चर्चा उपनिषत्सु विद्यते, यथा- **'य एवमेता महासंहिता व्याख्याता वेद। सन्धीयते प्रजया पशुभिः ब्रह्मवर्चसेनान्नाद्येन सुवर्गेण लोकेन।'**[2] अर्थात् पञ्चमहाविद्यानां सुविज्ञः जनः सुप्रजां पशून् ब्रह्मतेजः खाद्यपदार्थान् सुवर्गलोकं प्राप्नोति। मानवानामुपयोगिन्यः शिक्षाः उपनिषत्सु प्रकारान्तरेण विद्यन्ते।

**सम्बन्धाः-** सम्बन्धेषु परस्परं प्रेम उपकारिभावः हितचिन्तनं च भवेयुः। कठोपनिषदि पुत्रः पितुः हितकामनया सत्यं वदति। यतो हि नचिकेताः चिन्तितवान् यदि पिता एताः अनुपयोगिन्यः गाः दास्यति तर्हि असुखान् लोकान् गमिष्यति। तद्यथा-

**'पीतोदका जग्धतृणा दुग्धदोहा निरिन्द्रियाः।**
**अनन्दा नाम ते लोकास्तान्स गच्छति ता ददत्।।'**[3]

हितं मनोहारि च दुर्लभं वचः इत्युक्त्या पुत्रस्य नचिकेतसः हितकारि वचनमपि वारं वारं श्रुत्वा पिता सकोपो भूत्वा मृत्यवे त्वां ददामीति वदति। पुनश्च नचिकेताः पितरं वचनस्य मृषाकरणात् निवारयति। अनन्तरं च प्रथम एव वरे पितुः मनःशान्तिं कामयते। तद्यथा-

**'शान्तसङ्कल्पः सुमना यथा स्याद्वीतमन्युर्गौतमो माभिमृत्यो।**
**त्वत्प्रसृष्टं माभिवदेत्प्रतीतः एतत्त्रयाणां प्रथमं वरं वृणे।।'**[4]

सम्बन्धेषु शान्तसङ्कल्पता, सौमनस्यम्, मन्युराहित्यम्, मधुरभाषणं च भवेयुः।

पतिपत्न्योः सम्बन्धः बृहदारण्यकोपनिषदि दृश्यते यत्र याज्ञवल्क्यस्य द्वे भार्ये स्तः। तयोरेका कात्यायनी गृहमिच्छति, अपरा मैत्रेयी आत्मज्ञानम्। यथा-

**'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेयि'**[5]

अनेन ज्ञायते यत् पतिपत्न्योः सम्बन्धः परस्परं श्रेयसे भवति।

मातृपुत्रयोः सम्बन्धः सत्यकामजाबालकथायां विद्यते। तत्र माता पुत्रात् किमपि रहस्यं न गोपयति अपितु सत्यं वदति। जाबालस्य सत्यभाषणेन एव गुरुः प्रसन्नः भवति, शिष्यरूपेण जाबालं स्वीकरोति। तद्यथा- **'जबाला तु नामाहमस्मि, सत्यकामो नाम त्वमसि इति। सोऽहं सत्यकामो जाबालोऽस्मि भो इति।'**[6]

सन्ततेः सम्बन्धस्य विद्यायां कथितं यत् माता पूर्वरूपं पिता उत्तररूपं सन्ततिः सन्धिः प्रजननं च तयोः द्वयोः सम्बन्धस्य साधनम्। तद्यथा- **अथाधिप्रजम् माता पूर्वरूपम् पिता उत्तररूपम् प्रजा सन्धिः प्रजननं सन्धानम् इत्यधिप्रजम्।।**[7]

**अतिथिसत्कारः-** गृहम् आगतानाम् अतिथीनां सत्कारः करणीयः। इति उपदेशः कठोपनिषदः प्राप्यते।तद्यथा-

**'वैश्वानरः प्रविशत्यतिथिर्ब्राह्मणो गृहान्।**
**तस्यैतां शान्तिं कुर्वन्ति हर वैवस्वतोदकम्।।'**[8]

अतिथये आसनं, स्थानं, पेयं जलं, मधुरं वचनं च सतां गेहेषु सदैव विद्यन्ते एव। तद्यथा-

**'तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता।**
**एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन।।'**[9]

भारतवर्षे अतिथेः महत्त्वम् अधिकं विद्यते। अन्यत्रापि उक्तम्-

**'उत्तमस्यापि वर्णस्य नीचोऽपि गृहमागतः।**

**'तस्य पूजा विधातव्या सर्वदेवमयोऽतिथिः।।'**

कठोपनिषदि अपि यमो नचिकेतसं ब्रवीति यत् त्वमतिथिः अनश्नन् मे गृहे अतिष्ठत् अतः दोषापहाराय त्रीन् वरान् वृणीष्व इति। यथा-

**'तिस्रो रात्रीर्यदवात्सीर्गृहे मे अनश्नन्ब्रह्मन्नतिथिर्नमस्यः।**

**नमस्तेऽस्तु ब्रह्मन्स्वस्ति मेऽस्तु तस्मात्प्रति त्रीन्वरान्वृणीष्व।।'**[10]

जनाः विविधप्रकारैः बहु अन्नं प्राप्नुयुः। तेन चान्नेन अतिथिसत्कारः करणीयः। आगतस्य अतिथेः परित्यागः न करणीयः। तद्यथा-

**'न कंचन वसतौ प्रत्याचक्षीत।'**[11]

साम्प्रतं प्रचलिता शरणार्थिसमस्या अपि अनेन निवारिता भवेत्। शरणर्थिनां जीवनं च नरकसदृशं न स्यात्।

**आत्महत्याया निन्दा-** साम्प्रतम् आत्महत्या एका समस्या जाताऽस्ति। ईशावास्योपनिषदि आत्महननस्य निन्दा कृताऽस्ति। तद्यथा-

**'असुर्या नाम ते लोका अन्धेन तमसावृताः।**

**तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः।।'**[12]

एतस्य 'आत्महनः' इतिपदस्य अर्थः आत्महत्येति उत्तररामचरिते स्पष्टं भवति। तत्र अस्य उपनिषद्वचनस्य प्रभावात् जनकः आत्महत्यातः निवर्तते। तद्यथा- **'अन्धतामिस्रा ह्यसूर्या नाम ते लोकाः प्रेत्य तेभ्यः प्रतिविधीयन्ते स आत्मघातिन इत्येवमृषयो मन्यन्ते।'**[13] उपनिषदि तु कर्म कुर्वन् शतं वर्षाणि यावज्जीवनस्य निर्देशः प्रदत्तः। तद्यथा-

**'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः'**[14]

कर्म कुर्वन् जनः निराशः धनहीनश्च न भवति। तस्य सर्वाणि कार्याणि सिध्यन्ति। यथोक्तमन्यत्र-'उद्यमेन हि सिद्ध्यन्ति कार्याणि, न मनोरथैः।' ये कृषकाः आत्महत्यां कुर्वन्ति, तैरपि इदमवधेयम् उपनिषद्वाक्यम् अपि च 'त्याज्यं न धैर्यं विधुरेऽपि काले' इत्यपि मनसि रक्षणीयम्।

**अहङ्कारनिन्दा-** केनोपनिषदः हैमवत्युपाख्याने देवानामभिमाननिरासेन अहङ्कारस्य हेयता प्रतिपादिताऽस्ति। तत्र देवाः अहङ्कारवशीभूताः परब्रह्मणः श्रेष्ठत्वं न स्वीचक्रुः। ततः परब्रह्मेण स्थापितं तृणं प्रभावितं कर्तुं समर्थाः नाभूवन्। सर्वेषाम् अहङ्कारस्य निरासः जातः।

**गुरुजनानामादरः-** परिवारेषु यत्र गुरुजनानाम् आदरो भवति तत्र बालकेषु अनुशासनं भवति, बालानां चरित्रनिर्माणमपि भवति। परस्परं प्रेमापि वर्धते। एतस्मादेव कारणात् उपनिषत् गुरुजनेषु देवत्वमारोपयति। तद्यथा-**'मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव'**[15] इति।

एष उपदेशः सम्बन्धपोषकः अस्ति। अनेन वरिष्ठजनान् प्रति आदरभावोऽपि व्यज्यते। यदि जनाः गुरुजनान् देवान् स्वीकुर्युः तर्हि गुरुजनाः वृद्धाश्रमेषु दीनावस्थां न प्राप्नुयुः।

**शाश्वतोपदेशः-** केचन शाश्वतोपदेशाः उपनिषत्सु प्रदत्ताः सन्ति। यथा-**'सत्यं वद, धर्मं चर सत्यान्न प्रमदितव्यम् धर्मान्न प्रमदितव्यम्'**[16]

एते उपदेशाः सार्वभौमिकाः सार्वजनीनाश्च सन्ति। सत्येनैव संसारव्यवहारः सरति। धर्मस्य लक्षणं मनुस्मृतौ विद्यते-

**'धृतिः क्षमा दमो ऽस्तेयं शौचमिन्द्रियनिग्रहः।**
**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्।।'**[17]

लक्षणमिदं व्यापकं सार्वजनीनं चास्ति।

**छात्र-शिक्षकगुणाः-** तपः ब्रह्मचर्यं श्रद्धा धैर्यं च विद्यार्थिनाम् आवश्यकगुणाः। यथा प्रश्नोपनिषदि महर्षिः पिप्पलादः आगतान् ब्रह्मान्वेषमाणान् वदति- **'तान्ह स ऋषिरुवाच भूय एव तपसा ब्रह्मचर्येण श्रद्धया संवत्सरं संवत्स्यथ यथाकामं प्रश्नान्पृच्छत यदि विज्ञास्यामः सर्वं ह वो वक्ष्याम इति।।'**[18]

शिक्षकः अपि अनृतं न वदेत्। यदि ज्ञानं नास्ति तर्हि न संज्ञापयेत्। यथा- **'समूलो वा एष परिशुष्यति योऽनृतमभिवदति तस्मान्नार्हाम्यनृतं वक्तुं'**[19] गुरुभक्तिः देवभक्तिरिव महत्त्वपूर्णा भवति। यथा- **'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ'**[20]

**अलोभः-** भ्रष्टाचारः लोभकारणादेव वर्धते। लोभो न करणीयः। यतः धनं कस्यापि न भवति। अतः त्यागभावेन भोगः करणीयः। तद्यथा-

**'तेन त्यक्तेन भुंजीथा मा गृधः कस्य स्विद्धनम्'**[21]

लोभवशादेव तस्कराः दस्यवः चौराः जनहानिं कुर्वन्ति। लोभश्च अशम्यः, लोभस्य उपचारः त्याग एव।

**लक्ष्यैकचित्तता-** कार्यं समयेन करणीयम् 'दीर्घसूत्री मा स्यात्' चेत्याद्युपदेशानां बीजम् उपनिषदः निम्नलिखितवाक्ये विद्यते-

**'उत्तिष्ठत, जाग्रत, प्राप्य वरान्निबोधत'**[22]

लक्ष्यप्राप्तिपर्यन्तं न स्थातव्यमिति आशयः। यथोक्तं श्रीमता हनुमता-
राम काज कीन्हें बिनु, मोहि कहाँ विश्राम।।

**जीवनदिक्-** जीवनं असतः सतं प्रति, अज्ञानान्धकारात् ज्ञानप्रकाशं प्रति, मृतेः अमरत्वं प्रति सरेत्। तद्यथा-

**'असतो मा सद्गमय, तमसो मा ज्योतिर्गमय, मृत्योर्मा अमृतं गमय'** [23]

द्वेषराहित्यम्-परस्परं द्वेषभावः मा भवेत्-**'मा विद्विषावहै'**[24]

भेददृष्ट्या द्वेषः वर्धते। उपनिषत् एकत्वभावस्योपदेशं करोति। एकत्वभाव दर्शनेन मोहः शोको वा न भवति। तद्यथा-

**'यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः।**
**तत्र को मोहः कः शोक एकत्वमनुपश्यतः।।'**[25]

सुमतिः यत्र भवति तत्र सर्वाः सम्पदः आयान्ति। यथोक्तम् 'जहाँ सुमति तहँ सम्पति नाना'।

**प्रेमभावः-** प्राणिमात्रं प्रति प्रेमभावस्य उपदेशः ईशावास्योपनिषदि प्राप्यते, यथा-

**'यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।**
**सर्वभूतेषु चात्मानं ततो न विजुगुप्सते।।**[26]

एतदेव विशेषणं रामायणे रामस्य कृते प्रयुक्तमस्ति, यथा-'सर्वभूतहिते रतः'।

**शिक्षा-** अस्माकं शिक्षा ज्ञानं पठितम् अधीतं वा सबलं सफलं च भवेत्। यथा-

**'तेजस्वि नावधीतमस्तु'**[27]

अस्माकं शिक्षा न केवलम् अस्य लोकस्य भोगानां कृते अपि तु अमृतत्वफलप्राप्तये भवति। यथा-**'विद्ययाऽमृतमश्नुते।**[28]

सततं स्वाध्यायः करणीयः, स्वाध्याये प्रमादः न करणीयः। यथा- **'स्वाध्यायान्मा प्रमदः स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्'**[29]

**सहभावः-** उपनिषदि सहभावः काम्यः। अनया भावनया स्वार्थपरताया निरासो भवति मित्रभावश्च जागर्ति। संगठने शक्तिर्भवति इत्यपि लोके प्रसिद्धमस्ति। उपनिषद्वाक्यं द्रष्टव्यम्- **'सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै।**[30]

तैत्तिरीयोपनिषदि भावोऽयं विद्यते यत् आवयोः कीर्तिः ब्रह्मवर्चसं च वर्धेताम्। तद्यथा- **'सह नौ यशः, सह नौ ब्रह्मवर्चसम्।**[31]

**धैर्यादिप्रशंसा-** धीरः प्रेयसः श्रेयः अभिवृणीते। धैर्यवान् श्रेयः प्राप्नोति इत्याशयः। तद्यथा-**'श्रेयो हि धीरोऽभि प्रेयसो वृणीते।'**[32]

दुराचारात् अनुपरतः, इन्द्रियलौल्यात् अनुपरतः, समाधिमनास्थितोऽपि, अशान्तचित्तोऽपि च न आत्मानं प्राप्नोति। तद्यथा-

**'नाविरतो दुश्चरितान्नाशान्तो नासमाहितः।**
**नाशान्तमानसो वापि प्रज्ञानेनैनमाप्नुयात्।।'**[33]

**जीवनमूल्यम्-** पापान्निवृत्तिः, पुण्यकर्मसु प्रवृत्तिः भवेत्। उपदेशोऽयमुदाहरणद्वारा उपनिषदा प्रदत्तः। तद्यथा- **'यथा वृक्षस्य सम्पुष्पितस्य दूराद् गन्धो वात्येवं पुण्यस्य कर्मणो दूराद् गन्धो वाति।'**[34]

इतरेऽपि भारतीयसंस्कृतेः जीवनमूल्यानि यथा इन्द्रियनिग्रहः, दानं, दया चेति उनपिषदि उपदिष्टानि सन्ति। तद्यथा- **'अथ हैनमसुरा ऊचुर्ब्रवीतु नो भवानिति तेभ्यो हैतदेवाक्षरमुवाच द इति व्यज्ञासिष्टा इति व्यज्ञासिष्टेति होचुर्दयध्वमिति न आत्थेत्योमिति होवाच व्यज्ञासिष्टेति तदेतदेवैषा दैवी वागनुवदति स्तनयित्नुर्द द द इति दाम्यत दत्त दयध्वमिति तदेतत् त्रयं शिक्षेद् दमं दानं दयामिति।।'**[35]

**तैत्तिरीयोपनिषदि उपदिष्टम् अस्ति यत् स्वाध्यायप्रवचनाभ्यां सह ऋतं, सत्यं, तपः, शमः, अतिथिसेवा, मानवानां सेवा, सुप्रजानिर्माणं करणीयानि एतदेव तपः।**[36]

**अन्नप्रशंसा-** मानवस्य प्रथमा आवश्यकता अस्ति भोजनम्। तत्पूर्तये मुख्यं साधनमस्ति अन्नम्। अन्नस्य महत्त्वं बहुशः वर्णितम् उपनिषत्सु। किं बहुना तत्र तु उक्तं यत् अन्नं ब्रह्मेति। अन्नस्य निन्दा न करणीया। अन्नस्य त्यागः न करणीयः। अन्नस्य वर्धनं करणीयम्। बहु अन्नं प्राप्नुयात्। तद्यथा-

**'अन्नं न निन्द्यात्, अन्नं न परिचक्षीत, अन्नं बहु कुर्वीत'**[37]

**अहिंसा-** भारतीयपरम्परायाम् विशेषरूपेण जैनमते 'अहिंसा परमो धर्मः' इति घोषः प्रायः श्रूयते। एतस्य बीजं विद्यते उपनिषदि। तत्र तपः दानं सरलता अहिंसा सत्यभाषणं चेति दक्षिणास्वरूपेण विद्यन्ते। यथा-

**'अथ यत्तपो दानमार्जवमहिंसा सत्यवचनमिति ता अस्य दक्षिणाः।'**[38]

सत्यभाषणस्य प्रशंसा सर्वत्र विद्यते। उपनिषद्वाक्यमिदं तु भारतवर्षस्य ध्येयवाक्यमपि विद्यते। तच्चेदम्-**'सत्यमेव जयते, नानृतम्'**[39]

**अध्यात्मज्ञानम्-** उपनिषदां मुख्यं निरूपणीयम् अध्यात्मज्ञानमस्ति। भौतिकवस्तूनि ऐकान्तिकात्यन्तिकमानन्दं न जनयन्ति। अध्यात्मज्ञानेनैव जनः सांसारिकेभ्यः दुःखादिभ्यः मोक्षं प्राप्नोति। अध्यात्मज्ञानं च उपनिषदध्ययनेन जायते।

**प्रासङ्गिकविषयाः-** साम्प्रतं भारतसर्वकारेण 'स्किल इण्डिया' कार्यक्रमः प्रचाल्यते। कौशलविकासकार्यक्रमाः सम्प्रति प्रचलन्ति। विषयेऽस्मिन् उपनिषदः निम्नलिखितं वाक्यं द्रष्टव्यम्-**'कुशलान्न प्रमदितव्यम्'**[40]

'गरीबी हटाओ आन्दोलन' इत्यत्र सर्वे जनाः ऐश्वर्यसम्पन्नाः भवन्तु इति आशयः। एतदपि उपनिषदि निम्नलिखितरूपेण विद्यते-**'भूत्यै न प्रमदितव्यम्'**[41] वयं सन्मार्गे चलेम। उपनिषदि एतद्वाक्यं विद्यते-

**'अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्'**[42]

हिन्दी भाषायामपि एकं गीतं विद्यते-

हम चलें नेक रस्ते पे हमसे भूलकर भी कोई भूल हो ना.....!!!

**अनुकरणम्-** गुरुजनानां वरिष्ठजनानां शुभकर्मणामेव सेवनं करणीयं भवति, अशुभकर्मणां न। अपि च शुभाचरणानामेव अनुकरणं करणीयम्, अशुभाचरणानां न करणीयम्। तद्यथा- **'यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि। यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि। नो इतराणि।'**[43]

लोके श्लोकोऽभिगीयते-

**'सर्वोपनिषदो गावः दोग्धा गोपालनन्दनः।**
**पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्।।'**

गीतासदृशम् अमृतं यस्मात् प्राप्तं तत्साहित्यमस्ति उपनिषत्साहित्यम्। उपनिषदां ज्ञानं गोक्षीरवदुपयोगि वर्तते। तत्र लोकोपयोगिनी शिक्षा विद्यते। लौकिकसम्बन्धाः, अतिथिसत्कारः, आत्महत्याया निवारणम्, अहङ्कारादिदुर्गुण-निन्दा, गुरुजनानामादरः, शाश्वतोपदेशाः, छात्रशिक्षकगुणाः, लोभत्यागः, लक्ष्यं प्रति समर्पणभावः, जीवनदिक्, द्वेषराहित्यम्, प्रेमभावः, शिक्षा, धैर्यादिप्रशंसा, जीवनमूल्यानि, अन्नमहत्त्वम्, अहिंसादिगुणाः, अध्यात्मज्ञानम्, सदाचरणानुकरणम्, किमधिकं साम्प्रतिकविषयाणां बीजानि अपि उपनिषत्सु प्राप्यन्ते। उपनिषदां लोकोपदेशकरूपेण अध्ययनं क्रियते चेत् लोकोपयोगिनी शिक्षा प्राप्यते। अनेन च लोकस्य नैकासां समस्यानां समाधानं भवितुमर्हति। उपनिषदः मुख्यरूपेण आत्मविद्याया उपदेशिकाः सन्ति तथापि उपनिषदेव कथयति- 'विद्यां चाविद्यां च' 'सम्भूतिं च विनाशं च'। अतः उपनिषदां लोकोपदेशपरिप्रेक्ष्येऽनुशीलनमपेक्षितम्। इतिदिक्।

**सन्दर्भाः-**


1. *मनुस्मृतिः, 2.7*
2. *तैत्तिरीयोपनिषद्, 1.3.8*
3. *कठोपनिषद्, 1.1.3*
4. *कठोपनिषद्, 1.1.10*
5. *बृहदारण्यकोपनिषद्, 4.5.6*
6. *छान्दोग्योपनिषद्, 4.4.9*
7. *तैत्तिरीयोपनिषद्, 1.3.6*
8. *कठोपनिषद्, 1.1.7*
9. *मनुस्मृतिः, 3.101*
10. *कठोपनिषद्,1.1.9*
11. *तैत्तिरीयोपनिषद्, 1.10.1*
12. *ईशावास्योपनिषद्, 3*
13. *उत्तररामचरितम्, 4.4 पूर्व*
14. *ईशावास्योपनिषद्, 2*
15. *तैत्तिरीयोपनिषद्, 1.11.2*
16. *तैत्तिरीयोपनिषद्, 1.11.1*
17. *मनुस्मृतिः, 6.92*
18. *प्रश्नोपनिषद्, 1.2*
19. *प्रश्नोपनिषद्, 6.1*
20. *श्वेताश्वतरोपनिषद्, 6.23*
21. *ईशावास्योपनिषद्, 1*
22. *कठोपनिषद्, 1.3.14*
23. *बृहदारण्यकोपनिषद्, 1.3.28*
24. *कठोपनिषद्,2.3.19*
25. *ईशावास्योपनिषद्, 7*
26. *ईशावास्योपनिषद्, 6*
27. *कठोपनिषद्, 2.3.19*

*28. ईशावास्योपनिषद्,11*

*29. तैत्तिरीयोपनिषद्, 1.11.1*

*30. कठोपनिषद्, 2.3.19*

*31. तैत्तिरीयोपनिषद्, 1.3.1*

*32. कठोपनिषद्, 1.2.2*

*33. कठोपनिषद्, 1.2.24*

*34. महानारायणोपनिषद्, अनुवाक 9*

*35. बृहदारण्यकोपनिषद्, 5.2.3*

*36. तैत्तिरीयोपनिषद्, 1.9*

*37. तैत्तिरीयोपनिषद्, 3.7-9*

*38. छान्दोग्योपनिषद्, 3.17.4*

*39. मुण्डकोपनिषद्, 3.1.6*

*40. तैत्तिरीयोपनिषद्, 1.11.1*

*41. तैत्तिरीयोपनिषद्, 1.11.1*

*42. ईशावास्योपनिषद्, 18*

*43. तैत्तिरीयोपनिषद्, 1.11.2*

**सन्दर्भग्रन्थाः-**

*1. ईशादि नौ उपनिषद्, गीताप्रेस गोरखपुर, सप्तमं पुनर्मुद्रणम्, वि.सं. 2066*

*2. छान्दोग्योपनिषद्, श्री कैलास आश्रम शताब्दी समारोह महासमिति, कैलास गेट, ऋषिकेश (उत्तराखण्ड), प्रथमं संस्करणं, 1983*

*3. बृहदारण्यकोपनिषद्, गीताप्रस गोरखपुर, सप्तमं संस्करणं, वि.सं. 2052*

●●●

# 9

# ईशावास्योपनिषदि तत्त्वज्ञानाचारमीमांसानां विश्लेषणात्मकं अध्ययनम्

*सूर्यभानयादवः*

ईशावास्योपनिषद् स्वल्पाकारा अपि सती गम्भीरां समग्रां च दार्शनिकीम् व्यवस्थां प्रतिपादयति। एतत् शोधपत्रं तर्कयति यत् अस्याः महत्त्वं ज्ञान (आध्यात्मिकज्ञान), तत्त्व (वास्तविकतायाः स्वरूपः) आचारः (नैतिकः आचरणम्) इति त्रिषु मूलभूतेषु क्षेत्रेषु सहजः समन्वयः एव अस्ति। अन्येभ्यः ग्रन्थेभ्यः भिन्नाः ये एकं द्वितीये प्राधान्यं ददति, ईशावास्योपनिषद् तानि परस्परं अनिवार्याणि इति मन्यते। अस्य मन्त्राणां व्याख्यात्मकेन विश्लेषणेन, मूलसंस्कृतसन्दर्भैः सह, एषा उपनिषद् एकां सुसङ्गतां विश्वदृष्टिं प्रतिष्ठापयति यत्र वास्तविकतायाः यथार्थबोधः (तत्त्वम्) अपरिहार्यरूपेण व्यक्तेः क्रियाशीलताम् (आचारम्) सूचयति रूपान्तरयति च, यः पुनः मनः शुद्धीकृत्य मुक्तिदायकज्ञानस्य प्राप्त्यै मार्गं प्रशस्तयति। एतेषां त्रयाणां सामञ्जस्यं सार्थकस्य मानवजीवनस्य सारं प्रस्तौति।

वेदान्तपरम्परा प्रायः मोक्षस्य एकमात्रसाधनरूपेण मुख्यतया आध्यात्मिकज्ञाने (ज्ञान) केंद्रिता इति मन्यते। ईशावास्योपनिषद्, शुक्लयजुर्वेदस्य अन्तिमः भागः भूत्वा, एतादृश्यां कस्याञ्चित् एकपक्षीयायां व्याख्यायां आह्वानं करोति। सा मौलिकेन उद्घोषणेन आरभ्यते या संसारस्य स्वामित्वं ईश्वरेण सह योजयति तत्क्षणमेव तस्यैव सत्यस्य आधारेण आचरणस्य पद्धतिं निर्धारयति च। सा एता–शस्य ग्रन्थस्य आधारं निर्माति यत्र सत्तामीमांसा, ज्ञानमीमांसा नीतिशास्त्रं च पृथक् पृथक् विषयाः न, अपितु एकीकृत दृष्टेः अन्तर्गतं गुम्फितानि सूत्राणि सन्ति। एतत् पत्रं निम्नलिखितैः बिन्दुभिः एतां दृष्टिं विश्लेषयिष्यति –

1. तत्त्वमीमांसा - परमसत्तायाः अन्तर्व्यापी अतीन्द्रियं च स्वरूपम्।

2. ज्ञानमीमांसा - तस्य ज्ञानस्य प्रकृतिः लक्ष्यं च यत् मोक्षं प्रति नयति।

3. आचारमीमांसा - धार्मिकाचरणस्य संरचना या संसारं व्यक्तिं च पोषयति।

**1. तत्त्वमीमांसाः**

उपनिषदः सत्तामीमांसा अस्य प्रथमे एव शब्दे 'ईशावास्यम्' इति प्रतिष्ठिता भवति। मूलभूता वास्तविकता 'ईशः' (भगवान्) अस्ति, यः समग्रं ब्रह्माण्डं व्याप्य (आवास्यम्) तिष्ठति। एतदेव सूचयन्नियमेषावास्योपनिषदः प्रथमः मन्त्रः **''ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।'' (ईशावास्योपनिषद् 1)**

''अस्मिन् सकले विश्वब्रह्माण्डे यत्किञ्चित् एषः चञ्चलः जगत् अस्माकं दर्शनश्रवणयोः आगच्छति, तत्सर्वम् ईशा (भगवान्) व्याप्नोति।'' एषः मूलभूतः मन्त्रः अद्वैतां किन्तु गतिशीलां वास्तविकतां प्रतिष्ठापयति। संसारः (इदं सर्वं) भ्रमः न, अपितु दिव्यस्य निवासस्थानम् अस्ति। एषः अन्तर्व्यापी दृष्टिकोणः परवर्तिमन्त्रेषु सम्पूर्णतया अतीन्द्रियेण वर्णनेन संतुलितः भवति। परमात्मा अन्तः बहिः च उभयरूपेण वर्णितः अस्ति। यः मनुष्यः ते उभे (विद्या-अविद्ये) ज्ञानस्य तत्त्वं कर्मणः तत्त्वं च सहैव यथार्थतया जानाति, सः कर्मणाम् अनुष्ठानेन मृत्युं तीर्त्वा ज्ञानस्य अनुष्ठानेन अमृतम् अश्नुते। तत्त्वं वास्तविकतायाः वा यथार्थस्वरूपम्, एवं एकः संश्लेषः अस्ति - एका चेतना (ईशः) अनेकेषु रूपेषु प्रकटते, तथापि अलिप्ता अतीन्द्रिया च तिष्ठति। एषः द्वन्द्वः जीवनप्रति उपनिषदः दृष्टिकोणं बोधयितुं महत्त्वपूर्णः अस्ति। संसारं ईशात् पृथक् द्रष्टुम् अज्ञानम् अस्तिय तं केवलं भौतिकं मत्वा ईशस्य निवासं न मन्यते इति जीवननिराशावादिता भूलः अस्ति।

**2. ज्ञानमीमांसाः**

ईशावास्योपनिषद् द्वयोः ज्ञानप्रकारयोः मध्ये महत्त्वपूर्णं भेदं करोति - 'विद्या' (आध्यात्मिकज्ञान) 'अविद्या' (सांसारिकज्ञान) च। मुक्त्यै उभयोः आवश्यकता अस्ति, किन्तु तेषां लक्ष्याणि उद्देश्याः च भिन्नाः सन्ति। ''विद्यां चाविद्यां च यस्तद्वेदोभयं सह। अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते।।'' (ईशावास्योपनिषद् 11)

''यः व्यक्तिः विद्याम् अविद्यां च उभयं सह जानाति, सः अविद्यया मृत्युं (सांसारिकबन्धनम्) तीर्त्वा विद्यया अमरतां (मोक्ष) प्राप्नोति।''

'अविद्या' अत्र सांसारिकज्ञानस्य द्योतिका - विज्ञानं, कला, अनुष्ठानानि (कर्मकाण्ड) यानि संसारे (संसार) जीवनयापनं तत्पालनं च आवश्यकानि सन्ति।

विद्या एकस्य, अद्वैतस्य आत्मनः ज्ञानम् अस्ति, यः ब्रह्मणा सह एकः अस्ति। साधकेन सांसारिकअस्तित्वस्य 'मृत्यु' तरितुं सांसारिकजीवनस्य (अविद्या) साधनानि उपयोक्तव्यानि, ततः साक्षात् आत्मज्ञानेन (विद्या) सह, अमरतां प्राप्तव्या। ईशावास्योपनिषदि उक्तम् अस्ति यत् केवलम् एकम् एव प्राप्तुं प्रयत्नः न कर्तव्यः अपितु द्वितीयस्य उपेक्षा न कर्तव्या।

**''अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।**
**ततो भूय इव ते तमो य उ विद्यायां रताः।।''** (ईशावास्योपनिषद् 9)

ये जनाः केवलाम् अविद्याम् (सांसारिकज्ञान) उपासते, ते अन्धकारं प्रविशन्तिय ये च केवलं विद्यायाम् (आध्यात्मिकज्ञान) एव रताः, ते तस्मात् अपि अधिकं गहनंअन्धकारं प्रविशन्ति। यः व्यक्तिः केवलं सांसारिकज्ञने (अविद्या) लिप्तः अस्ति, सः आध्यात्मिकरूपेण अन्धः अस्ति। यः तु सर्वाणि सांसारिककर्तव्याणि दायित्वानि च त्यक्त्वा केवलम् अतीन्द्रियस्य (विद्या) अन्वेषणं करोति, सः असंतुलनं तस्यैव वास्तविकतायाः विलग्नतां च गहने अन्धकारे पतति यस्य ज्ञानस्य इच्छां धारयति - सा वास्तविकता या संसारं व्याप्य तिष्ठति।

**3. आचारमीमांसाः**

उपनिषदः सत्तामीमांसा ज्ञानमीमांसा च साक्षात् एकां दृढां नैतिकीं संहितां (आचार) अनूद्यते। प्रथमः मन्त्रः आचरणस्य केन्द्रीयेन निर्देशेन सह समाप्यते -

**''तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम्।''** (ईशावास्योपनिषद् 1)

''अस्मिन् मन्त्रे भौतिकवस्तूनि त्यक्तानि अर्पितभावेन वा भोक्तव्यानिय कस्यचित् अपि धनस्य लोभं मा कार्षीः।'' इदं ज्ञात्वा यत् सर्वम् ईशेन व्याप्तम् अस्ति, व्यक्तिः त्यागस्य (त्याग) भावनया सह जीवनस्य प्रसादानाम् आस्वादनं कर्तव्यम्। अन्यस्य वस्तूनां लोभं कर्तुम् केवलं सामाजिकः अपराधः एव न, अपितु दार्शनिकी त्रुटिः अपि अस्ति - एतत् स्वीकारे असफलता यत् सर्वं धनं अन्ततः कस्यचित् व्यक्तेः न, अपितु ईशस्य एव अस्ति। अनासक्तेः एषः सिद्धान्तः त्यागेन च आस्वादनम् अस्य आचारस्य आधारस्तम्भः अस्ति।

अस्य अतिरिक्तं, उपनिषद् फलस्य इच्छां विना कृतानां, संतुलितानां कर्मणां जीवनस्य समर्थनं करोति।

**''कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।''** (ईशावास्योपनिषद् 2)

''निश्चितेन कर्माणि कुर्वन् एव त्वं शतं वर्षाणि यावत् जीवितुम् इच्छेत।''

एषा संसारे जीवनस्य शक्तिशालिनी पुष्टिः अस्ति। लक्ष्यं संसारात् पलायनं न, अपितु जागृतसहभागिता अस्ति। व्यक्तिः पूर्णायुः जीवितुं, सक्रियरूपेण स्वकर्तव्याणां (स्वधर्म) पालनं कर्तुं प्रोत्साहितः, किन्तु यथार्थबोधेन सह। अग्रिमा पङ्क्तिः, ''एवं त्वयि नान्यथेतोऽस्ति'' (''त्वयि एतस्मात् अन्यः मार्गः न अस्ति''), इदम् अधःकरोति यत् अनासक्तकर्मणः एषः मार्गः गृहस्थस्य —ते एकमात्रः व्यवहार्यः मार्गः अस्ति।

**निष्कर्षः**

ईशावास्योपनिषद् एकं समग्रम् आध्यात्मिकं पाठ्यक्रमं प्रस्तौति यत्र ज्ञानं, तत्त्वम् आचारः च पूर्णसामञ्जस्ये स्तः।

**1. तत्त्वम् -** आचारं सूचयति। इदं ज्ञानं यत् 'ईशा वास्यम् इदं सर्वम्' (इदं सर्वम् ईश्वरेण व्याप्तम् अस्ति) अनासक्तेः, त्यागस्य, सर्वेषु प्राणिषु दिव्यं द्रष्टुं नैतिकतायाः आधारः अस्ति। व्यक्तेः आचरणं वास्तविकतायाः यथार्थस्वरूपे निहितम् अस्ति।

**2. आचारः -** ज्ञानाय भूमिं तयति। कर्मयोगस्य अनुशासितं जीवनम् - लोभं विना, शतं वर्षाणि यावत् कर्तव्याणां पालनं - मनः शुद्धयति (चित्तशुद्धिः), अहंकारं नाशयति, सर्वोच्चज्ञानस्य (विद्या) उदयाय आवश्यकां मानसिकां शान्तिं उत्पादयति च।

**3. ज्ञानम् -** तत्त्वम् आचारं च उभयं प्रकाशयति। आत्मनः (आत्मज्ञान) परमानुभूतिः तत्त्वमीमांसिकसत्यस्य अन्तिमा पुष्टिः अस्ति। एतत् शेषाणां सर्वाणाम् क्रियाणां तस्य सत्यस्य एकां सहजां, सरलां अभिव्यक्तिं रूपान्तरयति, यत्र कर्ता, क्रिया फलं च भेदः एकतायाः प्रकाशे लीयते।

ईशावास्योपनिषद् एकया प्रार्थनया सह समाप्यते या अस्तित्वस्य एतस्यैकी—तावस्थायाः समाहारं करोति - एका एषा अवस्था यत्र व्यक्तिः सत्यं बुबुधे, अतः स्वाभाविकरूपेण ब्रह्माण्डीयव्यवस्थया सह संरेखितः भवति।

''ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।
ॐ शान्तिः शान्तिः शान्तिः।''

''ॐ, सः (ब्रह्म) पूर्णः अस्ति, इदं (जगत्) पूर्णः अस्ति, पूर्णात् पूर्णः उद्भवति। पूर्णस्य पूर्णं आदाय पूर्णः एव अवशिष्यते। ॐ, शान्तिः, शान्तिः, शान्तिः।''

अस्यां दृष्टौ, साधकः, संसारः परमा च वास्तविकता सर्वे एकस्य अविभाज्यस्य, सामञ्जस्यपूर्णस्य समग्रस्य अंशाः सन्ति। ईशावास्योपनिषद्, अतः, एता–शस्य अध्यात्मवादस्य कालातीता साक्षीति तिष्ठति यः गम्भीरतया दार्शनिकः, अत्यधिकं व्यावहारिकः गम्भीरतया च नैतिकः अस्ति, यः ज्ञानशान्तिपूर्णतानां जीवनाय रूपरेखां प्रददाति।


**ग्रन्थसूचीः**

**प्राथमिकस्रोतः**

ईशावास्योपनिषद् (शाङ्करभाष्यसहित)। गोरखपुरः गीताप्रेस।

ईशावास्योपनिषद् मंत्र (1)

ईशावास्योपनिषद् मंत्र (2)

ईशावास्योपनिषद् मंत्र (9)

**द्वितीयकस्रोतः**

राधाकृष्णन्, एस. (1953). 'द प्रिन्सिपल उपनिषद्'। लण्डनः जार्ज एलन् एण्ड अन्विन लिमिटेड्।

गम्भीरानन्द, स्वामी. (अनु.). (1989). 'एट उपनिषद्स, खण्ड 1'। कोलकाताः अद्वैताश्रमः।

हिरियण्ण, एम्. (1993). 'आउट्लाइन्स् ऑफ् इण्डियन फिलॉसफी'। दिल्लीः मोतीलाल बनारसीदास पब्लिशर्स।


●●●

# 10

# ज्ञानमूला हि उपनिषदः

*जागेश्वरपटले,*
*अवधेशकुमारश्रोत्रियः*

विद् ज्ञाने इति ज्ञानार्थकाद् विद्धातोर्घञि प्रत्यये कृते वेद इति रूपं निष्पद्यते। अर्थात् वेदशब्दो ज्ञानार्थकः। किं वा ज्ञानराशिर्वेद इति वक्तुं शक्यते। विद् सत्तायां विद्विचारणे, विदलृ लाभे विद् चेतनाख्याननिवासेषु इति धातुभ्योऽपि घञि वेदरूपं निष्पद्यते। वेदा ज्ञानराशित्वात् शाश्वतस्थायिनः ज्ञाननिधयः मानवहितप्रापकाः मनुष्यकर्तव्यबोधका इति विविधधात्वर्थग्रहणाद् ज्ञायते। वेदाः भारतीयधर्मस्य मूलमस्ति। वेदानाम् अत्यन्तं महत्त्वपूर्णानां मर्मस्थलानां विवेचनमुपनिषत्सु अभूत्। वेदस्य रहस्यं विज्ञातुमुपनिषदां ज्ञानमावश्यकमिति। वेदाः भारतीयज्ञानविज्ञानयोः उद्‌गमकेन्द्रं विद्यते, तस्य महत्त्वपूर्णस्थलानां विस्तार उपनिषत्सु अभूत्। आत्मविद्यायाः ब्रह्मविद्यानां रहस्यानां विवेचनमुपनिषत्सु अभवत्। उपनिषद्‌शब्दस्याशयोऽस्ति ब्रह्मविद्या। उपनिउपसर्गपूर्वकात् सद् धातोः क्विप् प्रत्यये कृते सति उपनिषद् शब्दः निष्पद्यते ।सद् धातोः त्रयोऽर्थास्सन्ति यथा- 1.विशरणम् (विनाशः) 2. गतिः 3. अवसादनम्। तदाधारेण उपनिषद् शब्दस्यार्थोऽस्ति – या विद्या पापतापयोः विशरणं कुर्यात्। सत्यं ज्ञानं दद्यात् अविद्यायाः अवसादयेत् (अवसादनं कुर्यात् ) सा उपनिषदिति। उप सामीप्येन नि-नितरां प्राप्नुवन्ति परं ब्रह्म यया विद्यया सा उपनिषद्। अष्टाध्यायामपि जीविकोपनिषदावौपम्ये[1] ''उपनिषद् कृत्य गतः'' इत्यनेनोपनिषद् शब्दोऽपि परोक्षेऽथवा रहस्यार्थे प्रयुक्ततोऽस्ति। अमरकोषेऽपि ''धर्मे रहस्युपनिषत् स्यात्''[2] अर्थात् उपनिषद् शब्दः गूढधर्मस्यार्थे रहस्यार्थे च प्रयुक्ततोऽस्ति। उपनिषद् शब्दस्यापरोऽर्थोऽपि विद्यते उप (व्यवधानरहितम्), नि=सम्पूर्णम्, षद् (ज्ञानम्) अर्थात् व्यवधानरहितं सर्वाङ्गपूर्णं सम्पूर्णज्ञानमिति।

उपनीय तमात्मानं ब्रह्मापास्तद्वयं यतः। निहन्त्यविद्यां तज्जन्यं तस्मादुपनिषद्भवेत् ।।[3] अर्थात् उपनितरां सादयति विनाशयतीत्युपनिषद् । या विद्या ब्रह्मसन्निकटं नीत्वा अविद्यामूलं क्लेशं नाशयेत्, सा एव उपनिषद् ।

ब्रह्मविद्याऽधिगमस्यैकमात्रसाधनरूपाः मोक्षस्य श्रेष्ठोपायाः पुनरुपनिषद एव प्रधानवृत्त्या पराविद्यापदेन कीर्त्यन्ते । ब्रह्मास्वादे वेद्यान्तरस्पर्श-शून्यतानिवार्या-परिहार्या चास्ति । मुक्तिमभिलषन्धीरः मानवः प्रेयोमार्गं त्यक्त्वा श्रेयोमार्गं गृह्णाति, अज्ञानमार्गं विहाय ज्ञानमार्गेण प्रयाति । उपनिषदि उल्लिखितम् –

हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम्। तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः ।।[4] ज्ञानेन मानवःतां सर्वोच्चावस्थां लभते यत्राकांक्षाः सर्वाः विनश्यन्ति । तत्र न तु यज्ञाहुतयः न वा ज्ञानशून्यतपस्विजनाः अपि गच्छन्ति । यतः ज्ञानशून्यः जनः तं लोकं न प्राप्नोति न कर्मणा न तु तपसाऽपि ।

मैक्समूलरमहोदयानुसारेण उपनिषच्छब्दस्य चत्वार अर्थाः प्रसिद्धाः - 1. गुह्या रहस्यमयी अनृता वा व्याख्या 2. अनया व्याख्यया प्राप्तं ज्ञानम् 3. ज्ञानेनानेन प्राप्तज्ञानवते वर्तनीयः नियमो व्रतो वा 4. तत्प्रतिपादकाः ग्रन्थाः । उपनिषदां भारतीयसंस्कृत्याविच्छिन्नः सम्बन्धः। आसामध्ययनेन संस्कृतेराध्यात्मिकं स्वरूपं ज्ञातं भवति। आसामुपनिषदामुदात्तचिन्तनानां धार्मिकानुभूतीनामाध्यात्मिकभावनानां प्रधानवैशिष्ट्यमस्ति रहस्यात्मकत्वम्। पाश्चात्यविदुषः डायसनमहोदयस्य मतमस्ति यत् उपनिषच्छब्दस्य आशयः रहस्यात्मकः गुप्तो वा अर्थोऽस्ति। उपनिषच्छब्दस्यायमर्थः उपनिषत्सु एव अनेकेषु स्थलेषु लिखितो वर्तते। गुह्या आदेशाः[5] परमं गुह्यम्[6],वेद गुह्योपनिषत्सु गूढम्[7],गुह्यतमम्[8] उपनिषदं रहस्यं यच्चिन्त्यम्[9]

उपनिषदां महत्ता सार्वभौमतायां विद्यते। उपनिषदां जीवनदर्शनं सार्वभौमधर्मस्य स्वरूपं प्रतिपादयति । शोपनहारमहोदयः तद्विषये उक्तवान् –

In the world there is no study so beneficial and so elevating as that of the Upanisads.They are the product of the highest wisdom (Ausgehunt der hochsten weisheit LOC. cit IL page 428)

It has been the solace of my life]it will remain the solace of my death. (P. 425)

It is destined ]sooner or later]to become the faith of the people. LOC (cit I page 59)

अर्थात् संसारे एतादृशम् अध्ययनं नास्ति यत् उपनिषद इव उपयोगिन्यः स्युः, उन्नतिं नेतुमग्रगण्याःस्युः। ता उपनिषदः उच्चतमबुद्धेः परिणामास्सन्ति। उपनिषद्भिः मह्यं जीवने शान्तिः मिलति। आभि उपनिषद्भिः मृत्युसमये आत्मिकशान्तिः प्राप्स्यति। एकस्मिन् दिने उपनिषच्छक्षा मानवसमाजस्य शिक्षायाः केन्द्रं भविष्यति। केषाञ्चित् महापुरुषाणां दार्शनिकाञ्च उपनिषदां विषये तेषां विचाराः प्रस्तूयन्ते।

1. **स्वामी विवेकानन्दः एकदा स्वकीये भाषणे एवमाह -** दृयावदहं उपनिषदः वाचयामि तावद् मम नेत्राभ्याम् अश्रूणि प्रवहन्ति। एषः कियान् महानभिप्रायः। अस्माकं कृते एतदावश्यकं यत् उपनिषत्सु सन्निहिततेजस्विता स्वकीये जीवने विशेषरूपेण धारणीया। अस्मभ्यं प्रबलता आवश्यकी। विना प्रबलता न किमपि निर्वोढुं शक्यते। एषा प्रबलता कुतः प्राप्येत। उपनिषद एव प्रबलताया आकरभूताः। तासु एतादृशी प्रबलता निर्भरास्ति। या सम्पूर्णस्य विश्वस्य बलम्, शौर्यम् एवं नवजीवनं प्रदातुं सक्षमाऽस्ति ज्ञानेन तथा उच्चभावनाभिः युक्तमिति। यदा वयं एताः पठामः तदा भारतवर्षस्य दिव्यं वातावरणं अस्मान् परितः प्रसृतं भवति। एवं तेषां रचयिता ऋषिः अस्माकं हृदये प्रविष्ट इति प्रतीतिः जायते। उपनिषदां सदृशम् आत्मानमुन्नतं नेतुं तज्ज्ञानं संसारे अन्यत्र कुत्रापि नास्ति। ममात्मानः अस्मिन् जीवने उपनिषद्भ्य एव शान्तिः प्राप्ता। एवं चिन्तयामि यत् आभ्य एव। मृत्यो अनन्तरमपि शान्तिः प्राप्नुयादिति।[10]

2. वेदानां सुप्रसिद्धविद्वान् प्रो. मैक्समूलरमहोदयः स्वकीये पुस्तके "India what can it teach us" इत्यस्मिन् एवमलिखत्[11]- मृत्योः भयात् रक्षितुं, मृत्युमुद्दिश्य पूर्णशक्त्या सज्जतायै तथा सत्यं ज्ञातुमिच्छुकाय जिज्ञासवे उपनिषद अतिरिच्य न कोऽप्यन्यः श्रेष्ठो मार्गः मम दृष्टौ वर्तते। उपनिषदां ज्ञानात् मह्यं स्वकीये जीवनस्योत्कर्षे महती सहायता प्राप्तास्ति। अहं तेषामृणी अस्मि।

3. स्वीडन् राज्यस्य मनीषी प्रो.पाल डयूसन् अलिखत्[12]- उपनिषदः मनुष्यस्य महत्याः मेधाया अमूल्यं फलं भवति। जीवनस्य मृत्योः सुखदुःखयोश्च प्रत्येकपरिस्थितौ सदा आभिः द्वारा एतादृशी शान्तिः प्राप्यते। या अन्यत्र कुत्रापि

नोपलभ्यते। आत्मज्ञानस्य तथा आत्मशान्त्या एतदेक एतादृशः कोषः भवति। यादृशः संसारे अन्यत्र कुत्रापि अवलोकयितुं न शक्यते। अहं भारतेषु यात्रायां गतवान् आसम्, तत्र मया बह्वधिकं प्राप्तम्, किन्तु सर्वाधिकबहुमूल्यविभूतिः या मया आसादिता सा पवित्र-संस्कृत-भाषाया-मृषीणां दिव्यज्ञानात् उपनिषदः, कस्यापि देशस्य, जातेः, धर्मस्य, सम्प्रदायस्य वा विना भेदं प्रत्येकं दीनं दुर्बलं दुःखिनमेव दलितप्राणिनमाहूय बारम्बारम् उच्यन्ते। उत्तिष्ठत,स्वचरणेषु स्थिताः भवत। एवं बन्धनं शमस्तं उत्पाटयत। शारीरिकस्वाधीनता, मानसिकस्वाधीनता एवमाध्यात्मिकस्वाधीनता इत्येतदेव उपनिषदां मूलमन्त्रम्।

4. यूरोपीयविद्वान् दार्शनिकः शौपहारः स्वकीयमभिव्यक्तिं अनेन प्रकारेण प्रकटीचकार[13]- यद्यपि संस्कृतभाषायाः समुचितं ज्ञानमस्मभ्यं न प्राप्तम् .येन उपनिषदां वास्तविकं रहस्यं ज्ञातं भवेद्, तथापि यावत्किञ्चिदवगतमस्ति। तेन एवं चिन्त्यते यद् प्रत्येकं स्थलं गम्भीर ओत-प्रोतोपनिषद एवेति।

5. Dogmas of Budhism नामक ग्रन्थस्य कर्ता श्रीह्यूमः (Alex Octavian hume)[14] - सुकरातः, अरस्तू, अफलातूनः आदिकियतां ग्रन्थाः मया ध्यानपूर्वकं पठिताः किन्तु यादृशी शान्तिमयी आत्मविद्या मया उपनिषद्भ्यः प्राप्ता, तादृशी अन्यत्र कुत्रापि अवलोकयितुमपि न प्राप्ता इति।

6. Philosphy of the Upnishads- नामक ग्रन्थस्य प्रणेता प्रसिद्धः दार्शनिकः पालडायसन्[15] – उपनिषदः समस्तस्यापि विश्वस्य सर्वश्रेष्ठज्ञानरूपा इति मनुते। स अलिखत् - उपनिषदां ज्ञानं भारतेषु आप्तमङ्गीकृतं हि वस्तुतः तत्समस्तस्यापि विश्वस्य कृते अनुपममेव। तेषु दार्शनिकसत्यस्याद्भुताभिव्यञ्जना वर्तते तथा परमश्रेयस्करात्मविद्यायाः सिद्धान्तानामेतादृशं मार्मिकं विवेचनमस्ति, यादृशं संसारे अन्यत्र प्रायः कुत्रापि न भवेदिति ।

7. Is God knowledge नामक ग्रन्थे प्रो.जी.आर्केः एवं लिखति[16]- मनुष्यस्य आत्मिक-मानसिक तथा सामाजिकसमस्याः केन प्रकारेण दूरीकर्तुं शक्यन्ते इत्यस्य ज्ञानमुपनिषद्भ्यः एव प्राप्तुं शक्यते। एषा शिक्षा एतावत् सत्यं शिवं तथा सुन्दरं भवति यावदन्तरात्मा अगाधतलपर्यन्तं तस्य प्रवेशः भवति। यदा मनुष्यः सांसारिक दुःखैः तथा चिन्ताभिः परिवृत्तः तदा तस्मै शान्तिं साहाय्यं च दातुं सक्षमममोघ-साधनमिति रूपेण उपनिषद एव सहायिकाः भवन्ति।

8. दाराशिकोहः स्वकीये फारसीभाषायामुपनिषदनुवादस्य भूमिकायामेवमलिखत्[17]- आत्मविद्यायाः बहवः ग्रन्थाः मया पठिताः परन्तु आत्मन अन्वेषणस्य तृषा न कुत्रापि समाप्ता। हृदये एतादृश्यः बह्व्यः शङ्काः तथा समस्या उद्गता आसन्, यासां समाधानं ईश्वरीयज्ञानस्यातिरिक्ततया केनापि अन्य प्रकारेणासम्भवमासीत्। अहं कुरान तौरेत, इञ्जील्, जबूर आदि ग्रन्थान् अपठम्, तेषु ईश्वरस्य यद्वर्णनमस्ति, तेन मनसः पिपासा न शान्तिं प्राप्ता। तदा हैन्दवानां ईश्वरीयपुस्तकान्यपठम्, तेषु उपनिषदां ज्ञानमेव भवति, येन जीवतस्य शाश्वतशान्तिः तथा वास्तविकानन्दः प्राप्तो भवति।

9. स्वकीये ''उपनिषद् एक अध्ययन'' नामक पुस्तके प्रस्तावनायां सन्तविनोबा एवं लिखति[18]- उपनिषदां महिमा बहुभिः गीत एव। केनापि कविना एवमुक्तम्- यद् हिमालय सदृशः पर्वतः नास्ति, उपनिषत्सदृशः ग्रन्थोऽपि नास्ति, परन्तु मम वीक्षणे उपनिषत् न केवलं पुस्तकं किन्तु दर्शनं भवति। तस्य दर्शनस्य यद्यपि शब्देषु अङ्कितं कर्तुं प्रयत्नः कृतः, तथापि शब्दानां पदन्यासः तत्र स्खलति परन्तु निष्ठायाः चिह्नं तत्र स्पष्टमेव। तां निष्ठां हृदये पूरयित्वा शब्दानां साहाय्येनानुभवं कृत्वोपनिषदां बोधः भवति। मम जीवने मातुः स्थानं गीतायाः विद्यते किन्त्वहं जानामि उपनिषद् मम मातामही इति। तया श्रद्धया उपनिषदः मया मननेन निदिध्यासनेन गतद्वात्रिंशद्वर्षेभ्यः पठितास्सन्ति।

10. सन् 1757 तमे वर्षे बङ्गप्रान्ते फ्रांसदेशस्य राजदूत श्रीजटिथलमहोदयेनोपनिषदां प्रशंसा[19]- स्वकीये देशे कृता, तदानैके विद्वांसः प्रभाविताः सञ्जाताः। पादरीऽयूपासमहोदयोऽपि उपनिषदां ज्ञानार्थं भारते समागतः। तेन चतुर्दशवर्षाणि यावत् भारते उषित्वा संस्कृतमधीतं तथा च 1801 तमे वर्षे उपनिषदां फ्रेंच भाषायामनुवादः कृतः। उपनिषदः जीवनस्य सर्वाङ्गपूर्णदर्शनरूपाः सन्ति। आभिः जीवनस्य कृते शान्तिः आनन्दश्च लभ्यते, उपनिषदां ज्ञानेन लौकिकपारलौकिकयोः बाह्यान्तरिकयोः व्यक्तिगत-सामाजिक-जीवनस्योभयपक्षयोः उन्नतिः सञ्जायते।

**ॐ पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते।**

**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।**

**सन्दर्भाः-**


1. *अष्टाध्या. 1-4-61*
2. *अमरकोषे नानार्थवर्गः श्लो. 537*

*3. छान्दोग्योपनिषद्भाष्यभूमिका, डा. शिवशङ्करशर्मा*

*4. मुण्डकोपनिषद् 2.2.9*

*5. छान्दो. 3.5.2*

*6. कठ. 3.17*

*7. श्वेता 5.6*

*8. मैत्री.6.29*

*9. केन. 4.7*

*10. 108 उपनिषदें, पृ. 8*

*11. 108 उपनिषदें, पृ. 8*

*12. 108 उपनिषदें, पृ. 9*

*13. 108 उपनिषदें, पृ. 9*

*14. 108 उपनिषदें, पृ. 9*

*15. 108 उपनिषदें, पृ. 10*

*16. 108 उपनिषदें, पृ. 10*

*17. 108 उपनिषदें, पृ. 11*

*18. 108 उपनिषदें, पृ. 11*

*19. 108 उपनिषदें, पृ. 12*

●●●

# 11

# मनुयाज्ञवल्क्यनारदस्मृतिषु दायभागनिर्णयः

*राकेशकुमारमिश्रः*

*सुबलकुमारमिश्रः*

श्रीमत्याः सरस्वत्याः शास्त्रोद्याने यानि यानि शास्त्रकुसुमानि राराजन्ते तेषु शास्त्रकुसुमनिचयेषु धर्मशास्त्रं ललामभूतं स्थानं संधारयति। यदपि दृश्यमानेऽस्मिन् संसारे बहूनि शास्त्राणि दरीदृश्यन्ते तथापि शास्त्रेषु धर्मशास्त्रस्य प्रधानता विराजन्ते। धर्मार्थकाममोक्षेषु यथा धर्मस्य प्राथम्यं प्राधान्यं च स्वीक्रियते, तथैव शास्त्रस्यास्य मन्वादिप्रणीतत्वात् सर्वमान्यत्वं सर्वग्राह्यत्वं च विद्यत एवेति न कापि विचिकित्सा। ''सामान्येन व्यपदेशाः भवन्तीषति न्यायेन धर्मस्य तथा धर्मशास्त्रस्य प्राथम्यं प्राधान्यं च अंगीक्रियते। भगवतः निश्वासभूतः वेदः यथा प्रामाण्यं धत्ते तथैव शास्त्रमिदं वेदानुमापकत्वात् वेदानुयायित्वात् च नूनमेव वेदसमं प्रामाण्यं स्वीकरोति। अतएव शास्त्रकारैः प्रोक्तं -

**''श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन् हि मानवः।।[1]'' इति।**

तथैव कालिदासेनापि रघुवंशमहाकाव्यस्य द्वितीये सर्गे प्रथमे श्लोके स्मृतेः (धर्मशास्त्रस्य ) प्रामाण्यं प्रदर्शितं, यथा -

**तस्याः खुरन्यासपवित्रपांशुपांसुलानां धुरि कीर्त्तनीया।**
**मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत्।।[2] इति ।**

धर्मशास्त्रस्यास्य विषयविवेचनायां त्रय एव मुख्यविषयाः समालोचकानां दृष्टिपथमाकर्षयन्ति। ते च त्रय विषयाः यथा- आचार-व्यवहार-प्रायश्चित्ताख्याः। एतेषु त्रिषु विषयेषु व्यवहारस्य प्राधान्यं राजकर्त्तृकत्वात् सर्वजनविदितं विद्यते। अत एव व्यवहारस्य उपरि बहूनि कर्माणि बहवः निबन्धाः बहुसंस्काराश्च प्राप्यन्ते। यतो हि स्वाधीनोत्तर-भारतवर्षेऽपि भारतीय-संविधानमेव प्राचीनभारतवर्षस्य धर्मशास्त्रान्तर्गत - व्यवहारभागस्य नवीनमेव प्रारूपम्।

ये तावत् प्राचीन-धर्मशास्त्रमनुशीलयन्ति ते अनुभवन्ति अर्वाचिनकालेऽपि प्रतिक्षेत्रं कथं धर्मशास्त्रस्य आवश्यकता विद्यते। एतेन आधुनिके पाश्चात्यसभ्यतागरजर्जरिते कलिकलंककलंकिते समाजेऽपि यदा यदा विवाह - पितृदोहजाताश्च हिन्दुपरम्परायां परिपाल्यते। तदा तदा प्राचीनस्यास्य धर्मशास्त्रस्य अनुसरणं क्रियते एव, अन्यथा आत्मसन्तोषः नैवास्वाद्यते। अतः धर्मशास्त्रमस्माकमस्थिमज्जागतं च विद्यते। यावत् तिष्ठति भारतं यावच्च चन्द्रतारकं, तावत् धर्मशास्त्रं भाति इति मे मतिः।

धर्मशास्त्रस्य व्यवहारभागे दायभागप्रकरणे दायग्रहणे पुत्राणामधिकार प्रसंगमुद्धृत्य पुत्राणां भेदं शास्त्रकाराः निबन्धकाराश्च पर्यालोचयन्ति। शास्त्रेषु द्वादशप्रकारकाः पुत्राः वर्णिताः, भगवता याज्ञवल्क्येन उक्तं यथा –

**औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः।**
**क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा।।128।।**
**गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः।**
**कानीनः कन्यकाजातो मातामहसुतो मतः।।129।।**
**अक्षतायां क्षतायां वा जातः पौनर्भवः सुतः।**
**दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत्।।130।।**
**क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात्स्वयं कृतः।**
**दत्तात्मा तु स्वयंदत्तो गर्भे विन्नः सहोढजः।।131।।**[3]

अर्थात् शास्त्रेषु विद्यमानेषु द्वादशविधपुत्रेषु सर्वेऽपि न दायहारिणः भवन्ति। तत्र अदायदबान्धवानां विषये भवगवता मनुना उक्तं यत् –

**कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा।**
**स्वयंदत्तश्च शौद्रश्च षडदायादबान्धवाः।।**[4]

पुनश्च षड्पुत्राः दायदबान्धवाः सन्ति तेषां विषयेऽपि मनुः प्रस्तौति -

**औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च।**
**गूढोत्पन्नोऽपविद्धश्च दायादा बान्धवाश्च षट्।।**[5]

**दायभागस्य स्वरूपम्**

मनुप्रोक्ताष्टादशव्यवहारपदेषु दायभागः अन्यतमः ।नारदेनापि उक्तं –

**दायभाग प्रोक्तं व्यवहारपदं बुधैः।।**[6] **इति।**

व्यवहारपदेषु अस्य प्राधान्यं सर्वैः स्मृतिकारैः स्वीक्रियते। धनस्वामिनो मरणात् परं तस्य धने अधिकारप्रतिपादनमेव अस्य प्रमुखो प्रतिपाद्यः विषयः। दायरूपं द्रव्यं तस्य विभागश्चात्र परिकल्पितो विद्यते। अस्य व्यवहारपदस्य स्वरूपं धर्मशास्त्रकारैः बहुधा प्रतिपादितम्। तत्रादौ भगवता मनुना उक्तं यत्-

**एष स्त्रीपुंसयोरुक्तो धर्मो वै रतिसहिंतः।**

**आपद्यपत्यप्राप्तिश्च दायभागं निबोधत।।**[7] **इति ।**

अन्यत्रापि - ''मनुः पुत्रेभ्यः दायं व्यभजत'' इति श्रूयते। भगवता नारदेन उक्तं यत् -

**विभागोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते।**

**दायभाग इति प्रोक्तं तद्विवादपदं बुधैः।।**[8] **इति।**

**दायलक्षणम् -**

निघण्टुकारेण यथा -

**विभक्तं पितृद्रव्यं दायमाहुर्मनीषिणः।।इति।**

बृहस्पतिरपि -

**ददाति दीयते पित्रा पुत्रेभ्यः स्वस्य यद्धनम्।।**

दायभागे मिताक्षरायाः लक्षणं यथा -

**दायशब्देन यद्धनं स्वामिसम्बन्धादेव निमात्तादन्यस्य स्वं भवति तदुच्यते। स च दायः द्विविधः अप्रतिबन्धदायः, सप्रतिबन्धदायश्चेति। तत्र पुत्राणां पौत्राणाञ्च पुत्रत्वेन पौत्रत्वेन च पितृधनं पितामहधनं स्वं भवति इति अप्रतिबन्धदायः। पितृव्यमात्रादिनां तु पुत्राभावे स्वाम्याभावे च स्वं भवतीति सप्रतिबन्धदायः।**[9]

**दायविभागस्य कालः -**

दायविभागस्य कालविषये भगवता याज्ञवल्क्येन उक्तं यत् –

**विभाग चेत्पिता कुर्यादिच्छया विभजेत्सुतान्।।**[10]

अर्थात् पितुः इच्छया विभागं कुर्यात् एषः प्रथमः कालः। अनन्तरं द्वितीयकालविषये भगवता मनुना उक्तंयत् -

**ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरःसमम्।।**[11] **इति।**

अर्थात् पितृमात्रोः उभयोः मरणानन्तरं पुत्राः मिलित्वा पितृधन विभागं कुर्युः।

**दायविभागलक्षणम् -**

अस्मिन् दायभागे दायरूपस्य धनस्य विभागमभिप्रेत्य एव इदं विवादपदं

प्रवर्त्तते। दायरूपस्य धनस्य सर्वथा यद्यपि विभागो न सम्भाव्यते तथापि बहुषु पुत्रेषु विद्यमानेषु बहुषु धनाधिकारिषु वा वर्त्तमानेषु अयं विभागः उक्तः। विभागविषये वेदेष्वपि सूचना उपलभ्यते। यथा ऋक्संहितायामुक्तम्-

**''प्रजाभ्यः पुष्टिं विभजन्त आसते रयिमिव पृष्ठं प्रभवन्तमायते।**

**असिन्वन्द्रष्ट्रैः पितुरत्तिं भोजनं यस्ताकृणोः प्रथमं सास्युक्थ्यः।।**[12]

एतद्वैदिकं प्रमाणमुपजीव्य धर्मशास्त्रकाराः बहुविधविभाग-लक्षणमपि उपस्थापयन्ति। दायविभागप्रकरणे दायशब्दनिरूपणानन्तरं विभागलक्षणमपि प्रस्तुवन्ति।

गौतमेन- **विभागे तु धर्मवृद्धिः।**[13]

यथोक्तं मनुना-

**एवं सह वसेयुर्वा पृथग्वा धर्मकाम्यया ।**

**पृथग्विवर्धते धर्मस्तस्माद्धर्म्या पृथक्क्रिया।।**[14] **इति ।**

मिताक्षराटीकायां विज्ञानेश्वरेणोक्तं यत् -

विभागो नाम द्रव्यसमुदायविषयाणामनेकस्वाम्यानां तदेकदेशेषु व्यवस्थापनम्।।

**पितृकृतविभागप्रकार :-**

जीवति पितरि पितुरिच्छया यदानीं तेन विभागः क्रियते तदानीं स विभागः समो विसमश्चेति द्विविधो भवति। समविभागो नाम भ्रातरः मिलित्वा पैतृकधनं विभागं कृत्वा नयति चेत् तदुच्यते। अनन्तरं विषमविभागविषये भगवता मनुनोक्तं यत् -

**ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरम्।**

**ततोऽर्धं मध्यमस्य स्यात्तुरीयं तु यवीयसः।।**[15] **इति।**

अर्थात् ज्येष्ठाय ज्येष्ठभागेन(240÷20=12), मध्यमाय मध्यमभागेन (240÷40=6), कनिष्ठाय कनिष्ठभागेन(240÷80=3)पैतृकधनस्य विभागं कुर्युः।

**अविभाज्यधनानि -**

यानि धनानि विभाजनं कर्तुं न शक्यते तानि धनानि अविभाज्यधनानि इति उच्यन्ते। भगवता शङ्खेन उक्तं यत् -

**शौर्यभार्याधने चोभे यच्च विद्याधनं भवेत्।**

**त्रीण्येतान्यविभाज्यानि प्रसादो यश्च पैतृकः।।**

अस्माद्वचनात् युद्धेन, भार्याग्रहणेन, विद्यया वेदार्थव्याख्यानेनार्जितानि धनान्यविभाजानीति सुस्पष्टम् । एतत्सर्वं पितृद्रव्यानुपघातात् ज्ञेयम् ।

**स्त्रीधनम् -**

स्त्रीधनविषये भगवता मनुना उक्तं यत् –

**अध्यग्न्यध्यावाहनिकं दत्तं च प्रीतिकर्मणि ।**
**भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम् ।।**[16]

अर्थात् स्त्रीधनं षड्विधं स्मृतम् यथा–

1. अध्यग्नि (अधि + अग्नि) – विवाहसंस्कारसमये प्राप्तं धनम् ।
2. आध्यावाहनिकम् (आधि + आवाहनिकम्)– पत्युः गृहं गतवतीभ्यः कन्याभ्यः पितुः गृहात् प्राप्तं धनम् ।
3. प्रीति पूर्वकं पत्यादितः प्राप्तं धनम् ।
4. भ्रातुतः प्राप्तं धनम् ।
5. मातृतः प्राप्तं धनम् ।
6. पितृतः प्राप्तं धनम् ।

एतेषां विभाग-विषये उच्यते –

**अन्वाधेयं च यद्दत्तं पत्या प्रीतेन चैव यत् ।**
**पत्यौ जीवति वृत्तायाः प्रजायास्तद्धनं भवेत् ।।**[17]

एवं दायभागविषये धर्मशास्त्रेण निर्दिष्टाः नियमाः समाजस्य न्यायपूर्ण सञ्चालनं साधयन्ति । पुत्राणां दायकत्वं, स्त्रीणां अधिकाराः, भ्रातृणां भेदाः च सूक्ष्मतया निरूपिताः । यद्यपि कालानुसारं नियमेषु परिवर्तनानि जातानि, तथापि धर्मशास्त्रस्य मूलदर्शनं न्यायं, समत्वं च प्रतिष्ठापयति । अतः दायविभागे न्यायपूर्वकं विचारणं कर्तव्यम्, येन कुलस्य एक्यं च शान्तिं च रक्षितम् भवेत् ।

**संदर्भाः-**


1. *मनु. स्मृ. 2/9*
2. *रघु. 2/1*
3. *याज्ञ. स्मृ. 2/128-131*
4. *मनु. स्मृ. 9/160*
5. *मनु. स्मृ. 9/159*

6. *ना. - 13/1*
7. *मनु. स्मृ. 9/103*
8. *ना. स्मृ 13/1*
9. *याज्ञवल्क्यस्मृतिः (व्यवहाराध्यायः) मीताक्षरा टीका पृ. 264*
10. *याज्ञ. स्मृ. 2/114*
11. *मनु. स्मृ. 9/104*
12. *ऋ.सं. 2/13/04*
13. *गौ.ध.सू. 28/04*
14. *मनु. स्मृ. 9/111*
15. *मनु. स्मृ. 9/112*
16. *मनु. स्मृ. 9/194*
17. *मनु. स्मृ. 9/195*

●●●

# 12

# नारदस्मृतौ दायभागविवेचनम्

*मोनिकाजांगिड़*

दायः दानम् इति शब्दौ ''दा'' धातोः निष्पन्नौ। उभयत्र वस्तुनः स्वामित्वत्यागः भवति, परन्तु तेषाम् अर्थाः भिन्नाः सन्ति। ''दान" इत्यस्य अर्थः अन्येभ्यः केभ्यश्चित् सम्पत्तिस्वामित्वकरणम्, ''दाय" इत्यस्य अर्थः पूर्वस्वामिनः बन्धुजनानां मृत्योरनन्तरं वा उत्तराधिकारं प्राप्य स्वामित्वं गच्छति।[1] दाय शब्दः वैदिक-साहित्ये अपि प्रयुक्तः अस्ति। ऋग्वेदे ''शतदाय" इति शब्दस्य प्रयोगः कृतः अस्ति।[2] अन्यस्मिन् स्थाने ''रिक्थः" इति शब्दस्य प्रयोगः भवति।[3] धर्मसूत्रेषु अर्थशास्त्रेषु च ''दायाद" इत्यस्य स्थाने ''रिक्थ'' इति शब्दस्य प्रयोगः कृतः अस्ति। ''दयाभाग'' विषये विवरणं स्मृतिषु अपि प्राप्यते। नारदः ज्येष्ठपुत्रस्य पितुः सम्पत्ति विभाजनस्य दायित्वं ''दायभाग''[4] इति नाम्ना निर्दिशति-

पितुः मृत्यौ सति तस्य सम्पत्तिः पुत्रेषु विभक्ता भवति स्म, मातुः मृत्यौ सति तस्याः सम्पत्तिः कन्यकासु विभक्ता भवति[5]। मनु-याज्ञवल्क्यस्मृतिषु अपि एतादृशी सूचना प्राप्यते। एतत् याज्ञवल्क्यबृहस्पतिविष्णुस्मृतिषु च दृश्यते।

**ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समम्।**
**भजेरन् पितृकं रिक्तमनिषास्ते हि जीवतोः।।**[6]
**विभजेरन् सुताः पित्रो ऊर्ध्वं रिक्थम् ऋणं समम्।**
**मातु र्दुहितरः शेषम् ऋणात् ताभ्य ऋतेऽन्वयः।।**[7]

द्वितीयं यदा पितरः द्रव्यं कामयमानाः न भवन्ति अनिच्छा च तत्र भवति स्म, तस्य कन्याः विवाहिताः भवन्ति स्म, माता च प्रसवक्षमा न भवति स्म, तदा पुत्रः पितुः इच्छाविरुद्धम् अपि स्वसम्पत्तिं विभक्तुं शक्नोति स्म।[8]

तृतीयम्- यदि पिता म्रियमाणः, वृद्धः, पङ्गुः, अन्धः, उन्मत्तः इत्याधि-व्याधिना असाध्यरोगेण पीडितः भवति स्म तर्हि तस्य इच्छाविरुद्धमपि सम्पत्तिविभागः सम्भवः आसीत्।[9]

चतुर्थम्- पितुः मृत्योः अनन्तरं सम्पत्तिविभागः।[10] एतादृक् विवरणं मनुयाज्ञवल्क्यस्मृतिषु अपि प्राप्यते। स्मृतिषु पितुः जीवनकाले एवं पुत्रैः सम्पत्ति विभागस्य कारणं धार्मिक-भावना दृष्टिगोचरा भवति। अस्मिन् विषये नारदः कथयति यत् भ्रातृभिः संयुक्तरूपेण क्रियमाणः धर्मः एकः एव, वियोगे तु स्वस्य कृते पृथक् पृथक् धर्मं कुर्वन्ति।[11] अस्मिन् सम्बन्धे मनुः कथयति यत् ते (भ्रातरः) एकत्र एव निवासं कर्तुं शक्नुवन्ति अथापि यदि तैः धर्मवृद्धिः काम्यते तर्हि तु पृथक्तया अपि उषितुं शक्यते।[12]

सामान्यतया उत्तराधिकारिणः प्राप्तव्यवहारानन्तरमेव विभागः भवति स्म, परन्तु सम्पत्तेः उत्तराधिकारी भवितुं प्राप्तव्यवहारस्य बन्धनं नासीत्। बौधायन कौटिल्ययोः[13] मते यदा रिक्थिनः वयस्कतां प्राप्नुवन्ति तदा विभागः भवति, परन्तु सहभागिनां कृते निर्देशः अस्ति यत् बालस्य वयस्कतां प्रापणकाले यावन्ति सर्वाणि ऋणानि तानि शोधयित्वा बालस्य भागं मातुः बन्धुजनानाम् आश्रये वा ग्रामवृद्धानां रक्षणे वा स्थापयेयुः। एतादृशी सूचना मनु[14] -विष्णु[15] -कात्यायनस्मृतिषु[16] अपि प्राप्यते।

विद्वत्सु बालस्य आयुर्निधारणे मतैक्यं नास्ति। षोडशवर्षानन्तरं मातृपितृणां मृत्योः अनन्तरं वा बालकः वयस्क इति मन्यते। सः आत्मनिर्भरः भवेत्, परन्तु नारदः, यावत् मातापितरौ जीवन्ति तावत् वयस्कतायाः विचारस्य समर्थनं न करोति।[17]

मिताक्षराकारेण अपि पुरुषस्य षोडशवर्षस्य कालः बालत्वेन परिभाष्यते।[18] कात्यायनः तु तेषां षोडशवर्षस्य आरम्भे एव बाल्यकालः समाप्त इति कथयति।[19] आधुनिककाले प्रौढत्वं एकविंशतिवर्षे इति मन्यते।[20]

**सम्पत्याः उत्तराधिकारः-**

नारदः कथयति यत् यदि संयुक्तकुटुम्बस्य कश्चन सदस्यः दशवर्षपर्यन्तं संयुक्तकुटुम्बात् विरक्तः तिष्ठति, धार्मिकं वा वाणिज्यिकं वा कार्यं करोति तर्हि सः पृथक् सत्तारूपेण इति मन्तव्यः। स्पष्टतया नारदस्य मतेन संयुक्तसम्पत्त्याः विभागः निर्दिश्यते, अर्थात् यः सदस्यः दशवर्षपर्यन्तं संयुक्तपरिवारात् दूरं निवसति स्म, सः

संयुक्तसम्पत्तौ भागं प्राप्तुं न अर्हति स्म।[21] कात्यायनोऽपि अस्य नियमस्य समर्थनं करोति।[22]

**स्त्रियः उत्तराधिकारे भार्यायाः स्थानम्**

सम्पत्तिविभाजने भार्यायाः उत्तराधिकारविषये नारदः कथयति यत् यदा पुत्रः पितुः मृत्योः अनन्तरं सम्पत्तिं विभजति तदा तस्य माता अपि पुत्रस्य समानं भागं प्राप्नोति।[23] यदि कश्चन भ्राता निःसन्ततिः भवेत् अथ च संन्यासीरूपेण मृतः तर्हि अन्येषां भ्रातॄणां कृते अधिकारः आसीत् यद् ते स्त्रीधनं विहाय तस्य मृतस्य भ्रातुः सम्पत्तिविभाजनं कर्तुं शक्नुवन्ति।[24] परन्तु तेषां मृतभ्रातुः विश्वासपात्रपत्न्याः सम्पूर्णजीवनस्य पोषणं कर्तव्यं भवति स्म, व्यभिचारिणी महिला जीवनवृत्या मुक्ता भवति स्म।[25]

कात्यायनस्य[26] मते निःसन्तानविधवा भर्तुः सम्पत्तिं आजीवनं भोक्तुं तस्य उत्तराधिकारं स्वीकर्तुं च शक्नोति स्म, परन्तु तस्याः कृते सम्पत्याः दानं, विक्रयणं, बन्धकं वा कर्तुं अधिकारः नासीत्। बृहस्पतिः अपत्यरहितां विधवां भर्तुः सम्पत्याः प्रथमां उत्तराधिकारिणीं घोषयन् तर्कयति यद् भार्या पापपुण्ये च सहभागिनी (अर्धभागिनी) मन्तव्या इति। भार्यायाः जीविते सति तस्याः मृतस्य भर्तुः शरीरस्य अर्धभागः तस्यामेव एव जीवति। यावद् मृतस्य शरीरस्य अर्धभागः जीवति तावत् कथं कस्यचित् सम्पत्तिम् अन्यः प्राप्तुं शक्नोति। अपुत्रस्य मृतस्य भार्या तस्य उत्तराधिकारभागं लभते।[27]

**पुत्राणां महत्त्वं, तेषां प्रकाराः, तेषु सम्पत्तिविभागश्च -**

प्राचीन-भारतीय ग्रन्थेषु पुत्राणां महत्त्वस्य विशेषतया चर्चा कृता अस्ति। वेदस्य एकस्मिन् खण्डे पाणिग्रहणसंस्कारकाले निर्दिष्टं यत् वधूः उत्तमान् शूरान् पुत्रान् जनयित्वा धन्या भवति। पतिं वापि एकादशपुत्ररूपेण कृणोति।[28] अथर्ववेदे नारी प्रथमं पुरुषसन्ततिप्राप्त्यर्थं निर्दिष्टा अस्ति।[29]

ऐतरेय-शतपथ-ब्राह्मणयोः पुत्रस्य महत्त्वं प्रकाशयन् प्रोक्तं यत् पुत्र-जन्मना व्यक्तिः पितृऋणेन उन्मुक्तः भवति। अमरत्व-दिव्य-क्षेत्रान् च प्राप्नोति। पिता वृद्धावस्थायां पुत्रमाश्रितः भवति तत्रैव पुत्रः प्रारम्भिकावस्थायां पितरम् आश्रितः भवत्येव।[30] महाभारते चर्चा विहिता अस्ति यत् पुन्नाम नरकात् पितरं रक्षति।[31]

बृहदारण्यकोपनिषदि पुत्रस्य साहाय्येन मानवेन विजितानां लोकानां चर्चा कृता अस्ति, सहैव सः ब्रह्मलोकयज्ञलोकदेवीलोकत्वेनापि उच्यते।[32]

स्मृतिलेखकाः 12 प्रकाराः पुत्राणां चर्चां कृतवन्तः। नारदेन 12 प्रकाराः पुत्राः वर्णिताः।[33] औरसः (समजातीयपत्न्याः जातः पुत्रः) क्षेत्रजः (नियोगद्वारा जातः पुत्र) पुत्रिकापुत्रः (स्वकन्यायाः पुत्रः) कानीनः (अविवाहितस्त्रीतः जातः पुत्र) सहोढः (विवाहसमये गर्भवतीनार्यः जातः पुत्रः) गूढोत्पन्नः (अज्ञातपित्रा कृतः पुत्रः) पौनर्भवः (पुनर्विवाहितायाः पुत्रः), अपविद्धः (मातापितृभिः वा तेषु एकेन वा परित्यक्तः पुत्रः) दत्तः (स्वीकृतः पुत्रः) कृतः (क्रीतः) कृत्रिमः (सृष्टः) स्वयंदत्तः (स्वेच्छया निर्मितः पुत्रः) च।

उपर्युक्तद्वादश प्रकारेभ्यः अतिरिक्तं पुत्रस्य मनुस्मृतिः अपि चर्चां करोति-शौद्री (शूद्रपत्न्याः ब्राह्मणजनितः पुत्रः) इति। याज्ञवल्क्यः,[34] बृहस्पतिः,[35] पराशरः,[36] विष्णुश्च[37] पुत्राणां द्वादशप्रकाराणां चर्चां कृतवन्तः।

नारदः पुत्रान् ''बन्धुदायादः'' ''अदायादबान्धवः'' इति द्वयोः वर्गयोः विभजति। प्रथमे वर्गे षट् पुत्राः सन्ति, यथा, औरसः, क्षेत्रजः, पुत्रिकापुत्रः, कानीनः, सहोढः, गूढोत्पन्नः च, द्वितीयवर्गे तु पौनर्भवः, अपविद्धः दत्तकः, कृतः, कृत्रिमः, स्वयंदत्त इति षट् पुत्राः सन्ति। प्रथमः परतः श्रेष्ठः प्रत्येकं हीनं भवति परतः।[38]

तत्कालीनोनाम् उत्तराधिकारिणाम् अभावे प्रथमप्रकारस्य (बन्धुदायादा) पुत्राः स्वपितुः उत्तराधिकारिणां च सम्पत्याः उत्तराधिकारं प्राप्नुवन्ति। परन्तु द्वितीय प्रकारस्य पुत्राः (अदायादबान्धवः) पितृगोत्रं तु गृह्णन्ति किन्तु पितुः उत्तराधिकारिणां च सम्पत्तिं न प्राप्नुवन्ति-

क्षेत्रपुत्रस्य उत्तराधिकारविषये नारदः कथयति यत् पितृद्वयेन जातः पुत्रः स्वपितुः कृते पृथक् पृथक् पिण्डदानं तर्पणं च करिष्यति, पितृद्वयस्य (वास्तविकस्य नियोगस्य च) सम्पत्तिं च उत्तराधिकारं प्राप्स्यति।[39]

अस्मिन् विषये मनुः कथयति यत् औरसेभ्यः पुत्रिकापुत्रेभ्यश्च अतिरिक्तं क्षेत्रजादयः अन्ये एकादश प्रकाराः पुत्राः सन्ति। एते वास्तविपुत्रस्य प्रतिनिधिमात्रं वर्तन्ते। धर्मप्रथानां संरक्षणाय एव एतेभ्यः मान्यता प्रदीयते।[40]

अतः औरसपुत्राणां एव सम्पूर्ण-पैतृक सम्पत्त्याः उत्तराधिकारः अस्ति। क्रूरता-पाप-परिहाराय अन्यप्रकाराणां पुत्राणां कृते केवलं भोजनं वस्त्रं च प्रदातव्यम्।[41]

पुत्रिका पुत्रग्रहणानन्तरं यदि औरसपुत्रः जायते तर्हि उभयोः कृते सम्पत्तिभागः समानः दातव्यः। याज्ञवल्क्यस्य मते द्वादशप्रकारेषु प्रत्येकं पुत्रः पूर्वस्य अभावे उत्तराधिकारं प्राप्तुं योग्यः भवति, परन्तु तेषां पिण्डदानस्य (पिण्डदानस्य अर्पणस्य) संस्कारस्य योग्यता भिन्ना भवति।[42]

मनुः अग्रे स्पष्टीकरोति यत् गौणपुत्रैः तत् आध्यात्मिकं धार्मिकं वा कुलं न प्राप्यते यत् औरसपुत्रस्य जायमानेन प्राप्यते। मिताक्षरस्य मते कानीनः, सहोढः, गूढोत्पन्नः च व्यभिचारस्य परिणामः इति कारणतः पितुः जातौ न गणयितुं शक्यन्ते।

बृहस्पतेः मते मनुः त्रयोदशपुत्रान् सूचीबद्धान् कृतवान्, परन्तु तेषु केवलं औरसाः पुत्रिका पुत्राश्च एव वंशं वोढुं समर्थाः सन्ति। यथा यज्ञकाले घृताभावे तैलं भद्रं मन्तव्यं तथैव औरसस्य पुत्रिकापुत्रस्य च अभावे अन्ये एकादश पुत्रप्रकाराः प्रत्यभिज्ञाताः। कात्यायनस्य मते यदि दत्तकपुत्राः क्षेत्रजादयः पितृजातीयाः सन्ति तर्हि तेषां सम्पत्तौ एकतृतीयभागस्य अधिकारः भवति। तथापि यदि ते भिन्नजात्याः सन्ति तर्हि ते केवलं भोजनं वस्त्रं च प्राप्नुवन्ति।

उपर्युक्त-पुत्राणां स्थिति भागाभागयोः विषये विरोधाभासयुक्तानाम् अस्पष्टानां च मतानाम् विषये बहुविधविवादः अस्ति यत् बहुविधपुत्रस्य व्यवहारः व्यापकरूपेण प्रचलितः नासीत्, अतः सामान्यतया तेषां स्वीकृतिः न आसीत्। कतिपयान् अपवादान् विहाय आधुनिककाले अपि न्यायालये औरसपुत्राः दत्तकपुत्राः एव प्रमाणभूताः भवन्ति।

**स्त्रीधनं तस्य उत्तराधिकारिणश्च**

प्रायः सर्वे स्मृतिलेखकाः स्त्रीधनं विशिष्टप्रकारं सम्पत्तिं मन्यन्ते, यत् महिलाभिः विशिष्टेषु अवसरेषु जीवनस्य विभिन्नेषु चरणेषु वा प्राप्तं भवति। नारदः कथयति यत् स्त्रीधनस्य षट् प्रकाराः सन्ति- विवाहात् पूर्वं वधूनां प्राप्तं धनं, स्वधनं, पतिभ्रातृमात्राः पित्रा च दत्तं धनं च।

**मात्रा च स्वधनं दत्तं यस्मै स्यात्प्रीतिपूर्वकम्।**
**तस्याप्येष विधिर्दृष्टो मातापीष्टे यथा पिता।।**[43]
**अध्यग्न्यध्यावह्निकं भर्तृदायस्तथैव च ।**
**भ्रातृमातृपितृभ्यश्च षड्विधं स्त्रीधनं स्मृतम्।।**[44]

प्रायः सर्वे स्मृतिलेखकाः स्त्रीधनस्य उत्तराधिकारं प्रथमं कन्याभ्यः एव दत्तवन्तः। अस्मिन् विषये नारदः कथयति यत् मातुः धनं कन्याभ्यः, तेषां अभावे च स्वसन्ततिभ्यः गन्तव्यम् इति-

**पितर्यूर्ध्वं मृते पुत्र विभजेयुर्धनं पितुः।**
**मातुर्दुहितरोऽभावे दुहितारं तदन्वयः।।**[45]

बृहस्पतिमतेन स्त्रीधनस्य ब्रह्मदेव-आर्ष-प्राजापत्य-गन्धर्व-विवाह-व्यवस्थायाः अन्तर्गतं यदा स्त्री विवाहं कृत्वा निःसन्ततिः म्रियते तदा तस्याः पतिः तस्याः स्त्रीधनस्य उत्तराधिकारं प्राप्नोति। असुरेण वा अन्याभ्यां विधिभ्यां (राक्षसः पैशाचः च) विवाहितायाः निःसन्तानतायाः स्त्रियाः मृत्योः अनन्तरं तस्याः धनं मातापितरौ गच्छति -

**स्त्रीधनं तदपत्यानां भर्तृगाम्यप्रजासु च।**
**ब्राह्मादिषु चतुःष्वाहुः पितृगामीतरेषु तु।।**[46]

बृहस्पतेः मते स्त्रीधनस्य उत्तराधिकारे कुमारिकाः प्राधान्यं प्राप्नुवन्ति।

उपर्युक्ताध्ययनेन स्पष्टं भवति यत् विभिन्नाः स्मृतिलेखकाः पुरुषधनस्य उत्तराधिकारसदृशं स्त्रीधनस्य उत्तराधिकारस्य विषये चर्चां कृत्वा धनविभागसम्बद्धाः विविधाः नियमाः निर्मितवन्तः। तेषां दृष्टिः आसीत् यद् स्त्रीणां कृते अपि पृथक् धनस्य व्यवस्था उत्तराधिकाररूपेण भवेत्। अस्मात्दृष्ट्या सामान्यसम्पत्त्याः अपेक्षया परिवारस्य पुरुषसदस्यानां प्राधान्यं, स्त्रीधनस्य अपेक्षया च महिलानां प्राधान्यं दत्तम्।

**संदर्भाः -**


1. *धर्मशास्त्र का इतिहास, भाग - 2, पृ. 838-839*
2. *ऋग्वेद. 2/32/4, ददातु वीरं शतदायमुक्थ्यम्।*
3. *वही, 3/31/20*
4. *नारदस्मृतिः, 13/1*
5. *नारदस्मृतिः, 13/2*
6. *मनुस्मृतिः, 9/104*
7. *याज्ञवल्क्यस्मृति, 2/116*
8. *नारदस्मृतिः, 13/3*

9. नारदस्मृतिः, 13/21
10. नारदस्मृतिः, 13/2
11. नारदस्मृतिः, 13/37
12. मनुस्मृतिः, 13/37
13. बौधायन धर्मसूत्रम्, 2/2/42, अर्थशास्त्रम् - 3/5
14. मनुस्मृतिः, 8/27
15. विष्णुस्मृतिः, 3/65
16. कात्यायनस्मृतिः, 845
17. नारदस्मृतिः, 1/31
18. मिताक्षराः (3/243)
19. कात्यायनस्मृतिः, 844
20. जॉली : हिन्दू लॉ एण्ड कस्टम, पृष्ठ - 169
21. नारदस्मृतिः, 13/41
22. कात्यायनस्मृतिः, 893
23. नारदस्मृतिः, 13/12
24. नारदस्मृतिः, 13/24
25. नारदस्मृतिः, 13/25
26. कात्यायनस्मृतिः, 924-25
27. बृहस्पतिस्मृतिः, 25/46-49
28. ऋग्वेदः, 10-85-45
29. अथर्ववेदः, 3/23
30. ऐतरेयब्राह्मणम्, 31/1, शतपथब्राह्मणम् - 12/4/3/1
31. महाभारत-आदिपर्व, 229/14
32. बृहदारण्यकोपनिषद्, 1/5/16-17
33. नारदस्मृतिः, 13/45-46
34. याज्ञवल्क्यस्मृतिः, 2/128-132
35. बृहस्पतिस्मृतिः, 25/39-41
36. पाराशरस्मृतिः, 4/23-24
37. विष्णुस्मृतिः, 15/30

*38. नारदस्मृतिः, 13/45*

*39. नारदस्मृतिः, 13/22*

*40. मनुस्मृतिः, 9/180*

*41. मनुस्मृतिः, 9/163*

*42. याज्ञवल्क्यस्मृतिः, 2/132*

*43. नारदस्मृतिः, 13/7*

*44. नारदस्मृतिः, 13/8*

*45. नारदस्मृतिः, 13/2*

*46. नारदस्मृतिः, 13/9*

●●●

# 13

# श्रीमद्भगवद्गीतानिर्दिष्टं नेतृत्वचिन्तनम् – भारतीयदृष्ट्या एकम् विश्लेषणात्मकम् अध्ययनम्

*गैरिका कोनारः*

‘‘नेतृत्वम्’’ इति शब्दः संस्कृते ‘‘नी-प्रेरणे’’ धातोः निष्पन्नः -‘‘नयति इति नेता’’ इति व्युत्पत्त्या, यः जनान् शुभमार्गे प्रेरयति, स एव नेता इत्युच्यते। अस्य नेतृत्वस्य तत्त्वं केवलं अधिकारप्रदर्शनं न, अपि तु कर्तव्यपरायणता, आत्मसंयम, विवेकयुक्तनिर्णयशक्ति, लोकसंग्रहभावना च अस्य मूलाधाराः। आधुनिकसमाजे यदा नैतिकमूल्येषु ह्रासः, स्वार्थप्रवृत्तिषु वृद्धिः, भौतिकदृष्टौ आसक्ति च दृश्यते, तदा गीता-प्रदर्शितं नेतृत्वचिन्तनं पुनः प्रासङ्गिकं भवति। श्रीमद्भगवद्गीता न केवलं धार्मिकग्रन्थः, अपितु आध्यात्मिक-नैतिकदर्शनस्य उत्कृष्टसंहिता, यत्र मानव जीवनस्य सम्पूर्णसंतुलनाय मार्गः प्रदर्शितः। अयं ग्रन्थः अर्जुनस्य विषादरूपे नैतिकद्वन्द्वस्य निरूपणेन आरभ्य, कर्तव्यानुष्ठानस्य तात्त्विकमूलं विवृणोति। अर्जुनः यथा मोहवशात् कर्तव्यम् अकर्तव्यमिति न निर्णेतुं शक्नोति, तथैव आधुनिकमानवोऽपि नीत्यन्याययोः सीमायां भ्रमति। तस्मिन् सन्दर्भे श्रीकृष्णः तं जागरयन् यथार्थनेतृत्वस्य स्वरूपं प्रकाशयति-‘‘कर्मण्येवाधिकारस्ते मा फलेषु कदाचन[1]’’ इत्यनेन निष्कामकर्मसिद्धान्तं, तथा ‘‘योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय[2]’’ इत्यनेन समत्वबुद्धेः आदर्शं प्रतिपादयन्, नेतृत्वं आत्मसंयमेन, समदृष्ट्या च सज्जयति। गीता-दृष्ट्या नेता स एव, यः लोकहिताय स्वकर्तव्यं निःस्वार्थभावेन करोति, अहंकारं परित्यज्य धर्माधिष्ठितजीवनं चरति, तथा आत्मबलं, विवेकं, करुणां च समन्वययति। अस्य प्रकारस्य नेतृत्वे आध्यात्मिकता एव केन्द्रबिन्दुः, यतः गीता नेतृत्वं केवलं व्यावहारिकशास्त्ररूपेण न पश्यति, अपि तु आत्मज्ञानविनियोगेन मानवकल्याणाय साधनरूपेण निरूपयति। अतः अस्य

अध्ययनस्य प्रमुख प्रयोजनं भवति- गीतायाः माध्यमेन नेतृत्व चिन्तनस्य दार्शनिकाधारानां विवेचनम्, तस्य भारतीय दर्शन परम्परायां स्थान निर्धारणं, तथा आधुनिकनैतिकनेतृत्व दृष्ट्या तुलनात्मकपरीक्षणम्। एवं गीता केवलं युद्ध क्षेत्रस्य संवादरूपेण न, अपि तु सर्वकालिकं नेतृत्वमार्गदर्शनं भवति, यत्र धर्म, आत्मसंयम, लोकहितबुद्धिः च त्रयः स्तम्भाः भवन्ति।

**गीतादृष्ट्या नेतृत्वस्य तात्त्विकाधारः-**

श्रीमद्भगवद्गीता, भारतीयदर्शनपरम्परायां, न केवलं धार्मिकोपदेश ग्रन्थः, अपि तु तात्त्विकजीवनमार्गस्य चिरन्तनं प्रकाशप्रदीपः। तस्य सर्वोपदेशाः मानवजीवनस्य प्रत्येक क्षेत्रे, विशेषतः नेतृत्वे, अपूर्वं दार्शनिकाधारं प्रदर्शयन्ति। गीतानुसारं नेतृत्वं आत्मविज्ञानस्य, धर्मपालनस्य, तथा लोकसंग्रहस्य त्रिसूत्रेण संगृहीतमस्ति।

**प्रथमतत्त्वं - आत्मविज्ञानम्।**

श्रीमद्भगवद्गीता उद्घोषयति यत् सैवनेता भवति यः आत्मस्वरूपं ज्ञातवान्। आत्मविज्ञानविहीनस्य नेतुः निर्णयाः अस्थिरा, स्वार्थाधीनाः, चञ्चलाश्च भवन्ति। किन्तु यः आत्मनः नित्यत्वं, सर्वभूतेषु आत्मैक्यं च अनुभूतवान्, तस्य दृष्टिः समत्वयुक्ता, तस्य कर्तव्यपालनं निष्कामं, तस्य व्यवहारः अहंकारशून्यः च भवति। भगवान् वदति -

**''विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।**
**शुनि चैव श्वपाके च पण्डिताः समदर्शिनः[3]।।''**

अर्थात् - यः नेता सर्वेषु भूतेषु समदर्शित्वं पश्यति, तस्य मनः न रागद्वेषयुगलवशं गतं भवति। अस्यैव आत्मदर्शनस्य प्रसादेन नेता न केवलं विषय दृष्ट्या अपि तु मनोवृत्तिदृष्ट्यापि सम्यक् नियन्त्रकः भवति।

**द्वितीयतत्त्वं - धर्मपालनं।**

गीतासन्दर्भे धर्मः तात्त्विकशब्दः, न केवलं धार्मिककर्मपरम्परा। ''स्वधर्मे निधनं श्रेयः परधर्मो भयावहः[4]'' इति वचनात् ज्ञायते यत् नेता सैव आदर्शः, यः स्वधर्मे स्थित्वा कर्तव्यं करोति। धर्मपालनं नेतृत्वस्य मेरुदण्डः। नेता सदा धर्ममार्गे स्थित्वा न्यायेन, करुणया, सत्येन च समाजं प्रेरयति। धर्मत्यागेन सिद्धिर्न सम्भवति, अतः धर्माधिष्ठानं एव सर्वेषां निर्णयानां मूलं भवेत्।

**तृतीयतत्त्वं - लोकसंग्रहः**

गीता स्पष्टं वदति -

> **''यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।**
> **स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते[5]।।''**

अर्थात् नेता तस्याचरणेन एव समाजं प्रेरयति। अतः नेतृत्वं न केवलं शासनं वा आदेश प्रदर्शनं, अपि तु आचरण द्वारा प्रेरणा। यः नेता कर्मयोगेन लोकहितं पश्यति, स एव गीतादृष्ट्या लोकसंग्रहरूपेण कर्म करोति।

> **''न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन।**
> **नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि[6]।।''**

एतेन भगवान् स्वयम् आदर्शं स्थापयति - यद्यपि तस्य कर्तव्यं नास्ति, तथापि लोकसंग्रहाय कर्म करोति। एष एव नेतृत्वस्य सर्वोच्च दृष्टान्तः - कर्तृत्वं न फललाभया, किंतु लोकहितसंग्रहार्थम्। गीता दृष्ट्या नेता सः न भवति यः केवलं अधिकारासीनः, अपि तु सः यः आत्मसंयमेन, धर्माधिष्ठानेन, लोकहिते च स्थितः। अस्य तात्त्विकाधारस्य सारं यथा –आत्मविज्ञानं, धर्मपालनं, लोकसंग्रहः च। एष त्रिकं यदि नेतृत्वे अवस्थितं भवति, तर्हि तद् न केवलं राजनैतिकं वा प्रशासकीयं, अपि तु आध्यात्मिकं नेतृत्वं भवति। एतादृशं नेतृत्वं न केवलं जनानां कल्याणाय, अपि तु आत्मोन्नतये अपि सहायकं भवति। अतः श्रीमद्भगवद्गीता दृष्ट्या नेतृत्वं आत्मविज्ञानप्रधानं, धर्माधारितं, लोकहिताभिमुखं चास्ति। तत्र आत्मनियन्त्रणं नेतृत्वस्य शक्तिः, धर्मः तस्य मार्गः, तथा लोकसंग्रहः तस्य प्रयोजनम्।

**गीतानिर्दिष्टम् आदर्शनेतृत्वस्य लक्षणानि-**

श्रीमद्भगवद्गीतायां भगवान् श्रीकृष्णः अर्जुनं प्रति केवलं युद्धोपदेशं न दत्तवान्, अपि तु आदर्शनेतृत्वस्य आधारभूतानि लक्षणानि अपि प्रतिपादितवान्। गीता दृष्ट्या आदर्शनेता सः भवति यः आत्मसंयमी, निष्कामकर्मी, समदर्शी, विनयी, तथा लोकहिताभिमुखः। अस्य नेतृत्वस्य मूलं आन्तरिकशुद्धिः, स्थैर्यम्, विवेकशक्तिः च । प्रथमं लक्षणम्-निष्कामकर्मप्रवृत्तिः- गीता सर्वत्र कर्मयोगं जीवनस्य आधाररूपेण प्रतिष्ठापयति।

> **''कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।**
> **मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि[7]।।''**

अत्र भगवता स्पष्टं निर्दिष्टं यत् नेता कर्मफलासक्तिं परित्यज्य कर्तव्यपालनं करोति। नेता यदि कर्मस्य फलाशया प्रवृत्तः भवति, तर्हि सः स्वार्थबन्धने पतति। किन्तु यदि सः फलासक्तिवर्जितः भवति, तदा तस्य कर्म लोकहितमूलं भवति। निष्कामकर्म एव नेतृत्वस्य शुद्धतमं रूपम्।

**द्वितीयं लक्षणम् – समत्वदृष्टिः-**

गीता वदति –

> **''सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ।**
> **ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि[8]।।''**

अर्थात् आदर्शनेता सः एव यः परिस्थितिवशात् न ह्रियते, न प्रमाद्यते, न च विषण्णः भवति। समत्वं तस्य मनसः स्थैर्यं द्योतयति। यः नेता सर्वावस्थासु समबुद्धिः, स एव स्थिरनीतिः, न्यायनिष्ठः, तथा सहनशीलः भवति ।

**तृतीयं लक्षणम् – आत्मसंयमः-**

गीतावचनं -

> **''उद्धरेदात्मनात्मानं नात्मानमवसादयेत्।**
> **आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः[9]।।''**

अत्र आत्मसंयमस्य परमावश्यकता प्रतिपादिता। यः स्वेन्द्रियाणि, मनः, चित्तं च संयमयितुं समर्थः, स एव अन्यानां नयनाय योग्यः। आत्मसंयमविहीनस्य नेतुः वाणी, वृत्ति, तथा नीति नित्यं परिवर्तते। अतः संयमः एव नेतृत्वस्य आन्तरिकशक्तिः।

**चतुर्थ लक्षणम् - विनय एवं अहंकारशून्यता।**

गीता सर्वत्र अहंकारस्य नाशं साधनमिव उपदिशति ।

> **''अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम्।**
> **विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते[10]।।''**

नेता सदा विनीतः, शान्तचित्तः, आत्मतर्पणपरः च भवेत्। यः अहंकाररहितः, सः सर्वेषां मनसि विश्वासं जनयति।

**पञ्चमं लक्षणम् - लोकसंग्रहभावना-**

भगवान् वदति -

> **''न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम्।**
> **जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन्[11]।।''**

अर्थात् नेता समाजस्य विविधवर्गेषु एकत्वं स्थापयति, तेषां मनसि कर्मयोगभावं जागरयति। सः अन्येषां दोषान्न पश्यति, किन्तु स्वआचरणेन तान् प्रेरयति। लोकसंग्रह एव गीतानेतृत्वस्य चरमलक्षणम् - यः सर्वान् एकत्र समाहितुं शक्नोति। एवं गीतायाः अनुसारं आदर्शनेता सः भवति,यः निष्कामकर्मी - स्वार्थं परित्यज्य कर्तव्ये प्रवृत्तः। यः समदर्शी - सुखदुःखयोः समबुद्धिः। यः संयमी - आत्मनियन्त्रणयुक्तः। यः विनीतः - अहंकारशून्यः। यः लोकसंग्रही - समाजकल्याणाय समर्पितः। अस्मिन् प्रकारे गीता नेतृत्वं बाह्यशासनरूपेण न, किन्तु आन्तरिकप्रकाशरूपेण निरूपयति । गीतानुसारं नेता सः न केवलं ''प्रभु'' अपितु ''सेवकः'' - यः सर्वेषां कृते स्वयं त्यागी भवति, यः धर्माधिष्ठाने स्थित्वा सर्वेषां प्रेरणास्रोतः भवति । एषा एव ''गीता-निर्दिष्ट आदर्शनेतृत्वस्य'' पूर्ण व्याख्या।

**आधुनिकनैतिकनेतृत्वेन सह गीतानिर्दिष्टनेतृत्वस्य तुलनात्मकमध्ययनम्-**

आधुनिकजगति नेतृत्वस्य धारणा प्रायः व्यवस्थापनशास्त्र, अर्थनीति, राजनीति इत्यादिषु सीमिता दृश्यते। तत्र नेतृत्वं प्रायः अधिकारप्रदर्शनं, निर्णयग्रहणकौशलं, तथा लोकनियन्त्रणस्य साधनं इति मन्यते। किन्तु श्रीमद्भगवद्गीता नेतृत्वं एतेभ्यः सर्वेभ्यः अवधारणाभ्यः परं नयति। तत्र नेतृत्वं केवलं बाह्यप्रेरणायाः साधनं न, अपि तु आन्तरिकपरिष्कारस्य, आत्मविज्ञानस्य, तथा धर्मपालनस्य आधारे प्रतिष्ठितं तत्त्वम्। आधुनिकनैतिकनेतृत्वे 'मूल्यनिष्ठा', 'सत्यवादिता', 'सेवाभावना', 'समानता', इत्येते गुणाः प्राधान्येन वर्ण्यन्ते। किन्तु गीतादृष्ट्या एते सर्वे गुणाः आत्मनियन्त्रणस्य, निष्कामकर्मस्य, धर्मनिष्ठायाश्च परिणामरूपे एव दृश्यन्ते। उदाहरणतः आधुनिकशास्त्रे नेता सः श्रेष्ठः मन्यते यः 'inspiring', 'visionary' तथा 'effective' अस्ति । किन्तु गीता वदति - नेता सः एव यः ''स्थिरबुद्धिः'', ''अहंकारशून्यः'', तथा ''लोकसंग्रहार्थं'' प्रवृत्तः। आधुनिकनेतृत्वे नीतिशास्त्रं बाह्यनियमनरूपेण प्रायः प्रतिपन्नं भवति - नियमपालनं, नीतिनिष्ठता, पारदर्शिता इत्यादयः तत्र मुख्या विचाराः। गीता तु नीतिं अन्तःकरण स्थितं धर्मस्वरूपं मन्यते। ''स्वधर्मे निधनं श्रेयः परधर्मो भयावहः[12]।'' अत्र स्वधर्मनिष्ठा एव गीतानैतिकनेतृत्वस्य मूलाधारः। नेता यदि स्वधर्मे स्थितः, तर्हि तस्य प्रत्येकं निर्णयं न केवलं लोकहिताय, अपितु आत्मशुद्धये अपि भवति। आधुनिकनेतृत्वे "motivation" अथवा "incentive" इति भावः मुख्यः अस्ति - नेता जनान् प्रेरयति फलप्रतिश्रुत्या। किन्तु गीता तु प्रेरणां निष्कामभावेन स्थापयति।

**"न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते[13] ।"**

**"न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्[14] ।"**

अर्थात् कर्म कर्तव्यरूपेण अवश्यं भवेत्, न तु स्वार्थरूपेण। नेता स्वयं कर्मयोगी भवेत् - लोकहिताय, आत्मशुद्धये, धर्मसंरक्षणाय च। आधुनिकनैतिकनेता प्रायः सामाजिकन्यायं, समानता, जनकल्याणं च लक्ष्यीकृत्य कार्यं करोति। गीतानेता तु एतानि सर्वाणि धर्माधिष्ठानरूपेण धारयति। तस्य दृष्टिः बाह्यपरिवर्तनाय न, अपि तु अन्तःप्रबोधाय। तस्मात् गीतानेतृत्वं नैतिकनेतृत्वस्य आध्यात्मिकरूपं भवति।

तुलनया ज्ञायते -

1. आधुनिकनेता लोकसेवायां प्रवृत्तः भवति, गीता-नेता लोकसंग्रहार्थं कर्म करोति।

2. आधुनिकनेता नीतिनियमैः बन्धितः, गीता-नेता धर्मेन प्रेरितः।

3. आधुनिकनेता प्रेरणायां फलप्रदर्शनं करोति, गीता-नेता कर्तव्ये निष्कामभावं स्थापयति ।

4. आधुनिकनेता लोकसमक्षे आदर्शं स्थापयति, गीता-नेता आत्मनियन्त्रणेन आदर्शं जीवति ।

एवं स्पष्टं भवति यत् गीतानिर्दिष्ट नेतृत्वं आधुनिक नैतिक नेतृत्वस्य तात्त्विकाधाररूपं दातुम् समर्थम् अस्ति। आधुनिकयुगे नेतृत्वे यदि गीता-तत्त्वानि - आत्मसंयमः, निष्कामकर्म, धर्मपालनं, समदर्शित्वं च - समाविष्टानि स्युः, तर्हि नेतृत्वं केवलं प्रशासनं न, अपि तु मानवतासंवर्धनस्य साधनं भवेत्। अतः गीतानेतृत्वं नूतनयुगाय अपि सर्वथा प्रासङ्गिकं। यतः तत्र नेतृत्वं केवलं 'power' अथवा 'position' न, अपि तु 'principle' तथा 'purity' इत्येतयोः आधारे प्रतिष्ठितं तत्त्वम्।

**गीता-नेतृत्वस्य भारतीयदृष्ट्या दार्शनिकप्रासङ्गिकता-**

भारतीयदर्शनस्य मूलं आत्मदर्शनमेव। यत्र आत्मा, धर्मः, कर्म, मोक्षः - एते चत्वारः तत्त्वानि एकत्र मिलित्वा मानवानां जीवनस्य दिशां निर्दिशन्ति। श्रीमद्भगवद्गीता एतेषां चतुर्णां तत्त्वानां समन्वयमयि ग्रन्थः अस्ति। अतः तस्य निर्दिष्टं नेतृत्वचिन्तनं केवलं सामाजिकं वा राजनैतिकं न, अपितु आध्यात्मिकं, नैतिकं, तथा दार्शनिकं स्वरूपं धारयति। गीतादृष्ट्या नेता सः न भवति यः केवलं जनान् नयति, अपि तु सः यः स्वात्मानं नयति -"आत्मवै जयते रणे" इत्यस्य

तात्पर्येण आत्मविजेतृत्वं गीतानेतृत्वस्य प्रथमं चिह्नं भवति। स्वामिविवेकानन्दः अपि उक्तवान् - "He who conquers himself is the real leader of men." गीता अस्य सिद्धान्तं प्राचीनकालादेव उद्घोषयति - **''उद्धरेदात्मनात्मानं नात्मानमवसादयेत्। आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः**[15] **।।''**

अत्र 'उद्धरेदात्मनात्मानं' इति वाक्यं नेतृत्वस्य दार्शनिकस्रोतः भवति। भारतीयदृष्ट्या नेतृत्वं आत्मोन्नतिः, आत्मसंयमः, तथा आत्मतत्त्वावबोधः इत्येषु आधारयति। तस्मात्नेता सः एव यः प्रथमं आत्मनियन्त्रणं साधयति, ततः अन्येषां मार्गं प्रदर्शयति। भारतीयदर्शनं मोक्षाभिमुखं अस्ति। तत्र सर्वं कर्म मोक्षस्य साधनं भवति। एष एव गीतानेतृत्वस्य मूलाधारः - **यत्र नेतृत्वं न स्वार्थार्थं, किन्तु लोककल्याणाय, आत्मशुद्धये, धर्मसंरक्षणाय च प्रयुज्यते। ''यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः। स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते**[16] **।।''** अत्र श्रीकृष्णः नेतृत्वं ''श्रेष्ठाचारस्य आदर्शरूपं'' मन्यते। नेता स्वयं आदर्शं स्थापयति, तेन समाजः अनुगच्छति। भारतीयपरम्परायां 'राजर्षि' वा 'ऋषिराज' इति कल्पना अस्यैव तत्त्वस्य मूर्तस्वरूपा आसीत् - यत्र राज्यं धर्मे प्रतिष्ठितं, नेतृत्वं तपोबलसंयुक्तं, तथा नीतिज्ञानयोः संतुलनरूपं भवति।

दार्शनिकदृष्ट्या गीता-नेतृत्वं द्विविधं समन्वययति-

(1) कर्मवादस्य - यत्र क्रिया, कर्तव्यं, प्रयत्नः च प्रधानः।

(2) ज्ञानवादस्य - यत्र विवेकः, आत्मानुभवः, समदृष्टिः च प्रमुखः।

अतः गीता-नेता कर्मयोगी च, ज्ञानी च भवति। सः न केवलं कर्माणि करोति, अपि तु तेषां फलाशां त्यक्त्वा कार्यं धर्मरूपेण स्वीकुरुते। भारतीयदर्शनस्य एकं प्रमुखं लक्षणं अस्ति -'समत्वदृष्टिः'। गीता वदति - **''विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि। शुनि चैव श्वपाके च पण्डिताः समदर्शिनः**[17] **।।''**

अयं समदर्शनभावः नेतृत्वस्य सर्वोच्चलक्षणम्। यः नेता सर्वेषु समं दृष्टिं धारयति, सः समाजे ऐक्यं, प्रेम, तथा सहअस्तित्वं स्थापयति। भारतीयसंस्कृतौ नेतृत्वं 'अहंकारत्यागे' प्रतिष्ठितं, न तु 'अहंभावे'। गीता अस्य तत्त्वं सुस्पष्टं करोति- ''नाहं कर्ता हरिः कर्ता'' इति भावः यदा नेतसि प्रबुद्धः भवति, तदा तस्य कर्माणि मोक्षमार्गं उद्घाटयन्ति। भारतीयदृष्ट्या गीतानेतृत्वं केवलं राजकीयशक्तेः वा संस्थागतशक्तेः प्रतीकं न, किन्तु धर्मशक्तेः, संस्कृतिशक्तेः, तथा आत्मशक्तेः रूपं अस्ति। एष भावः तावत् आधुनिकयुगे अपि प्रासङ्गिकः - यतः आज नेतृणां

सङ्कटं न ज्ञानस्य, न प्रौद्योगिकीस्य, अपि तु नैतिकबलस्य, आत्मसंयमस्य, तथा विवेकस्य अभावात् जायते। अतः गीतादृष्ट्या भारतीयनेतृत्वचिन्तनं केवलं इतिहास प्रसिद्धं न, अपि तु नूतनजगति नैतिकसन्तुलनाय, लोककल्याणाय, तथा वैश्विक शान्तये अपि अत्यन्तमावश्यकम्। तत्र नेतृत्वं धर्मे प्रतिष्ठितं, आत्मसाक्षात्कारदिशा प्रदर्शकम्, तथा मोक्षमार्गस्य साधनं भवति। एवमेव गीतानेतृत्वं भारतीयदर्शनस्य सारं वहति - यत्र नेतृत्वं शक्ति न, अपि तु सेवा अस्ति, यत्र अधिकारः न, अपि तु अर्पणभावः अस्ति,तथा यत्र स्वार्थं न, अपि तु लोकसंग्रहः एव ध्येयम्।

**गीता-नेतृत्वस्य सामाजिक-आध्यात्मिकप्रासङ्गिकता-**

श्रीमद्भगवद्गीता केवलं दार्शनिकग्रन्थः न, अपि तु एकं सामाजिक-आध्यात्मिकजीवनमार्गदर्शकम्। अस्या शिक्षाः सर्वकालेषु सर्वजनानां हृदयंगमाः , यतो हि ताः मानवान् केवलं मोक्षलक्ष्ये न , अपि तु लोकसंग्रहार्थं, समाजकल्याणार्थं च प्रेरयन्ति। गीतानेतृत्वदृष्ट्या समाजं न केवलं अनुयायिनां समूहः, किन्तु एकः जीवितसंग्रहः, यत्र सर्वे परस्परं धर्माधिष्ठितेन भावेन सम्बन्धिताः। गीतानेता तु तादृशः पुरुषः यः समाजस्य नैतिकदिशा स्थापयति, जनमानसस्य मानसिकसमतोलं रक्षति, तथा आत्मीय-अनात्मीयभावस्य सीमामतिक्रम्य सर्वेषां प्रति प्रेमभावं वर्धयति। अत्र नेतृत्वं केवलं शासनकौशलं न, किन्तु एकं सामाजिकसाधनम्। नेता स्वयं धर्मस्य अधिष्ठाता भवति - नीतिमूलकचिन्तनं, करुणा, तथा परहितभावः अस्य आधारः। गीता वदति - ''लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि[18]।'' अर्थात्- ''लोकसंग्रहार्थमेव कर्म कर्तव्यम्।'' अयं श्लोकः गीता-नेतृत्वस्य सामाजिकदायित्वं सुस्पष्टं करोति। नेता सः न केवलं स्वलाभार्थं कर्म करोति, अपि तु लोकहिताय, समाजस्थैर्यार्थं , तथा संस्काररक्षणाय कर्म करोति। एषा वृत्तिः ''सेवकनेतृत्वं'' इति आधुनिकपरिभाषायामपि दृष्टव्यते, यत्र नेता जनसेवया एव आदर्शं स्थापयति। आध्यात्मिकदृष्ट्या गीतानेतृत्वं आत्मशुद्धेः , अहंकारत्यागस्य , तथा ईश्वरनिष्ठायाः प्रतीकं। यः नेता आत्मभावं सर्वेषु जीवेषु पश्यति, सः न कदापि हिंसकः, न पक्षपाती, न च लोभी। तस्य आत्मा विश्वात्मना सम्बद्धः। **''ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति[19]।''** अयं श्लोकः द्योतयति यत् सर्वेषां हृदि ईश्वरः स्थितः , अतः सर्वे अपि नेतृत्वस्य दृष्ट्या सम्मानार्हाः। अतः गीता-नेता सर्वभूतेषु दैवीभावं पश्यति, तथा तेषां हितं स्वधर्मरूपेण स्वीकुरुते। समाजे यदा नैतिकमूल्यानां ह्रासः, स्वार्थवृद्धिः, तथा नेतृत्वस्य दुरुपयोगः दृश्यते, तदा गीतायाः सन्देशः नवजीवनं

ददाति । नेता तु न केवलं नीतिपरः, किन्तु आत्मजागृतः । सः तत्त्वतः जानाति यत् - ''न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते।'' अर्थात् निष्क्रियतया समाजो न उन्नमति, किन्तु धर्माधारितक्रियया एव स्थैर्यं लभते। अतः गीता–नेतृत्वे कर्मयोगस्य तत्त्वं सर्वाधिकं महत्त्वं धारयति। गीता-नेता समाजे सात्त्विकवृत्तेः प्रचारकः। सः जनमानसस्य क्लेशं, लोभं, हिंसां, तथा असंयमं परिहारयन्, प्रेम, श्रद्धा, संयम, तथा सौहार्दस्य प्रतिष्ठां स्थापयति। गीता-नेतृत्वं तस्मात् केवलं सामाजिकनियमनं न, अपि तु आध्यात्मिकशुद्ध्याः साधनम्। भारतीयसंस्कृतौ यदा यदा समाजे अधर्मो वृद्धिं याति, तदा तदा गीतासारः पुनः पुनराविर्भवति। आधुनिक समाजे अपि यत्र नैतिकसंकटं, हिंसामूलकनीति, तथा स्वार्थपरायणराजनीति व्याप्यते, तत्र गीता–नेतृत्वं धर्माधारित–सेवामूलक–विवेकसंपन्नं नेतृत्वदर्शनं प्रदर्शयति। अतः गीता–नेतृत्वस्य सामाजिक-आध्यात्मिक प्रासङ्गिकता अस्यैव कारणात् अमरत्वं प्राप्तवती - यतो हि अस्य आधारः न केवलं तत्त्वज्ञानं, किन्तु प्रायोगिकनैतिकता, लोकसेवा, तथा आत्मसाक्षात्काररूपा आध्यात्मिकता।

**आधुनिक–नैतिक–नेतृत्वे गीतासिद्धान्तानां अनुप्रयोगः-**

आधुनिकयुगे नेतृत्वं विविधरूपेण प्रकटते - राजनीतिकं, सामाजिकं, आर्थिकं, शैक्षिकं, प्रबन्धनात्मकं च। तथापि तत्र एकः सामान्यदोषः दृश्यते - नेतृत्वं नैतिकबलरहितं जातम्। यत्र स्वार्थप्रवृत्तिः, प्रतियोगिता, लाभाभिलाषा, तथा सत्ता-सुरक्षणं प्रमुखं भवति, तत्र धर्म-निष्ठा, सेवा-भावना, तथा आत्म-संयमः दुर्लभः दृश्यते। अत्र एव श्रीमद्भगवद्गीतायाः सिद्धान्ताः आधुनिक-नैतिक-नेतृत्वाय दीपस्तम्भवत् प्रकाशन्ति। गीतासिद्धान्ताः केवलं धार्मिकोपदेशाः न, अपितु प्रबन्धनशास्त्रे, संगठन-विकासे, तथा लोकनीतौ अपि अत्यन्तं प्रासङ्गिकाः। गीता-नेतृत्वस्य मूलाधारः कर्मयोगः अस्ति - यत्र नेता निष्कामभावेन, फलासङ्गं परित्यज्य, धर्मरूपेण कर्तव्यपालनं करोति। ''कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।'' अयं श्लोकः आधुनिक-नेतृत्वाय मौलिकं सूत्रं दत्तवान् - नेता कर्मे अधिकारं मान्यं कृत्वा, फले अनासक्तो भवेत्। अस्य भावस्य प्रयोगः आधुनिक-संस्थागत-नेतृत्वे Performance without Attachment इत्याख्यां नीतिं जनयति। गीतानेता समत्वभावेन कार्यं करोति। यः सफलताविफलतयोः समं मन्यते, सः स्थिरचित्तः, शान्तः, तथा निर्णयक्षमतासंपन्नः भवति। ''समत्वं योग उच्यते।'' एषा समता आधुनिक-नेतृत्वे Emotional Stability इति रूपेण

अत्यन्तं आवश्यकः गुणः। आजनेता यः अस्थिरः, तस्य निर्णयाः असंतुलिताः भवन्ति, किन्तु गीतासिद्धान्तं अवलम्ब्य नेता स्थितप्रज्ञवत् स्थैर्ययुक्तः भवति। अन्यत् गीतासिद्धान्तं - त्यागभावः। **''यः कर्मफलत्यागी स त्यागीत्यभिधीयते[20] ।''** त्यागः इति न कर्मत्यागः, किन्तु अहंकारत्यागः। आधुनिकनेता यदि 'अहं' परित्यज्य 'अहमिदानीं समाजस्य सेवकः अस्मि' इति भावं धारणं करोति, तर्हि सः सच्चरित्रः नेता भवति। आज विश्वे Servant Leadership इति विचारधारा यः प्रसिद्धः, सः वस्तुतः गीतायाः कर्मयोगतत्त्वस्य आधुनिकव्याख्या एव। गीतानेतृत्वे लोकसंग्रहः एकं प्रमुखं तत्त्वम्। ''यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।'' नेता यदि स्वयं आदर्शं स्थापयति, तदा जनाः अनुगच्छन्ति। अतः गीता–दृष्ट्या नेतृत्वं आदर्शप्रदर्शनस्य दायित्वं वहति, न तु केवलं आदेशप्रदाने। आधुनिकसंस्थासु अपि "Lead by Example" इत्ययं सिद्धान्तः अस्यैव प्रतिफलनम्। गीता–नेता सामूहिकहिते अनन्यनिष्ठः। तस्य कर्म स्वार्थात् परमार्थं प्रति प्रवृत्तं भवति। आधुनिक-कम्पनी-प्रबन्धनक्षेत्रे अपि यदि गीता-सिद्धान्ताः प्रयुज्येरन्, तर्हि नेता कर्मचारीहितं, ग्राहकहितं, तथा पर्यावरणहितं अपि मनसि स्थापयेत् । एषा वृत्तिः Sustainable and Ethical Leadership इति नूतनसंकल्पनारूपेण प्रकटिता अस्ति। गीतानेता न केवलं नीतिवान्, किन्तु आध्यात्मिकचिन्तनयुक्तः। तस्य कर्म ईश्वरार्पणभावेन पवित्रं भवति।

**''यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्। तत्कुरुष्व मदर्पणम्[21] ।''**

अयं भावः आधुनिक-जीवनशैली-संतुलनाय अत्यन्तं उपादेयः। यदा नेता सर्वं कर्म 'सेवा' इति दृष्ट्या करोति, तदा कार्यस्थले शान्ति, संतोष, तथा विश्वासस्य वातारणं निर्मीयते। अतः स्पष्टं भवति यत् श्रीमद्भगवद्गीतायाः सिद्धान्ताः केवलं अध्यात्मिकक्षेत्रे न, अपि तु आधुनिक-नैतिक-नेतृत्वे अपि अत्यन्तं प्रयोज्याः। एते सिद्धान्ताः नेतृत्वं Self-Centered अवस्थातः Service-Centered अवस्थां प्रति परिवर्तयन्ति। यत्र नेता स्वार्थत्यागी, धर्मनिष्ठः, लोकसंग्रहार्थं कार्यरतः, तथा सर्वेषु समदृष्टिः भवति, सः एव गीतानेता यः प्राचीनस्य अमृतं आधुनिकसमाजे सिञ्चति।

श्रीमद्भगवद्गीता भारतीय चिन्तन परम्परायां एकम द्वितीयं मार्गदर्शन मस्ति, यत्र आध्यात्मिकता, नीतिशास्त्रं, समाजदर्शनं च एकत्र समन्वितमस्ति। गीता न केवलं मोक्षमार्गस्य निरूपणं करोति, अपितु व्यवहारिकजीवनस्य, विशेषतः

नेतृत्वस्य, एकं नैतिकदिशादर्शनं अपि प्रदत्तवती। गीतातत्त्वं सूचयति यत् यथार्थ नेतृत्वं तद् एव यत्र धर्माधिष्ठानम्, आत्मसंयमः, तथा लोकसंग्रहः आधारभूततया प्रतिष्ठितः। नेता सः एव योग्यः, यः स्वार्थत्यागेन, अहंभावनिवृत्त्या, तथा समत्वदृष्ट्या कर्म करोति । तस्य निर्णयाः केवलं राजनीतिकं वा आर्थिकं न भवन्ति, किन्तु धर्मबुद्धिपूर्वकं समाजहिताय अनुकूलं भवति। भगवान् श्रीकृष्णः अर्जुनं प्रति नेतृत्वस्य तात्त्विकसारं प्रतिपादयन् तं सूचयति यत् ''स्वधर्मे निधनं श्रेयः'' - नेता तदा आदर्शः भवति, यदा सः स्वकर्तव्ये निष्ठां, स्वभावे श्रद्धां, तथा कर्मे समत्वं धारयति । अयं दृष्टिकोणः नेतृत्वं केवलं पदेन न, अपि तु कर्तृत्वेन, उत्तरदायित्वेन, तथा सेवाभावेन परिभाषयति। गीतातत्त्वं दर्शयति यत् नेता सः एव सच्च नेता, यः आत्मविजयी अस्ति। आत्मविजय एव लोकविजयस्य मूलम्। यः आत्मसंयमी, स एव समाजं संयमयितुं शक्नोति। यः स्वयं प्रकाशमयः, स एव लोकाय दीपः भवति। अतः गीतायाः दार्शनिकविचारः नेतृत्वं बाह्यप्रभावस्य न, अपि तु आन्तरिकप्रभायाः रूपेण वर्णयति। आधुनिककाले, यदा नेतृत्वे नीतिहीनता, असत्यता, स्वार्थपरता च व्याप्यते, तदा गीता तदस्य औषधिरूपेण स्थितम्। गीता स्मारयति यत् ''यद्यदाचरति श्रेष्ठः तत् तदेवेतरो जनः''- नेता आचरणेन लोकं शिक्षयति, न केवलं भाषणेनेव। अयं श्लोकः आधुनिक नेतृत्वस्य सर्वथा अनिवार्यं मानदण्डं भवितु मर्हति। अतः ''श्रीमद्भगवद्गीतानिर्दिष्टं नेतृत्वचिन्तनम् — भारतीयदृष्ट्या एकम् विश्लेषणात्मकम् अध्ययनत्'' इत्यस्य सारं तद् एव यत् - गीता आदर्शनेतृत्वं तादृशं दर्शयति, यत्र आत्मानुशासनं, नीतिस्थैर्यं, लोकहितं च सम्यक् समन्वितम्। यः नेता कर्मयोगेन स्थितः, यः अनासक्तः, यः धर्मे निष्ठितः, स एव कालातीतः प्रेरणास्रोतः भवति। गीता वदति - ''न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम्। योद्धैः सम्यक् कर्म कुर्यात् लोकसंग्रहमेव च।।'' अर्थात् सच्च नेता सः, यः जनान् स्वकर्मसु प्रेरयन्, लोकसंग्रहाय एव आत्मबलं निवेशयति। अन्ततः, गीतानिर्दिष्टं नेतृत्वदर्शनं केवलं प्राचीनाध्यात्मिकसिद्धान्तं न, किन्तु वर्तमानयुगस्य नैतिक-व्यवहारिक-सामाजिक पुनरुत्थानस्य अपि अमोघं सूत्रम्। एवं अस्य अध्ययनस्य निष्कर्षः स्पष्टः - ''नेतृत्वं यदि धर्मे प्रतिष्ठितं, तर्हि तदेव लोकस्य कल्याणाय भवति।'' अतः गीतायाः मार्गदर्शनं अपि सर्वयुगेषु, सर्वक्षेत्रेषु, सर्वमानवेषु च शाश्वतं दीपज्वालासदृशं नित्यप्रेरणामूलं च अस्ति।

**सन्दर्भाः -**


*1. श्रीमद्भगवद्गीता, 2/47*

*2. तथैव, 2/48*

*3. तथैव, 5/18*

*4. तथैव, 3/35*

*5. तथैव, 3/21*

*6. तथैव, 3/22*

*7. तथैव, 2/47*

*8. तथैव, 2/38*

*9. तथैव, 6/5*

*10. तथैव, 1/53*

*11. तथैव, 3/26*

*12. तथैव, 3/35*

*13. तथैव, 3/4*

*14. तथैव, 3/5*

*15. तथैव, 6/5*

*16. तथैव, 3/21*

*17. तथैव, 5/18*

*18. तथैव, 3/20*

*19. तथैव, 18/61*

*20. तथैव, 18/11*

*21. तथैव, 9/27*


●●●

# 14

# मथुराप्रसाददीक्षितकृत-वीरप्रतापनाटके नाट्यतत्त्वानामवबोधनम्

*शुकदेवः भोई*

वीररसप्रधाननाटकमिदम्। अस्य वीरप्रतापनाटकस्यकर्त्ता महामहोपाध्यायः मथुराप्रसाददीक्षितः। आचार्यमथुराप्रसाददीक्षितः स्वतन्त्रता सेनानी लब्धप्रतिष्ठितः विद्वानासीत्। अस्य कालः एकोनविंशतिशताब्द्याः उत्तरार्द्धं वर्तते। सर्वतन्त्रस्वतन्त्रमहामहोपाध्यायमथुराप्रसाददीक्षितः अनेकानि नाटकानि विरचितानि ।तानि च-

1. वीरप्रतापनाटकम्।
2. भारतविजयम्।
3. वीरपृथ्वीराजविजयम्।
4. शङ्करविजयम्।
5. गान्धिविजयम्।
6. भूभरोद्धरणम्।
7. भक्तसुदर्शनम्।
8. भ्रष्टाचारसाम्राज्यम्।

एतानि नाटकानि विभिन्नरसेषु विलिखितानि। एतेषु नाटकेषु मध्ये वीरप्रतापनाटकम् अत्यन्तं महत्वपूर्णं नाटकं वर्तते। अत्र वीरप्रतापनाटके विभिन्नैः नाटकलक्षणकारैः कृतं लक्षणं कीदृक् घटितमित्यस्य सम्यग्वबोधनं प्रस्तूयते मया।

दशरूपकाणां वर्णनं कृतं नाट्यशास्त्रकर्तृभिः। रूपकाणां भेदकं तत्त्वं वस्तुनेतारसः इति।[1] वस्तु च द्विधा आधिकारिकं प्रासङ्गिकम् च।[2] अत्रः आधिकारिकं कथावस्तुमुख्यं कथावस्तु भवति। प्रासङ्गिकं कथावस्तुअङ्गरूपात्मकं

भवति। आधिकारिक[3] कथावस्तु इतिवृत्तेः समाप्तिपर्यन्तं प्रचलति। इदमेव मुख्यं कथावस्तु भवति। आचार्यमथुराप्रसाददीक्षितविरचितं वीरप्रतापनाटकं कथावस्तु दृष्ट्या महत्वपूर्णं वर्तते। अस्य इतिवृत्तिः ऐतिहासिकं वर्तते। अस्य कथावस्तुनः कथानकः वीररसप्रधानकः वर्तते। अत्र नाटके महाराणाप्रतापस्य विजयः मेवाडे महाराणाप्रतापस्य आधिपत्यमित्यादिकं आधिकारिकं कथावस्तु वर्तते।

प्रासङ्गिक[4] कथावस्तु तु इतिवृत्तेः मध्येआगच्छति एवञ्च प्रधानेतिवृत्तेः सहायकं भवति। दशरूपकस्य वृत्तौ विलिखितं यत् यस्येतिवृत्तस्य परप्रयोजनस्य सतस्तत्प्रसङ्गात् स्वप्रयोजनसिद्धिः तत्प्रासङ्गिकमितिवृत्तम्। प्रसङ्गनिर्वृत्तेः प्रासङ्गिकम्। प्रासङ्गिकं [5] कथावस्तुद्विविधंपताकाप्रकरीभेदात्। पताका कथावस्तु दूरमनुवर्तते। यदल्पमनुवर्तते सा प्रकरी। अत्र वीरप्रतापनाटके शक्तिसिंहादिवृत्तान्त रूप पताका प्रासङ्गिकं वर्तते। तथा च मध्ये.मध्ये भिल्लादिवृत्तान्तः प्रकरी कथावस्तु वर्तते। अत्र वीरप्रतापनाटकेइतिवृत्तम् ऐतिहासिकं वर्तते। वीरप्रतापनाटके नाट्यतत्वावबोधनायअधोलिखितं विवेचनमावश्यकम्। तद्यथा.

**नान्दी.**

नाटके पूर्वरङ्गस्य भेदः नान्दी वर्तते। अत्र नाटके नान्दीत्यस्य प्रयोगः रूपकस्य प्रयोगदशायां भवति उत वा पठनलेखनदशायां मङ्गलप्रयोजनाय च भवति। अत्र वीरप्रतापनाटकेऽपि मङ्गलबोधनार्थं नान्दीत्यस्याः ग्रन्थस्यारम्भे आचार्येण कृतः प्रयोग भरतेन अस्याः लक्षणंकृतम्।

**आशीर्वचनसंयुक्ता नित्यं यस्मात्प्रयुज्यते।**
**देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता।।**[6]

अत्र वीरप्रतापनाटके आचार्यदीक्षितः उपर्युक्तलक्षणानुसारेणैव नान्द्याः प्रयोगः कृतवान्। तद्यथा.

**या प्रत्यूहपतङ्गसङ्घदहने दीपप्रदीपायते**
**या चिन्तामणिकल्पपद्ममणिभाप्रोद्यत्कदम्बायते।**
**या चाज्ञानतमः समूहहरणे भास्वन्मयूखायते**
**सा विष्णोश्चरणारविन्दसुषमा विष्वक् प्रतापायते।।**[7]

अत्र अष्टापदानान्दी वर्तते ।अत्रनाटके प्रयुक्तपात्राणामपि सङ्केतः भवति। प्रतापायते क्रियापदेन नारटस्य नायकः महाराणाप्रतापस्य सङ्केतः भवति।

अस्याः नान्द्याः प्रथमचरणेन उर्ध्वप्रसारित्वं बोध्यते। द्वितीयचरणेन तिर्यक्प्रसारित्वं तथा च तृतीयचरणेन अधः प्रसारित्वं बोध्यते। तथैव तेषां स्वभावात्विष्णुपदसुषमायाश्च सर्वतः प्रसारित्वमिति। अत्र पतङ्गसङ्घसदृशस्य, अकबरसैन्यदहनस्य, अभिमतस्वातन्त्र्यप्राप्तेः, हल्दीघाटिकयुद्धसघट्टे बहिर्गमनस्य च वर्णनीयग्रन्थविषयस्य व्यङ्ग्यरूपेण प्रतिपादनात् बीजरूपवस्तु व्यज्यते।[8]

**नाटकलक्षणम्.**

दशप्रकारकेषु रूपकेषु मध्ये नाटकं सर्वाधिकं महत्त्वपूर्णं रूपकं वर्तते। आचार्यधनञ्जयेन नाटकं सर्वेषां रूपकाणां मूलकारणरूपेण स्वीकृतम्। नाटकस्य कथानकः प्रसिद्धः भवति यत्र मुखप्रतिमुखगर्भविमर्शनिर्वहणसन्धीनां समावेशः भवति। अत्र न्यूनतमः पञ्चाङ्गेषु निर्मितं भवति नाटकम्। अस्य नायकः प्रसिद्धवंशजः राजर्षिः धीरोदात्तादिगुणादियुक्तः भवति। शृङ्गारवीररसयोः एकः मुख्यः भवति। अन्ये रसाः मुख्यरसस्य कृते उपकारकाः भवन्ति।

अत्र वीरप्रतापनाटकमैतिहासिककथानकसंयुक्तं वर्तते। नाटकेऽस्मिन्पञ्चसन्धीनां[9] समावेशः यथावसरं अभवत्। वीरप्रतापनाटकस्य नायकः मेवाडाधिपतिः महाराणाप्रतापः वर्तते यः शौर्यादिगुणोपेतः विभिन्न-श्री समृद्धियुक्तः। अस्य नाटकस्य कथानकः सप्ताङ्केषु विभक्तम्।[10] अस्य नाटकस्य अङ्गीरसः वीरः वर्तते। अङ्गभूताः अन्ये रसाः सन्ति। अस्मिन्नाटके प्रमुखपात्राणि नायकः महाराणाप्रतापः प्रतिनायकः अकबरः, प्रतिनायकस्य सेनापतिः मानसिंहः प्रतापस्य भ्राता शक्तिसिंहः इत्यादयः प्रमुखपात्राणि सन्ति।

**सन्धयः.**

पञ्चकार्यावस्थानां पञ्चार्थप्रकृतिसंयोगात् पञ्चसन्धीनां निर्माणं भवति। एकप्रयोजनेन सम्बद्धं द्वितीयकथावस्तप्रयोजनं सन्धिः कथ्यते। अयं सन्धिः पञ्चविधः। एतेन सन्धिः प्रकृतनाटकस्य तथा च कथानकस्य विभिन्नांशानां मध्ये सम्बन्धं स्थापयति। येन सम्बन्धेन कथानकस्य प्रवाहः, रसनिष्पत्तिः, पात्राणां विकासश्च सम्यग्रूपेण भवति। सन्धीनां पञ्च. अर्थप्रकृतयः भवन्ति. बीजबिन्दुपताकाख्यप्रकरीकार्यलक्षणाः इति। पञ्चावस्थापि भवन्ति ते च आरम्भयत्नप्राप्त्याशानियताप्तिफलागमाः इति। पञ्चसन्धेःचतुःषष्टिः अङ्गानि सन्ति।

**मुखसन्धिः.**

मुखसन्धिः नाटकस्य आरम्भे भवति। यत्र कथानकस्य बीजम्; मुख्यविषयं च उत्पद्यते। अत्रअनेकाः अर्थाः रसाश्चसमुद्मघ द्भवन्ति। मुखसन्धेः द्वादश[11] अङ्गानि भवन्ति। उपक्षेपः, परिकरः, परिन्यासः, विलोभनम्, युक्तिः, प्राप्तिः, समाधानम्, विधानम्, परिभावना, उद्भेदः, भेदः, करणम्। मुखसन्धेः महत्त्वपूर्णं प्रभेदः उपक्षेपः। अत्र प्रकृतौ वीरप्रतापनाटके तु उपक्षेपः.

**सा विष्णोश्चरणारविन्दसुषमा विष्वक् प्रतापायते।**

**अपरे च**

**आर्येऽनया च गीत्या मे मेवाडं नीयते मनः। प्रतापांशं यत्र गृहणन्।**[12]

अत्रप्रतापस्योल्लेखनबीजस्य न्यासः भवति अतः अत्र मुखसन्धेः उपक्षेपः।

**सप्ताङ्काः.**

नाटकमिदं सप्ताङ्गेषु विभक्तमस्ति। प्रत्यङ्के नाटकस्य कथायाः विस्तारः विकासश्च दृश्येते। सप्ताङ्काः नाटकस्य विस्तारं दर्शयन्ति। प्रथमाङ्के कथायाः आरम्भः भवति। द्वितीयाङ्के सङ्घर्षस्यारम्भः भवति तथा च शक्तिसिहस्य राज्यात् निष्कासनं वर्णितमस्ति। तृतीयाङ्के मानसिंहस्य मानभङ्गनस्य वर्णनमस्ति तेन संघर्षस्य वृद्धिः भवति। चतुर्थाङ्के प्रतापस्य विरुद्धे अकबरद्वारा सम्यग्योजनानुसारेण युद्ध आरम्भो भवति। पञ्चमाङ्के प्रतापद्वारा अकबरेण सह सन्ध्यर्थं सन्धिपत्रलेखनस्य वर्णनम्। षष्ठाङ्के युद्धस्य परिणामस्य सूचना प्राप्यते। सप्ताङ्के युद्धस्य परिणामः प्राप्यते। सर्वे गच्छन्ति मेवाडे महाराणाप्रतापस्य साम्राज्यं स्थापयन्ति। एतेन समस्यायाः समाधानं भवति। यथोक्तं दशरूपके.

**पञ्चाङ्कमेतदवरं दशाङ्कं नाटकं परम्।**[13]

**अङ्को नानाप्रकारार्थसंविधानरसाश्रयः।।**[14]

**रसाः.**

अस्य नाटकस्य अङ्गीरसः वीरः वर्तते। महाराणाप्रतापस्य शौर्यं, पराक्रमः, स्वातन्त्र्यप्रेम च वीररसं सम्यग् पोषयति। यथा.

**जानाम्यस्य शिरोगदं कपटिनो मद्दण्डसंघुट्टना.**

**त्सोऽस्मद्वीरगणप्रभूतविशिखैर्द्वित्रैर्दिनैः सेत्स्यति।**

**तीक्ष्णोदग्र प्राणत्तपृतनास्तीर्णक्षमादारुणं.**

**दृष्ट्वा स्वं विषयं स्वयं प्रशमितः शीर्ष्णो गदो मूलतः।।**[15]

अत्र महाराणाप्रतापः, मानसिंहश्च आलम्बनविभावः क्रोधयुक्तवचनं मानसिंहेः उद्दीपनविभावः भुजदण्डादिशब्दप्रयोगः शब्दप्रयोगे अत्र वीररसः। अन्ये रसाः वीरप्रतापनाटके करुणः; यदा प्रतापः स्वदेशं त्यक्त्वा वने निवसति। रौद्र रसःअत्र नाटके युद्धवर्णने वर्तते। भयानकरसः शत्रुसैन्यागमनेअद्भुतरसः हल्दीघाटीयुद्धे तथा च द्वात्रिंशद्घ दुर्गप्राप्त्यवसरे प्रतापस्य पराक्रमदर्शने यथास्थानमङ्गरूपेण प्रयुक्ताः सन्ति।

**नायकः.**

वीरप्रतापनाटकस्य नायकः महाराणाप्रतापः वर्तते। अयं धीरोदात्तः, प्रख्यातवंशजः, राजर्षिः प्रतापी च वर्तते। महाराणाप्रतापस्य चरित्रे शौर्यं त्यागः, स्वाभिमानः, प्रजावात्सल्यं च दृश्यते। महाराणाप्रतापः स्वदेशस्य रक्षणार्थं सर्वस्वं त्यक्त्वा सङ्घर्षं करोति। नायकस्य लक्षणमुक्तम् .

**अभिगम्यगुणैर्युक्तो धीरोदात्तः प्रतापवान्।**
**कीर्तिकामो महोत्साहस्त्रय्यास्त्रता महीपतिः।।**[16]

**इतिहासाश्रितकथावस्तु.**

अस्य वीरप्रतापनाटकस्य कथावस्तु ऐतिहासिकं वर्तते। अस्यां कथायां महाराणाप्रतापस्य जीवनचरितं, स्वतन्त्रतायैकृतं प्रयत्नं वर्णितमस्ति। मेवाडराज्यस्य स्वतन्त्रता प्राप्त्यर्थं महाराणाप्रतापस्य सङ्घर्षः, हल्दीघाटीयुद्धम्, प्रतापस्य अश्वस्य चेतकस्य वर्णनम् इत्यादयः ऐतिहासिकघटनाः अत्र वीरप्रतापनाटके वर्णिताः। यथोक्तं दशरुपके

**प्रख्यातवंशो राजर्षिर्दिव्यो वा यत्रनायकः।**
**तत्प्रख्यातं विधातव्यं वृत्तमत्राधिकारिकम्।।**[17]

**गोपुच्छाग्ररचना.**

नाटकस्य अङ्कानां रचना गोपुच्छाग्रसदृशी कृताऽस्ति। अत्रापि वीरप्रतापनाटके आरम्भस्य अङ्गानि विस्तृतं मध्येसमं वर्णनम् अन्तिमे अङ्के च लघुविस्तारं वर्तते। इति धिया अत्र गोपुच्छाग्ररचना वर्तते।

**भाषाप्रयोगः.**

अस्मिन्नाटके संस्कृतप्राकृतयोः उभयोरपि भाषयोः सम्यग् प्रयोगोऽभवत्। नाट्ये शास्त्रलक्षणानुसारेण उच्चपात्राणि संस्कृतभाषां वदन्ति निम्नपात्राणि प्राकृतभाषां वदन्ति। अत्राऽपि नाटके उच्चपात्राणि संस्कृतं संवदन्ति।

ते च. महाराणाप्रतापः, मानसिंहः, अकबरः इत्यादयः। निम्नपात्राणि प्राकृतभाषां वदन्ति ते च. सैनिकाः, वनवासिनः, भिल्लादयः प्राकृतं वदन्ति। अनेन भाषायाः सम्यग्प्रयोगेण पात्राणां स्तरभेदः सुस्पष्टः भवति।

**अङ्गोपाङ्गानि.**

अस्मिन्नाटके वीरप्रतापे विष्कम्भाः, प्रवेशकाः, चूलिकादयः यथावसरं सम्यम्प्रयुक्ताः सन्ति। विष्कम्भकादिद्वारापूर्वकथायाः संक्षेपः आगामिकथायाः सूचना च दीयते।[18]

**पताकास्थानकादयः.**

पताकास्थानकानि बीजं बिन्दवश्च अत्र वीरप्रतापनाटके यथोचितं समाविष्टाः सन्ति। पताकास्थानकद्वारामुख्यकथायाः समर्थनं भवति। बीजेन कथायाः मूलविषयः सूच्यते। बिन्दु द्वारा कथानकस्य विकासः प्रदर्श्यते। एतैः सर्वैः कथानकस्थ सौष्ठवं वर्धते।

**भावाभिव्यक्तिः.**

अस्मिन्नाटके विभावाः, अनुभावाः, स्थायिभावाः व्यभिचारिभावाश्च सम्यग्रूपेण व्यवस्थिताः सन्ति। तद्यथा. महाराणाप्रतापस्य देशप्रेमोत्साहस्थायि भावः रणभूमौ अरिसैन्यदर्शनम्आलम्बनविभावः अरीणां चेष्टादिः उद्दीपनविभावः महाराणाप्रतापस्य क्रोधपूर्णवचनं युद्धादिकञ्च अनुभावः, युद्धकाले आवेगगर्वादयः व्यभिचारिभावाः इत्यादि द्वारा रसनिष्पत्तिः[19] सम्यग्तया भवति।

**नाट्यशास्त्रानुगुणता.**

नाटकमिदं नाट्यं शास्त्रस्य लक्षणानुसारेण विलिखितम्। आचार्यभरतेन विरचितं नाट्यशास्त्रनुसारं सर्वाणि लक्षणानि सङ्गच्छन्ते यथा. नान्दी. प्रस्तावना . विष्कम्भकः. प्रवेशकः. अङ्कविभागः. सूत्रधारस्य भूमिका च उपयुक्तस्थाने प्रयुक्तानि सन्ति। अतः रङ्गमञ्चे अस्य वीरप्रतापनाटकस्य प्रयोगः सरलः भवति। अत्र नाटकेअष्टपदानान्दी वर्तते।

**चरित्र-चित्रणम् .**

वीरप्रतापनाटके पात्राणां चरित्रचित्रणमतीव सजीवतया कृतं कविना। अस्य नायकस्य शौर्यं, त्यागः, स्वाभिमानश्च सम्यग्तया प्रदर्शितः। अन्येषां पात्राणाम् अकबरः, शक्तिसिंहः, चेतकः इत्यादीनामपि चरित्राणि सम्यग्तया चित्रितानि।

**संवादाः.**

अस्मिन्नाटके संवादाः अत्यन्तं प्रभावशालिनः सन्ति। ओजस्विनः भावपूर्णसंयुक्ताः सन्ति । तद्यथा. महाराणाप्रतापस्य स्वतन्त्रताविषयकः, संवादः, मानसिंहेन सह वार्ता, अकबरस्य दूतेन सह संवादः इत्यादयः प्रसिद्धाः सन्ति। मानसिंहस्य सालुम्बेनसह संवादः यथा; मानो भोजनपात्रात्पञ्चौदनतण्डुलानादाय उत्तरीये बद्धवा चोत्थितः-

**मानः.**

**जानाम्यस्य शिरोगदं कपटिनो मद्दण्डसंघुट्टना.**
**त्सोऽस्मद्वीरगणप्रभूतविशिखैर्द्वित्रैर्दिनैः सेत्स्यति ।**
**तीक्ष्णोदग्रपाणतप्रतनास्तीर्णक्षमादारुणं.**
**दृष्ट्वा स्वं विषयं स्वयं प्रशमिता शीर्षणो गदो मूलतः ।।**[20]

**सालुम्बः -** सन्निपातरोगिणः किं किं न जल्पन्ति।[21] याहि याहि यत्ते शक्यं तदाचर। स्वसामर्थ्यं नावशेषयेः। इति वादप्रतिवादेन संवादः जातः।

**देशकालवातावरणम्.**

षोडशशताब्द्याः मेवाडप्रान्तस्य वातावरणं सम्यग्चित्रितम्। अस्मिन्नाटके तत्कालीनं राजनैतिकं सामाजिकं सांस्कृतिकञ्च परिवेशं स्पष्टतया ज्ञातुं शक्यते सामाजिकैः।

**शिल्पसौन्दर्यम्.**

अस्य नाटकस्य भाषाशैली सरला, प्रवाहमयी, भावपूर्णा च वर्तते। अत्र अलङ्काराणां, छन्दसां च समुचितः प्रयोगः कृतः। अत्र उपमा, रूपकं, उत्प्रेक्षा, अनुप्रासादयः अलङ्काराणां समुचितः प्रयोगः कृतः कविना।

इत्थं प्रकारेणवीरप्रतापनाटकं सर्वैः नाट्यतत्त्वैः सुसज्जितं दृश्यते। इदं न केवलं नाट्यशास्त्रानुगुणमपितु कलात्मकदृष्ट्या, सौन्दर्यशास्त्रदृष्ट्या च सर्वोत्कृष्टं नाटकं वर्तते। अस्मिन्नाटके नाट्यशास्त्रस्य सर्वाणि लक्षणानि सङ्गच्छन्ते। इत्थमत्र वीरप्रतापनाटके नाट्यतत्त्वानामवबोधनमुपर्युक्तदृष्ट्या सम्यग्तया मया प्रदर्शितम्।

**संदर्भाः -**

1. *वस्तुनेतारसस्तेषां भेदकः - दशरूपकम्, 1.11/1*
2. *वस्तु च द्विधा। तत्राधिकारिकं मुख्यमङ्गं प्रासङ्गिकं विदुः।। दशरूपकम्*

3. अधिकारः फलस्वाम्यमधिकारी च तत्प्रभुः। तन्निर्वर्त्यमभिव्यापि वृत्तं स्यादाधिकारिकम्। दशरूपकम्, 2.12.
4. प्रासङ्गिकं परार्थस्य स्वार्थो यस्य प्रसङ्गतः। दशरूपकम्, 1.13/2
5. सानुबन्धं पताकाख्यं प्रकरी च प्रदेशभाक्। द.श., 1.13
6. नाट्यशास्त्रम्, 5.4
7. वीरप्रतापनाटकम्, नान्दी
8. वीरप्रतापनारकम्, नान्दीटीका
9. नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम्। विलासर्द्ध्यादि गुणवद्युक्तं नानाविभूतिभिः सा.द. षष्ठपरिच्छेदे।
10. सुखदुःखसमुद्भूति नानारसनिरन्तरम्। पञ्चादिका दशपरास्तत्राङ्काः परिकीर्तिताः।। सा.द. षष्ठपरिच्छेदे अन्तरैकार्थसम्बन्धः सन्धिरेकान्वये सति। मुखप्रतिमुखे गर्भः सावमर्शोपसंहृतिः।। द.श., 1.22
11. उपक्षेपःपरिकरः परिन्यासो विलोभनम्। युक्तिः प्राप्तिः समाधानं विधानं परिभावना। उद्भेदभेदकरणान्यन्वर्थान्यथ लक्षणम्।। द.श., 1.24
12. वीरप्रतापनाटकम्, नान्दी चतुर्थचरणे
13. दशरूपकम्, 3.34
14. दशरूपकम्, 3.31
15. वीरप्रतापनाटकम्, 3.10
16. दशरूपकम्, 3.20
17. दशकपकम्, 3.21
18. आदौ विष्कम्भकं कुर्यादङ्कं वा कार्ययुक्तितः। अपेक्षितं परित्यज्य नीरसं वस्तुविस्तरम्, यदा सन्दर्शयेत् शेषं कुर्याद् विष्कम्भकं तदा।। दशरूपकम्, 3.25
19. अनुभावविभावाभ्यां स्थायिना व्यभिचारिभिः। गृहीतमुक्तैः कर्तव्यमङ्गिनः परिपोषणम्।। द.रू., 3.28.
20. वीरप्रतापनाटकम्, 3.15
21. वीरप्रतापनाटकम्, 3.17.

●●●

# 15

# कप्फिणाभ्युदयमहाकाव्ये ध्वनितत्त्वम्

*निरुपमात्रिपाठी*

ध्वनि- सम्प्रदास्य संस्थापकः आचार्यः आनन्दवर्धनः न्यरुरूपत् ध्वन्यालोके -

**प्रधानगुणभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थिते।**
**काव्ये उभे ततोऽन्यद्यत्तच्चित्रमभिधीयते।।**[1]

अर्थात् काव्ये व्यङ्ग्यार्थस्यैव प्राधान्यम्। व्यङ्ग्यस्य प्राधान्ये ध्वनिसंज्ञितः काव्यप्रकारो भवति। काव्यस्यात्मा ध्वनिरेव इति सुष्ठु प्रतिपादितं ध्वन्यालोके। व्यङ्ग्यस्य गुणीभूते, काव्येऽङ्गरूपे स्थिते गुणीभूतव्यग्य-काव्यम्। ततोऽन्यत् यत् काव्यं रसभावादितात्पर्यरहितं व्यङ्ग्यार्थप्रकाशने शून्यं तत् तु केवलं वाच्यवाचकमात्रेऽवस्थितं चित्रमेव। उक्तम् - यत्र न प्रतीयमानार्थसंस्पर्शः।... प्रतीयमानो ह्यर्थस्त्रिभेदः प्राक् प्रदर्शितः। तत्र यत्र वस्त्वलङ्कारान्तरं वा व्यङ्ग्यं नास्ति स नाम चित्रस्य कल्प्यताम्।[2]

यथा कस्यचिद् चित्रं वस्तुनः अनुकरणरूपत्वात् जीवनाभावे मुख्यस्वरूपाद् भिन्नमेव वर्तते तथैव ध्वनिगुणीभूतव्यङ्ग्याभ्यां रहितं काव्यं मुख्यकाव्यं भवितुं नार्हति। काव्यस्यानुकरणरूपमिदं काव्यम्। वाचकवाच्ययोरेव वैचिर्त्यं तत्र विद्यते। सन्तिबहवः कवयः यैः तम् वैचित्र्यम् अभिलक्ष्य काव्यरचनाकृता। एवमेव शब्दार्थचित्रभेदेन चित्रं द्विविधम्। किञ्चिच्छब्दचित्रं यथा यमकादि। किञ्चिदर्थचित्रं यथा वाक्यार्थरूपे स्थितः उपमोत्प्रेक्षालङ्कारादि।

वस्तुतस्तु सुहृदहृदयहारिणः काव्यस्य ईदृशः कोऽपि प्रकारो न विद्यते यस्मिन् प्रतीयमानस्य संस्पर्शः न दृश्यते। सत्सु अलङ्कारेष्वपि प्रतीयमानार्थस्याव-स्थितिः तेषु सौष्ठवम् उत्पादयति। मम्मटस्य विचारोऽत्र उल्लेखनीयः –

रसादिस्तु व्यङ्ग्योऽर्थोऽलङ्कारान्तरं सर्वत्राव्यभिचारी, इत्यगणयित्वैव

तदलङ्कारा उदाहृताः। तद्रहितत्वेन तु उदाह्रियमाणा विरसतामावहन्तीति पूर्वापरविरुद्धाभिधानमिति न चोदनीयम्।[3]

आनन्दवर्धनोऽपि इदमेवोपस्थापयति –

यथा स्त्रीणामलङ्कारवैविध्येषु लज्जा सर्वोपरि भवति तथैवालङ्कार-सम्पन्ना महाकवीनां वाणी प्रतीयमानार्थ-संस्पर्शेमैव हृदयहारिणी भवति, इत्यत्र नास्ति संशयः -

**मुख्यां महाकविगिरामलङ्कृतिभृतामपि।**
**प्रतीयमानच्छायैषाभूषालज्जेवयोषिताम्।।**[4]

किन्तु ये रसादितात्पर्यमनपेक्ष्यैव काव्यं कुर्वन्ति, तेषां प्रवृत्तिम् अभिलक्ष्यैव आनन्दवर्धनः काव्ये चित्रस्यस्थितिम् अकार्षीत् - ...एतच्च चित्रं कवीनां विशृंङ्खलगिरांरसादितात्पर्यमनपेक्ष्यैव काव्य-प्रवृत्ति-दर्शनादस्माभिः परिकल्पितम्।[5]

अवन्तिवर्मणः साम्राज्येध्वनिकारस्य समकालिक एव आसीत् कविः शिवस्वामी इति ज्ञायते कल्हणस्य राजतरङ्गिणीत : -

**मुक्ताकणः शिवस्वामी कविरानन्दवर्धनः।**
**प्रथां रत्नाकरश्चागात् साम्राज्येऽवन्तिवर्मणः।।**

अस्मिनुक्तेषु काव्यकलामर्मज्ञेषु ध्वन्यालोककर्तृता आनन्दवर्धनः सुप्रथितस्य हरविजयमहाकाव्यस्य प्रणेता रत्नाकरश्च स्वग्रन्थाभ्यामेव अपारं प्रसिद्धिम् आप्तवन्तौ। मुक्ताकणस्य यद्यपि कोऽपि ग्रन्थः नोपलभ्यते, किन्तु विविधैस्सूक्तिभिः विदुषां विदितचर एवं कविरयम्। शिवस्वामिना विरचितंविंशतिसर्गसंवलितं कप्फिणाभ्युदयमहाकाव्यम्। महाकाव्यस्य विविधैः वैशिष्ट्यैः समन्वितमिदं महाकाव्यं नगरपर्वतर्तुवनविहारजलक्रीडा प्रदोषचन्द्रोदय मधुपानसुरत-प्रभातादिवर्णनैः मनोहरम्अथच सूचयति स्वरचनाकरस्य प्रतिभानैपुण्यम्। शिवस्वामीनोऽनेकानि पद्यान्युपलभ्यन्ते, यानि टीकासर्वस्वे पदचन्द्रिकायामन्येषु च बहुषु सुभाषितसङ्ग्रहेषूदाहृतानि दृश्यन्ते। मम्मट-सर्वानन्द रायमुकुट - श्रीधर - शार्ङ्गधर - बल्लभदेवादिविदुषां ग्रन्थेषूद्धृतैरेतस्य महाकवेः पद्यैः प्रतीयते यत्तदानीमस्य महाकाव्यस्य प्रतिष्ठा परां कोटिं प्राप्तासीत्। कप्फिणाभ्युदय-महाकाव्यस्याधारभूता एकैतिहासिकी बौद्धावदानकथा वर्तते।

कप्फिणशब्दस्तु बौद्धग्रन्थेषु प्रायेणोपलभ्यते। महाकाव्येऽत्र शिवस्वामिना लीलावती नरेशेन कप्फिणेन श्रावस्तीनरेशस्य प्रसेनजितो विजयः, प्रसेनजिता ध्यातेन बुद्धेनाविर्भूय स्वप्रभावेन कप्फिणस्य पराभवः प्रशान्ताभिमानस्य कप्फिणस्य बुद्धस्य शरणगमनं धर्मोपदेशप्राप्तिश्च इत्येतावदेव प्राधान्येन वर्णितम्। अस्मिन् काव्ये भट्टि-माघ-भारवि-रत्नाकरादीनांविश्रुतकवीनां प्रचुर प्रभावोदरी दृश्यते। यथा माघोदारुकस्य मुखेनरैवतपर्वतं, भारविर्यक्षस्य मुखेन हिमालयं तथैव शिवस्वामी विद्या धरस्य मुखेन मलयाचलं वर्णयामास। यथा भारविः सर्गान्तिमपद्ये लक्ष्मी-शब्दं, माघः श्री-शब्दं प्रयुक्तवन्तौ तथैव शिवस्वामिना शिवशब्दः प्रयुक्तः।

काव्यस्यान्ते महाकविना पद्यद्वये स्व-वैशिष्ट्यं वर्णयाञ्चकार। एताभ्यां कवेः शिवाङ्क इति उपाधिरपि सूचितः। अत्रैव कविः चित्रकाव्योप्देष्टा इत्यनेन रूपेणात्मानं श्लाघते –

**...यद्वाणीश्रुतिमात्रकेण सुधियां चेतश्चमत्कारिणी**
**येनामुद्रि विरोधिनां मुखकुलं स्वोद्गारकौतूहलैः।**
**तेनाज्ञानघनान्धकारपटलप्रक्षेपदीपाङ्कुरं**
**व्यातेने कृतिनां कृते सुकृतिना काव्यं शिवस्वामिना।।**

अन्यच्च - **विदितबहुकथार्थश्चित्रकाव्योपदेष्टा**
**यमककविरगम्यश्चारुसन्दानेभाणी।**
**अनुकृतरघुकारोऽभ्यस्तमेण्ठप्रचारो**
**जयति कविरुदारो दण्डिदण्डः शिवाङ्कः।।**[7]

एतेन कप्फिणाभ्युदयमहाकाव्यं प्रधान्येन एकं चित्रकाव्यमेवास्ति इति ज्ञायते, किन्तु अत्र विचारणीयमिदं यत् महाकाव्येऽस्मिन् सर्वत्र चित्रत्वमेव प्रसक्तमथवा प्रतीयमास्य स्थितिरपि वर्तते।

अस्मिन् क्रमे उल्लेख्यमिदं यत् काव्यप्रकाशकारः मम्मटः स्वग्रन्थे नामोल्लेखं विनैव कप्फिणाभ्युदयस्य चतुरः श्लोकान् ध्वनिकाव्यस्य विविधप्रसङ्गे उल्लिखितवान्। शब्दशक्तिमूलानुरणन रूपव्यङ्ग्यस्योपमालङ्कारध्वनेरुदाहरणिदम्-

**उल्लास्य कालकरवालमहाम्बुवाहं**
**देवेन येन जरठोर्जितगर्जितेन।**
**निर्वापितः सकल एव रणे रिपूणां**
**धाराजलैस्त्रिजगति ज्वलितः प्रतापः।।**[8]

इयं कप्फिणस्य स्तुतिः। राज्ञः इन्द्रस्य च साम्यमत्र ध्वनितम्। यथेन्द्रः मेघानां धारासहस्रैः दावानलं शमयति तथैवायं राजा स्वखड्गरूपाम्बुवाहेन अरीणां प्रतापाग्निं निर्वापयति। अत्र प्रकरणेन राजपरकार्थे अभिधाया नियन्त्रणात् तयाभिधया बोधितुमशक्यो वस्तुरूपो द्वितीयार्थो व्यङ्ग्य एव। भिन्नयोः प्रथम द्वितीयार्थयोः का सङ्गति इति मीमांसायामुपमालङ्कारस्यव्यङ्ग्यता एवावधार्यते। अस्मादत्र अलङ्कारध्वनि-प्रसङ्गः। कथितं मम्मटेन -

अत्र वाक्यस्यासम्बद्धार्थाभिधायकत्वं मा प्रासाङ्क्षीदिति प्राकरणिका प्राकरणिकयोरुपमानोपमेयभावः कल्पनीय इत्यत्रोपमालङ्कारो व्यङ्ग्यः।[9]

वाक्यस्य असम्बद्धार्थकतां निवारणाय प्राकरणिाप्राकरणिकयो रुपमानोपमेयभावस्य कल्पनम्। एतस्मादेव अत्रोपमालङ्कारो व्यङ्ग्य एव।

एवमेव स्वतः सम्भविना अलङ्कारेण वस्तुव्यङ्ग्यस्योदाहरणरूपेण काव्यप्रकाशे कप्फिणाभ्युदयमहाकाव्याद् उद्धृतम् अपरं पद्यमस्ति -

**दर्पान्धगन्धगजकुम्भकपाटकूट-**
**संक्रान्तिनिघ्नघनशोणितशोणशोचिः।**
**वीरैर्व्यलोकि युधि कोपकषायकान्तिः**
**कालीकटाक्ष इव यस्य करे कृपाणः।।**[10]

अर्थात् यस्य राज्ञः करस्थः कृपाणः युद्धे शत्रुभटैः कालीकटाक्ष इव दृष्टोऽनेनोपमालङ्कारेण राजा क्षणादेव शत्रुसेनां विनङ्क्ष्यतीति वस्तुरूपोऽर्थो व्यङ्ग्यः। इयमोपमा सादृश्यस्य लोकेऽपि सत्त्वात् स्वतःसंभविनी।

काव्यप्रकाशे द्वितीये उल्लासेऽभिधामूलां शाब्दीं व्यञ्जनामुदाहरति मम्मटः कप्फिणाभ्युदयात् -

**भद्रात्मनो दुरधिरोहतनोर्विशालवंशोन्नतेः कृतशिलीमुखसंग्रहस्य।**
**यस्यानुपप्लुतगतेः परवारणस्य दानाम्बुसेकसुभगः सततं करोऽभूत्।।**[11]

अत्रापि शिवस्वामिनः नामोल्लेखं नास्ति। काव्यप्रकाशस्य बालबोधिनीटीकायामुल्लिखितम्-कस्यचिद्राज्ञो वर्णनमिदम्।[12] वस्तुस्तु कप्फिणाभ्युदयस्यपरिशीलनात्विदितःयदत्रकप्फिणपरोऽर्थः वाच्यरूपः हस्तिनश्चच व्यङ्ग्यरूपः। अत्रानेकार्थकानां भद्रात्मनः, दुरधिसंरोहतनोः, विशालवंशोन्नतेः इत्यादिशब्दानां प्रकरणेन अभिधायाः राजपरकार्थे नियन्त्रिते सहृदयानां

प्रतिभासामर्थ्यात् गजस्य अर्थस्य या प्रतीतिः सा व्यञ्जनाय एव भवति। द्वितीयगजपरकार्थः तात्पर्यविषयोऽपि तात्पर्यग्राहकप्रकरणाद्यभावात् व्यङ्ग्यार्थः। वृतिं विना शब्दार्थबोधो न भवतीति स्पष्टमेव। कविकौशलादेव अत्र गजपक्षेऽपि अर्थप्रतीतिःभवति। नृपपरकं प्राकरणिकार्थं बोधयित्वा विरमति अभिधा। मुख्यार्थबाधाद्यभावात् अत्र लक्षणायाः प्रसङ्गो नास्ति। अतएव गजपरकोऽर्थोव्यञ्जनयैव लभ्यते। नृपगजयोर्द्वयोरप्यर्थयोःपारस्परिके सम्बन्धे, उपमानोपभेयभावोऽपि व्यङ्ग्य एव। अत्रद्वयोरर्थयोरुपमाध्वनौ पर्यवसानम्। नानार्थेषु यत्रानेकत्र वक्तृतात्पर्यं तत्र श्लेषस्यावसरः। अस्मिन् प्रसङ्गे श्लेषस्य सम्भावनापि न करणीया।

अस्तु। एतानि मम्मटप्रदत्तानिकप्फिणाभ्युदयस्योदाहरणानि प्रतीयमानार्थं प्रति शिवस्वामिनःरुचिमेव प्रदर्शयन्ति। काव्ये प्रतीयमानास्य प्रतिष्ठामानन्दवर्धनोऽकार्षीदेव -

**प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।**
**यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु।।**[13]

वस्तुमात्रमलङ्काररसादिषु प्रकारेषु प्रतीयमानार्थस्य वाच्यादन्यत्वम्। समासगाश्रौत्युपमाप्रसङ्गेऽपि मम्मटउदधार्षीद् इदं पद्यं यत् शिवस्वामिना विरचितम्-

**अत्यायतैर्नियमकारिभिरुद्धृतानां दिव्यैः प्रभाभिरनपायमयैरुपायैः।**
**शौरिर्भुजैरिव चतुर्भिरदः सदा यो लक्ष्मीविलासभवनैर्भुवनं वभार।।**[14]

अत्र भुजैरित्युपमानम् उपायैरित्युपमेयम् अत्यायतत्वादिः साधारणो धर्मः, इवशब्द उपमाप्रतिपादकः। भुजोपाययोः श्लिष्टविशेषणानि सन्ति अत्यायतैः नियमकारिभिः, दिव्यैः इत्यादीनि। अलङ्काराणां रसानुकूलता प्रसिद्ध एव। बाह्यशरीरगतालङ्कारसाम्याद् तेऽङ्गिनः रसस्य शोभाधायका भवन्ति। उक्तं हि ध्वन्यालोके-

**अलङ्कारो हि बाह्यालङ्कारसाम्यादङ्गिनश्चारुत्वं हेतुरुच्यते।**

अपि च -

रसबन्धेष्वत्यातमनाः कविर्यस्मादलङ्कारं तदङ्गतया विवक्षति। यथा-
चलापाङ्गां दृष्टिं स्पृशसि बहुशो वेपथुमतीं

**रहस्याख्यायीव स्वनसि मृदु कर्णान्तिकचरः।**

**करौ व्याधुन्वन्त्याः पिबसि रतिसर्वस्वमधरं**

**वयं तत्त्वान्वेषान्मधुकर हतास्त्वं खलु कृती।।**

**अत्र हि भ्रमरस्वभावोक्तिरलङ्कारो रसानुगुणः।**[16]

ध्वन्यालोकस्य प्रसङ्गेइदमपि विचारणीयम् – यत्र तु रसादीनामविषयत्वं स काव्यप्रकारो न सम्भवत्येव। यस्मादवस्तुसंस्पृशिता काव्यस्य नोपपद्यते। वस्तु च सर्वमेव जगद्गतमवश्यं कस्यचिद्रसस्य भावस्य वाङ्गत्वं प्रतिप्रद्यते अन्ततो विभावत्वेन। चित्तवृत्तिविशेषा हि रसादयः, न च तदस्ति वस्तु किञ्चिद्यन्न चित्तवृत्तिविशेषमुपजनयति तदनुत्पादने वा कविविषयतैव तस्य न स्यात् कविविषयश्च चित्रतया कश्चिन्निरूप्यते।[17]

कप्फिणाभ्युदयस्य अष्टादशसर्गे सन्ति नैकानि पद्यानि चित्रलङ्कारसमन्वितानि। काव्यप्रकाशे चित्रालङ्कारस्य परिभाषा प्रदत्ता -

**तच्चित्रं यत्र वर्णानां खड्गाद्याति हेतुता।**

**सन्निवेषेण यत्र न्यस्ता वर्णाः खड्गमुरजपद्माद्याकारमुल्लासयन्ति तच्चित्रं काव्यम्।**[18]

अनया परिभाषया द्रष्टव्यानि कप्फिणाभ्युदस्य पद्यानि यथा–

गोमूत्रिकाबन्धः –

**प्रधनेऽधिकृता योधा विदधुर्जयसाधनम्।**

**कोपसेविकृताबाधास्वादनैर्जयसाधनम्।।**[19]

गोमूत्रिकाबन्धः (सर्ग १८, श्लोक ४८)



पद्मबन्धः -

**यानवार्ता सती ज्ञेया यागेऽतीव न साव्यया।**
**या व्यसा किन्तु या माया यामाया यनवानया।।**[20]

पद्मबन्धः ( सर्ग १८, श्लोक ७४ )




मुरजबन्धः -

**आरारास धरा सर्वा शूराद्धवरासवा।**
**वासरावसरादस्ताधूसरासधरादरात्।।**[21]

मुरजबन्धः (सर्गः १८, श्लोक ५९)



शब्दानां वैचित्र्यमपि दृश्यतेऽस्मिन् महाकाव्ये।

यथा महायमकम् -

**समासितो मानयतः कलोहतः समासितो मानयतः कलोहतः।**
**समासितो मानयतः कलोहतः समासितो मानयतः कलोहतः।।**[22] **(महायमकम् )**

आद्यन्तयमकम् -

**राजितस्तेन सौर्याख्यो हृत्वारेर्बलराजितः।**

**राजितस्तेजसा सोऽभूत् संप्राप्तोन्नतिराजितः।।**[23] **(आद्यन्तयमकम् )**

एवमेव पुनरुक्तवदाभासोऽपि दृश्यते - पुनरुक्तवदाभासो भिन्नाकारशब्दगा। एकार्थतेव।[24]

इत्यनेन निर्देशानुसारेण –

अत्रपुनरुक्ताभासः -

**भवतस्तव हे नाथ कथिता गदिता मया।**

**भिन्धि दारय तापाय तां मे राजय शोभय।।**[25]

एवमेव चतुरक्षर - द्वयक्षर - निरोष्ठ्य - अतालव्य – एकाक्षरादिष्वपि स्ववर्णनकौशलं प्रदर्शितं शिवस्वामिना।[26] एतानि सर्वाणि चित्रलङ्कारस्योदाहरणानि। अत्र ध्यातव्यमिदं यत्चित्रलङ्कारे प्रयुक्तस्य चित्रशब्दस्य चित्रकाव्ये प्रयुक्तस्य चित्रशब्देनसाम्यं न लभते। चित्रकाव्यस्य सम्बन्धोव्यङ्ग्येन वर्तते। कवेः रसादीनामविवक्षाया- मेव काव्ये चित्रत्वमुपपन्नम्। आनन्दवर्धनोऽपि कथयति ध्वन्यालोके–सत्यं न तादृक्काव्यप्रकारोऽस्ति यत्र रसादीनामप्रतीतिः। किन्तु यदा रसभावादिविवक्षाशून्यः कविः शब्दालङ्कारमर्थालङ्कारं वोपनिबध्नाति तदा तद्विवक्षापेक्षया रसादिशून्यतार्थस्थ परिकल्प्यते। विवक्षोपारूढ एव हि काव्ये शब्दानामर्थः। वाच्यसामर्थ्ययवशेन च कविविवक्षाविरहेऽपि तथाविधे विषये रसादिप्रतीतिर्भवन्ती परिदुर्बला भवतीत्यनेनापि प्रकारेण नीरसत्वं परिकल्प्य चित्रविषयो व्यवस्थाप्यते। तद्दिशमुक्तम् **-रसभावादिविषयविवक्षाविरहे सति। अलङ्कारनिबन्धो यः स चित्रविषयो मतः।। रसादिषु विवक्षा तु स्यात्तात्पर्यवती यदा। तदा नास्त्येव तत्काव्यं ध्वनेर्यत्र न गोचरः।।**[27]

उक्तेन विमर्शेन निष्कर्षरूपेण ज्ञायते यत् चित्रकाव्योपदेष्टा अयं महान् कविः ध्वनेरसम्पृक्तो नास्ति। यद्यपि अनेन चित्रालङ्कारंप्रतिस्वरुचिः प्रदर्शितः तथापि नैकानि पद्यानि शिवस्वामिनः ध्वनिं प्रत्याकर्षणमपि सूचयन्ति। यद्यपि सर्वत्र काव्येऽन्ततो विभावादिरूपतया पर्यवसानम्, तथापि स्फुटस्य रसस्यनुपलम्भादेव चित्रकाव्यस्य स्थितिःसम्भवति।

**संदर्भा :-**


1. *ध्वन्यालोकः, 3/41*
2. *ध्वन्यालोकः, 3/41,42 वृत्तिः*
3. *काव्यप्रकाश, 10/सूत्रम् 126*
4. *ध्वन्यालोकः, 3/37*
5. *ध्वन्यालोकः, 3/41,42 वृत्तिः*
6. *राजतरङ्गिणी 5/34*
7. *कप्फिणाभ्युदयम्, 20/46,47*
8. *कप्फिणाभ्युदयम् , 1/24*
9. *काव्यप्रकाशः, 4/उदाहरणसंख्या 54, काव्यप्रकाशः, 4/उदाहरणसंख्या 54, वृत्तिः*
10. *कप्फिणाभ्युदयम् , 1/37, काव्यप्रकाशः, 4/उदाहरणसंख्या 62*
11. *कप्फिणाभ्युदयम् , 1/38, काव्यप्रकाशः, 2/उदाहरणसंख्या 12*
12. *काव्यप्रकाशः, बालनोधिनी टीका, पृष्ठसंख्या 68*
13. *ध्वन्यालोकः, 1/4*
14. *कप्फिणाभ्युदयम् , 1/39, काव्यप्रकाशः, 10/उदाहरणसंख्या 395*
15. *ध्वन्यालोकः 2/17, वृत्तिः*
16. *ध्वन्यालोकः 2/19, वृत्तिः*
17. *ध्वन्यालोकः, 3/42 वृत्तिः, पृष्ठसंख्या 526*
18. *काव्यप्रकाशः, 10/सूत्रम् 121, वृत्तिः*
19. *कप्फिणाभ्युदयम् ,18/48*
20. *कप्फिणाभ्युदयम् ,18/74*
21. *कप्फिणाभ्युदयम् 18/59*
22. *कप्फिणाभ्युदयम् 18/131*
23. *कप्फिणाभ्युदयम् 18/133*
24. *काव्यप्रकाशः, 1/122 सूत्रम्*
25. *कप्फिणाभ्युदयम्,18/145*
26. *कप्फिणाभ्युदयम्,18/3, 7, 11, 35,123*
27. *ध्वन्यालोकः, 3/42 वृत्तिः, पृष्ठसंख्या 527,528*


●●●

# 16

# कालिदास–शेक्सपीयरयोः नायिकयोः शकुन्तला–डेस्डिमोनयोः चारित्रिकसाजात्यम्ः

*शुभ्रजित्सेनः*

चर्-धातोरुत्तरम् इत्र-प्रत्ययेन निष्पन्नस्य चरित्रस्य द्वितीयस्थानं निर्देशितम्। Aristotle- पादैर्नायकनिष्ठषट्सूपादानेषु। संसारस्थमनुजा यदा साहित्यं चरितत्वेन पर्यवस्यते, तदा तच्चरित्रं भवति दोष-गुण-क्षमा-हिंसा- प्रेम-शान्त्यादिवैशिष्ट्योपेतं वर्ण्यमयम्। तैः समं प्रबन्धकृतो जीवनाभिज्ञता सहानुभूतिश्च सम्मिलतः चेत् साहित्यगतञ्चरितम् अभिनवरूपतामुपालभते। अर्थान्नाटकस्य सार्थकतायां यथार्थचरित्रचित्रणस्य माहात्म्यमेव समधिकम्।

विश्वसाहित्यवारिधौ कृतावगाहैः कविभिः कालिदास- शेक्सपीयर-महाभागैर्ग्रथितेषु चरित्रेषु नायिकाचरित्राणि विशेषेण मूर्ध्नि राजन्ते। भारतीय संस्कृत्या भित्तिभूमिराध्यात्मिकी इत्यत्र नास्ति संशयः। अस्या आध्यात्मिकताया दृक्कोणतः कालिदासः तच्चरित्राणि ससर्ज। अतः, यस्मिन् चरित्रे यावती शक्तिरधिका तावती प्रोज्ज्वला भवति चरित्रस्य रमणीयता। तथाहि, कालिदासस्य इन्दुमती-पार्वती-सीतादिनायिकाप्रसङ्गे समालोचकेन Ryder- महाभागेनोदितम् – "His women appeal more strongly than his men" इति। अपरतः, यूरोपीयसंस्कृतेर्भित्तिभूमिस्तावत् भोगवादाश्रिता। अतः, पाश्चात्यनाट्यकाराणां चरित्रेष्वात्मशक्तिः किञ्चिदपि अवहेलितेति संदृश्यते। शेक्सपीयर पादस्य पोर्शिया-रजालाओ-हेलेनादिनायिकानां सौन्दर्यमहिम्ना विमुग्धः सन् रास्किन्-महाभागो ब्रूते–"Shakespeare had no hero]has only heroines" इति। तत्र कालिदासीयनायिकासु शकुन्तलायाः तथा शेक्सपीयारस्य नायिकासुडेस्डिमनायाः

सविशेषं स्थानं विभर्ति। चरित्रयोरनयोर्मध्ये बहूनि सादृश्यानि सहृदयानां नयनपथे पान्थायते।

कविः भवति क्रान्तदशः। 'मेधावी कविः क्रान्तदर्शनो भवति। कवतेर्वा' इति वचनानुसारं कवयः क्रान्तद्रष्टारो भवन्ति। 'अतीतानागतविप्रकृष्टविषयकं युगपज्ज्ञानं यस्य स क्रान्तदर्शनः' इत्युव्वटाचार्यः। अर्थात् अतीतानागतव्यवहित प्रतिबद्धानां वस्तूनामतीन्द्रियदर्शनं भावसमाधिस्थावस्थायां नैसर्गिककवीनां कृते स्वतः सिद्धयति। प्रतिभा-व्युत्पत्तिमांश्च कविः कविरित्युक्त इति यायावरीयः। प्रज्ञा हि कवेः प्रकृष्टो गुणः। अतीन्द्रियविषयाणां ज्ञानदात्री तथा नवनवोन्मेषशालिनी प्रतिभा हि प्रज्ञा। काल-देश-लिङ्ग-भाषादिपार्थक्यसत्त्वेऽपि कविषु साधारण वैशिष्ट्यानि धर्माश्च प्रायेण समतुल्यतया प्रतीयन्ते। कालिदास-शेक्सपीयरयोः मध्ये स्थान-काल-भाषागतवैजात्यादपि अतीन्द्रियदर्शनाभिज्ञता समतुल्येति।

कालिदासविरचितस्य अभिज्ञानशाकुन्तलमिति नाटकस्य नायिका शकुन्तला तथा शेक्सपीयर-कविना विरचितस्य Othello-नाटकस्य विषाद-भाविनी (दुःख-भागिनी) डेस्डिमोना-नाम्नी नायिका च लोकसाहित्ये अतीव प्रशंसिते (सुविख्याते) द्वे स्त्री-पात्रे स्तः। ते उभे अपि स्व-स्व-सांस्कृतिक-साहित्यिक-परम्परासु (भारतीय-शास्त्रीय-परम्परायां तथा एलिजाबेथन्-परम्परायां च) आदर्श-नारीत्वं बिभ्रते। अतीव विभिन्न-सन्दर्भेषु वर्तमानेऽपि समये ते शुद्धता-भक्त्योःतथा दैव-विधिनियन्त्रित-दुःख-भेद्यता-रूपाणां समानान् गुणान् भजेते।

**कालिदासीया शकुन्तला भारतीयस्त्रियोः आदर्शरूपम्**

विश्वामित्रमुनिजा मेनकासुता शकुन्तला देवीसौन्दर्यस्य मानवकोमल-भावस्य च सुसङ्घटनं प्रतिनिधत्ते। कण्वाश्रमवर्धिता सा मृदुस्वभावा, निश्छला, प्रकृतिसौहार्दपूर्णा च। तस्याः दुष्यन्तेन सह प्रेम सत्त्वनिष्ठं, न तु कामनिष्पन्नम्-यतः तत्र आन्तरिकसौम्यता, भावशुद्धिः, नैतिकता च प्रकाशते।

कालिदासेन सा ''शान्तस्वभावा'' इति चित्रिता, या पतिव्रतधर्मस्य मूर्तिरिव दृश्यते। पतिस्मरणभ्रंशेन शप्तस्य परिणामेनापि दुष्यन्तस्य तिरस्कारं सहमाना सा न रोषं दर्शयति, न निराशां, केवलं धैर्यं श्रद्धां च धारयति। तयोः पुनर्मिलनं केवलं प्रेम्णः पुनरावर्तनं न, किं तु सत्यस्य सद्गुणस्य च विजयः। एवं शकुन्तला आत्मबलस्य, पवित्रतायाः, माधुर्यस्य च प्रतीकत्वेन तिष्ठति। या प्राचीने भारतसंस्कृतेः नारीदर्शनस्य आदर्शं निरूपयति।

**डेस्डिमोना - शेक्सपीयर-कालीनप्रेम्णः करुणामूर्तिः -**

शेक्सपियरस्यओथेल्लोनामकनाटके ब्राबान्शियोपुत्री डेस्डिमोना निर्मलहृदया अपि प्रेम्णि साहसमयी दृश्यते। सा समाजनियमान्समुलङ्घ्य ओथेल्लो नाम मूरदेशीयसेनान्यं प्रति अनुरक्ताभूत् कृतस्य वीर्यं धैर्यं च दृष्ट्वा। अस्याः स्वभावे निष्कलङ्कता, साहसं, निष्ठा च समं संमिश्रितम्। तथापि तस्याः बलं प्रतिरोधे न, क्षमायामेव। यद्यपि सा तदानीन्तनयूरोपदेशीय स्त्रीणां लज्जाशील स्वभावस्य आदर्शा बभूव, तथापि तदेव तस्या विनाशकारणं जातम्। ओथेल्लेन मिथ्याविश्वासेन, इयागो-नामकस्य दुष्टस्य कपटेन च पीडिता, सा निर्दोषा अपि प्राणान् तत्याज। तस्याः अन्तिमवाक्यानि-पत्युः क्षमायै प्रार्थना-तस्या अमोघप्रेम, हृदयशुद्धिं, निर्मलभावं च प्रकटयन्ति। एवं डेस्डिमोना नारीणां करुणाप्रेमयोः त्रासपूर्णजगति निश्चलत्वस्य प्रतीकभूता दृश्यते।

अस्मिन् प्रबन्धे उभयोः कविमूर्धन्ययोः कल्पितनायिकयोः शकुन्तला-डेस्डिमोनयोः चारित्रिकं साजात्यं प्रतिपादयितुमिष्यते। अपि च, तत्र उभयोः कविवरयोर्दृष्टिभङ्गिगतं पार्थक्यमस्ति न वेति आलोच्यम्।

**प्रथमतः -**

शकुन्तलेति नामविश्लषणेनैव नायिकाया जन्मरहस्यमुपलभ्यते। शकुन्तैः लालिता परिपालिता इति शकुन्तला। मर्त्यजगतो हीनवादविसंवादकोलाहलाद् बहिः तपोवनस्य शान्तास्पदे परिवेशे प्रकृतिजातायाः प्रतिपालितायाः नामकरणं यथार्थमिति मामकी मतिः। अपरतः, डेस्डिमोनायाः नामापि तथैव युक्तिग्राह्यम् Wikipedia इत्यनुसारं "The name derives from Greek δυσ + δαίμων] which means 'ill-fated, unfortunate', i-e-the antonym of Eudaimonia. Leone Teyssandier notes that it may indeed be how Othello views his wife, calling her an 'ill&starred wench'. Desdemona इति शब्दोऽयं दौर्भाग्यस्य प्रतीकभूता। अपरतः, शकुन्तलापि आबाल्यादेव पित्रादीनां स्नेहादिवर्जिता कथमपि परिपालिता च। यद्यपि "What is in a name\ By which we call a rose by any other name as sweet" इत्युक्त्वा शेक्सपीयर नामकरणस्य सर्वातिशायि प्रधान्यं नाङ्गीचकार। लातिन-ग्रीग्भाषयोः स्वल्पज्ञानादपि तेन डेस्डिमोनाया नामगतं सार्थक्यम् आत्मीकृत्य तस्याश्चरिताङ्कनं विहितम्।

**द्वितीयतः -**

मात्रा परित्यक्ता शकुन्तला अनुदिनं परिवर्धमाना सत्यपि एकदा यौवनं सम्प्राप्ता। आश्रमवृक्षेषु जलसिञ्चनं कुर्वती सा नाभवत् कातरा। जलसिञ्चनार्थं घटमादाया आगच्छन्ती सा मूर्तिमती वनदेवीत्येव मन्यते। तस्या एव प्रयत्नेनाभ्यर्थनया चवनभूमिर्नवोद्गतैः कुशैः समाकीर्णा, नवमल्लिका पुष्पस्तवकावनम्रा सती नयनाभिरामशोभामातनोति। वृक्षेषु पुष्पोद्गमस्तत्सकाशे महोत्सवतुल्यः ।भक्तिः, प्रीतिः, स्नेहः, सन्तानवात्सल्यञ्चेति गुणचतुष्टयमेकस्यामेव शकुन्तलायां राजतेतराम्।

शेक्सपीयरस्यप्रायः सर्वेषां वियोगान्तानां नाटकानां नायिका इव डेस्डिमोनापि आसीन्मातृहीनाधनवतः पितुः एकला आदरिणी पुत्री। कृत्स्नं नाटकं पर्यालोच्य वक्तुं साम्प्रतं यद् ब्रेवान्शिओ यत्नादराभ्यां तां परिपालयति स्म। वाल्यकाले सा पितुः सहायतां कर्तुं प्रारभत एव। क्रमेण तयोः क्षुद्रः संसारः प्राणरज्जुबन्धनेन पूर्णतां प्राप। तस्याः प्रकृतिविषयिणी शेक्सपीयर-पादस्योक्तिरत्र संस्मरणीया -

"A maiden never bold.
Of spirit so still and quite that
Her motion blushed at herself"I

**तृतीयतः -**

उभावेव एव असामान्याधिकारिण्यौ सौन्दर्यस्य। शकुन्तलायाः सुलोचनाक्षिद्वयस्य चकितहारिप्रेक्षणं दृष्ट्वा अस्मन्मनो मोमुद्यते। सा सञ्चारिणी पल्लविनीलतेव। आसीत्तस्या सौन्दर्यस्य विशिष्टा एका उन्मादयित्री शक्तिः। तस्या अलोकसामान्यं रूपं समुद्भिन्नं यौवनञ्चालोक्य दुष्यन्तो मुग्धोऽभवत्। तामाप्तुं तस्य स्वर्गेण सह तस्याः सम्बन्धस्य फलश्रुतिरेव। सौन्दर्यसन्मुन्धे हृदि दुष्यन्तः प्राह-
**'चित्रे निवेश्य परिकल्पितसत्त्वयोगा रूपोच्चयेन मनसा विधिना कृता नु।**
**स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः' ।। इति**

सौन्दर्यमात्रस्यैव स्वल्पविस्तरमोहिनी शक्तिर्विद्यतेतमाम्। तथाहि डेस्डिमोनायाः सौन्दर्यं प्रेक्षं प्रेक्षं रजरिगो-प्रभृतयः पाणिप्रार्थिनो मोहिताः सञ्जाताः। तस्याः सौन्दर्यस्य अतलान्तशक्त्या अभिभूताः सन्तस्ते जलपथस्य झञ्झा- समीरण-वात- तरङ्गादिविपत्सु निपतत्स्वपि स्वकहिंस्रस्वभावान् विस्मृत्य निरापदं साइप्रासं

प्रापितवन्तः। क्यासिओ(Cassio) इत्यस्य दृष्टौ सा डेस्डेमोना –'-----paragons description and wild fame. One that excels the quirks of blazoning pens.And in the essential vesture of creation. Does tire the engender' इति।

**चतुर्थतः -**

आपातदृष्ट्या उभयोः प्रेम अस्वाभाविकमिति चिन्तनं न ह्यसम्भवपरम्। आश्रमस्य अधिवासिन्या अपि शकुन्तलायाः शरीरमिव मनः कुसुममिव कोमलम्। परं तस्या अनुरागस्थानं न हि तपोवनं परम् उपवनम्। आश्रमेण समं सा समवायसम्बन्धेन संयुता। अपरतः, डेस्डिमोना क्षुद्रसंसारस्य गृहिणी। तां व्यतिरिच्य व्रेवान्शिओ इत्यस्य जीवनमपि विडम्बनामयम्। सुपुरुष-भिनीसीय-यूनां साहचर्यं न तया उपलब्धमिति तु कष्टकल्पनम्। किन्तु एतेन तस्या मनो न चचाल। परं Othello इत्यस्मिन् समागते सा दिग्भ्रान्ता जाता। नायकस्य Othello bR;L; "moving accidents by flood and field" इति विस्मयगर्भां काहिनीं निरास्य सा तस्मिन् स्निह्यति। अतःतस्या अनुरागोत्पत्तिर्विस्मयजा। तथाहि उच्यते–'In the love of Desdemona, there is a romantic element'इति।

शकुन्तलायाः प्रेम डेस्डिमोनायाः प्रेम्नो विपरीतधर्मि। शकुन्तलायाः प्रणयः प्रथमदर्शनजः(love at first sight),परं डेस्डिमोनायाः प्रेमविकाशो जातो घनिष्ठपरिचयेन। रूपवतीति कृत्वा रूपवन्तं दुष्यन्तं प्रति सा आसीदासक्ता। परं डेस्डिमोना स्वयं गौराङ्ग्यसामान्या सुन्दरी किन्त्वरूपवन्तं कृष्णाङ्गम् ओथेलो इति नायकचरित्रं प्रति समादृष्टा। तथाहि तस्याः प्रेम elective affinity इत्यस्य निदर्शनम्। दुष्यन्तं प्रति शकुन्तलाया आसक्त्याः कारणं तावद्रूपम्। अस्मिन् प्रसङ्गे कश्चन श्लोक उदाहृतः–'कन्या कामयते रूपम्' इति। अपरतः, डेस्डेमोनायाः आकर्षणस्य हेतुस्तावत् शौर्यम्। पाश्चात्त्यरीत्या वक्तुं शक्यम्–'None but the brave deserves the fair' इति।

**पञ्चमतः -**

जीवनस्य प्रथमप्रेम्णा सज्जाता शकुन्तला व्रीडावनता। सा सखीनां सकाशात् स्वाभिप्रायार्थं गूहितुं कौशलान् आश्रितवती। अनृतभाषणे सा न तु कुण्ठिता। डेस्डिमोनायाः प्रेम्ण्यपि दृश्येते भीरुत्वं हीनबलत्वञ्च। सापि छलमाश्रितवती। आसीदुभयोः प्रणयः प्रगाढः समुद्रवदतलान्तः। एकनिष्ठञ्च तयोः प्रेम।

**षष्ठतः -**

न केवलं त उभावेव स्वामिप्रेम्णो वियुक्तवत्यौ, विच्युतवत्यौ सामान्यं क्षुद्रतमं वस्तुद्वयं यद्धि परवर्तिनि काले विघटिष्यमानाया दुर्घटनाया उपलक्षणम्। ते उभे प्रेम्णोऽभिज्ञानं विच्युतवत्यौ - एकं तावदङ्गुरीयकमपरञ्च करवस्त्रम्।

**सप्तमतः -**

शकुन्तलाया इव डेस्डिमोनाया अपि विवाहोत्तरजीवनं विधिविडम्बितम्। शकुन्तलां यदा राजा विज्ञातुं नालं, तदा शकुन्तलायाश्चित्तं संभिन्नं संक्षुब्धञ्च जातम्। 'हृदय ! साम्प्रतं ते आशङ्का'। किन्तु राजा यदा कथमपि तया सह विवाहस्य वृत्तं न स्वीचकार, तदा शकुन्तलाया हृद्बन्धनं बभूव भग्नम्। Susan Winstandley इव सापि नारीत्वस्य मर्यादाविषये सम्पूर्णतयासीत् सचेतनशीला।

स्फुरितोत्तराधरा शकुन्तला सकोपमाह–'अनार्य, आत्मनो हृदयानुमानेन प्रक्षसे। क इदानीम् अन्यधर्मकञ्चुकप्रवेशिनस्तृनछन्नकूपोपमस्य तवानुकृतिं प्रतिपत्स्यते' इति। एमिलियायाः सविध एव यदा ओथेलो डेस्डेमोनया समं रूढतया व्यवहरति स्म, तदा तस्या हृदोऽन्तरस्थलमभवद् व्यथितम्। परं कथमेतदिति पृच्छायामुत्तरं खलु दत्तं तया 'Inever gave him cause' इति। पुनः, लाडोभिको इत्यस्य सम्मुखे ओथेलो इत्यस्य अतर्कितेनाघातेन नायिकाया एकमात्रोक्तिः- 'I have not deserve this' इति।

**अष्टमतः -**

शकुन्तला सरला। 'स्वैरिणी' इति शब्दमिमं सोढुं सा असमर्था। 'आत्मच्छन्दचारिणी' इति। पक्षान्तरे, डेस्डिमोनायाः स्वर्गीयं सारल्यं वरीवर्ति। श्रूयते- सारल्यं तावद्भगवतो दानम्। सा कदापि अपवित्रशब्दोच्चारणं कर्तुं नालम्। सा कथयति-

'Am I that name; I ago?
What name,fair lady?
Such as he says my lord did say I was'
चेत्यादीनि।

शकुन्तला जिजीविषति। तस्या नवनवीनं यौवनं, देहमनसोर्जीवनस्य प्राचुर्यं तथा च सा भाविनी जननी चेत्यवस्थायां प्रियपरित्यक्ता सत्यपि प्राणान् त्यक्तुं नासीद्यतमाना। उक्तञ्च मेघदूते -

‘आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यः पाति प्रणयिहृदयं विप्रयोगे रुणद्धि’ ।।

इति श्लोकं स्मारं स्मारं सा विभावयन्ती आसीत् यत् पूर्वं या आसीद् भर्तुर्नयनकौमुदी, अङ्गस्थाभरणस्वरूपा च, यां प्रति दुष्यन्त एकदा सगर्वमाह–‘द्वे प्रतिष्ठे कुलस्य मे’ इति । स दुष्यन्तः सुमतिमद्धा प्राप्स्यति भविष्यति काले ।

डेस्डिमोनापि जीवितुं वाञ्छति शकुन्तलावन्नवीनत्वात्। आङ्गलभाषायामा भाण- कोऽस्ति ‘The miserable hath no other medicine but only hope’ इति। अर्थात् ‘आशातन्तुर्न कथयतात्यन्तमुच्छेदनीयः’ इति भवभूतिगीः (मालतीमाधवम)। ओथेलो इत्यस्या चित्तमेकदा डेस्डेमोनायाः स्वच्छे मनोमुकुरे उज्ज्वलतया आसीत्प्रतिबिम्बित। अद्य आशयस्तावत् ‘आशापाशैः सखि नवनवैः कुर्वती प्राणबन्धम्’ (उद्भवदूतम्) इति। तथाहि तस्या आत्यन्तिकी आकूतिर्भगवन्तं प्रति–'O! banish me my lord, but kill me not' इति।

**नवमतः -**

मारीचाश्रम आश्रयं प्राप्य शकुन्तलाया दुस्तरं व्यवधानं पूर्व-परभाविजीवनयोः। मारीचाश्रम आगमनात् प्राक् लीलाचञ्चलरूपेण अभिमानिनीत्वेन च शकुन्तला चित्रिता कालिदासेन। परं मारीचाश्रमागमनात् परं शकुन्तलाभवदनुतप्ता भारतजननी। शकुन्तलायाः प्रेम्णः आद्यावस्थायां प्रेमासीन्मोहग्रस्तञ्चञ्चलम्। परं द्वितीयजीवनस्य प्रणयो निष्पापोनिष्कलङ्कः स्थिरनिवातो निष्कम्पदीपशिखावत् अचपलः। प्रथमजीवनस्य शकुन्तला कामपङ्तिकलात्मिका मर्त्यशकुन्तला, द्वितीयजीवनस्य स्वर्गशकुन्तला। सुदीर्घतपस्यायां मर्त्यजीवनस्य सर्वग्लानीः परित्यज्यैकवेणीधरा विरहव्रतचारिणी शुद्धशीला शकुन्तला आविर्भूता सप्तमाङ्के। परन्तु पुनर्मिलनादुत्तरं शकुन्तलायाः सविधे निरपराधो बभूव दुष्यन्तः। अश्रुसिक्तनयना सा सप्रणामम् अभिनन्दयति स्म दुष्यन्तम्।

नापगतः डेस्डिमोनायाः दुःसमयः। ओथेलो इत्यनेन कृते सद्व्यवहारे डेस्डिमोनापि तं प्रति समुचितमाचचार, प्रेम्णि च प्रकाशिते सापि निर्वादं प्रेम प्रकाशितवती। किन्तु, तदाडेस्डिमोनायाः संयमोऽपि भग्नतामितः। ओथेलो डेस्डिमोनां प्रति दुर्व्यवहारं कर्तुं तथा घृणां प्रकाशयितुं यदारब्धवान्, तदा सा स्वसाहस- संयमौ प्रकाशितवती। स्वोत्सारितया तया प्रेमधारया प्रियतमस्य

अत्याचाराचाराः परिष्कृताः, यतो हि स्नेहो ह्याहन्ति तस्मिन् स्निह्यति यः। किं बहुना, यं सा स्निग्धवती तेनैवान्ततो हतिमिता। अमरप्रेमदीप्त्या डेस्डिमोनायाः मृत्युर्ज्योतिमयतां प्राप्तः, तन्मरणं महामरणं जातम्।

**दशमतः,**

शकुन्तला डेस्डिमोना चोभयोर्मध्ये यथा साम्यमस्ति, तथैव वैषम्यमपि। एकमेव साम्यमस्ति यदुभौ गुरुजनानाम् अनुमतिं विना स्व-प्रियजनस्य समीपे आत्मानं समर्पितवत्यौ। गौतमी यत् दुष्यन्तं शकुन्तला-विषये अवदत्, तत् ओथेलो-प्रसङ्गे डेस्डिमोनाम् उद्दिश्य अपि वक्तुं शक्यते - ''णावेक्खिदो गुरुअणो इमाए ण तुए वि पुच्छिदो बन्धुः। एक्कक्कस्स च चअणे भणादु किं एक्को एक्कस्सिं।।'' अर्थात् गुरुजनस्य अनुमतिं विनापि सा प्रियजनं वृतवती, अतः सा एका स्व-पथम् अनुगच्छतु।

ते तुलनीये भवतः, यतः उभये प्रथम-दर्शनैनैव स्व-नायकस्य समीपे आत्म-समर्पणं कृतम्–उभयोः हृदये स्थिता 'आशा-लता' एवमेव दृढ-वृक्षस्य काण्डमवलम्ब्य उपरि आरूढा। किञ्च डेस्डिमोना-चरित्रे यदुच्छ्वसितमाकर्षणं प्रेमोन्मादश्च सुष्पष्टतया प्रकाशितम्, तत्तु शकुन्तलायां न तावत् प्रकटीभूतमासीत्।

ओथेलो कृष्णवर्णीयः अस्ति, अतः कोऽपि इटाल्या-नारी तं न्यायतः सुन्दरं वक्तुं न शक्नोति। किन्तुनारी-हृदये वीरत्वस्य प्रभावः रूपादधिको गभीरो भवति। महाकविः व्यासः यः खलु द्रौपदीं स्व-पञ्चसु पतिषु अर्जुने अधिकतयानुरक्ताम् अदर्शयत्, सएव नारी-मनसो गूढं रहस्यं सुष्ठु ज्ञातवान्। शेक्सपीयरः अपि डेस्डिमोना-नामकेन स्व-चरित्रेणएतादृशं सूक्ष्मं भावं प्रकाशितवान्।

ते पुनः तुलनीये भवतः, यतः उभयोर्नायिकयोः कोमल-जीवनस्य शाखाः अवसाने च्छिन्ना अभवन् – उभेऽपि पत्या परित्यक्ते। जीवनम्उपेक्षा-निपीडनाभ्याम् परिपूर्णम् आसीत्; प्रायशः च दृश्यते यत् ये स्नेह-यत्नयोः अधिकतया योग्यास्त एव उपेक्षा-उत्पीडनयोः लाञ्छिता भवन्ति। तथापि एतत्सर्वदा दोषाय न भवति, यस्मात्मानव-मनसः उच्च-गुणाः दुःख-कष्टेषु एव प्रकाशीभवन्ति। मानव-जगति एतदुन्नति-बीजम् – काव्यस्य मूलमुपादनञ्चेति।

सौभाग्यस्य दुर्भाग्यस्य वा शापात् आशीर्वादकारणाच्च - येन केनापि प्रकारेण डेस्डिमोना-जीवने ये गुणाः प्रकाशिताः, तथैव शकुन्तला-जीवनेऽपि

अनुरूप-परिस्थितिषु ते उद्भासिताः अभवन्। अतःएतयोः चरित्रयोः पर्याप्तं साम्यं विद्यते।।

**उभयोः स्त्रियोः वैषम्यस्य समन्वयस्य च बिन्दवः**

पूर्वोक्तालोचनातः सिद्धान्तयितुमलं यत्

| पक्षः (Aspect) | शकुन्तला (अभिज्ञानशाकुन्तलम्) | डेस्डिमोना (Othello) एलिजाबेथीयः |
|---|---|---|
| सांस्कृतिकः सन्दर्भः (Cultural Context) | भारतीयशास्त्रीयः आध्यात्मिक-नैतिक-धार्मिकपक्षीयाः | शृङ्गारिक-नैतिक-विषाद-वास्तवधर्मिपक्षाः |
| प्रेम(Love) | आध्यात्मिकं संयतं च | भावाविष्टं परं शुद्धम् |
| द्वन्द्वः(Conflict) | दैव-शापः राज्ञः विस्मरणं चेति | ईर्ष्या वञ्चना चेति |
| दुःखं प्रति प्रत्युत्तरम् (Response to Suffering) | मौनं, सहनम्, श्रद्धा च | सौम्यं, समर्पणम्, क्षमा च |
| समाधानम् (Resolution) | पुनर्मिलनम्, सदाचारस्य पुनर्स्थापनं चेति | विषादपूर्णं मरणम्, अन्येषां नैतिकं जागरणं चेति |
| प्रतीकात्मिका भूमिका (Symbolic Role) | पातिव्रतम् नैतिक-व्यवस्था चेति | भावावेशेन नैतिक-विक्षोभेण च पीडिता |

उभेऽपि शकुन्तला डेस्डिमोने चेतिनिर्दोषे पीडितेच स्तः, तयोः सद्गुणाः व्यङ्ग्यतया दुःखकारणम् अभवन्। किन्तु शकुन्तलायाः कथा दैव-न्याये समन्वये च परिसमाप्ता भवति। डेस्डिमोनायाः (कथा तु) मर्त्य-विषादेन समाप्तिं गता। अतः भिन्न-परिप्रेक्षमेवदर्शयति, कालिदासस्य जगतिकर्मतथामोक्ष एव मुख्यम्परं शेक्सपीयरस्य जगतिदैवम्, मानुषी त्रुटिः (human fallibility) च प्रधानमिति।

शकुन्तला डेस्डिमोना च स्व-सांस्कृतिक- सीमानमतिक्रम्यशाश्वत-नारीत्वं प्रदर्शयतः, यासौम्या, भक्ता, आध्यात्मिकरूपेण प्रकाशमयी च वर्तते। यद्यपि शकुन्तलायाः सहनशक्तिः पुनर्स्थापनायनेतृभूता, तथापि डेस्डिमोनायाः निर्दोषता-आत्मबलिदानेन (martyrdom) परिणता भवति। उभयोः प्रेमपवित्रम् निःस्वार्थं च

वर्तते, यन्नैतिक-बलंदुःखे अपि गौरवान्वितंकरोति। एवं शकुन्तला-डेस्डिमोनयोरुभयोः माध्यमेन कालिदासः शेक्सपीयरश्चनारीत्वस्यशाश्वत- गौरवम् तथा विषादं च परिपुष्णाति, यत्र सौन्दर्यंनैतिक-गाम्भीर्येणसहमिश्रितंभवतीति शम्।

**सन्दर्भाः-**

1. *Vol. Tragédies II (Bouquins ed.). Robert Laffont. p-46*
2. *'आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः'। (अभिज्ञानशकुन्तलम्)*
3. *अभिज्ञानशाकुन्तलम्, 2/9*
4. *मेघदूतम्, पूर्वमेघः, 10*

**ग्रन्थपञ्जिका**

- अभिज्ञानशकुन्तलम्, सत्यनारायणचक्रवर्ती (सम्पा.), संस्कृत पुस्तक भाण्डार, कलिकाता, 1988।
- .........,एम.आ.कर्ले (सम्पा.), वुक्सेलार्स् पावलिशिं कों, बोम्बे,1261।
  शकुन्तला तत्त्व,चर्न्छनाथ वसु,संस्कृत पुस्तक भाण्डार, कलकाता, 1390(वङ्गाब्द)।
- Othelo:A Critical Study, William Robertson Turnbull, Blackwood, Harvard University, 1892.
- Wikipedia.org@wiki@Desdemona
- www.desdemonadespair.net

●●●

# 17

# कालिदासीये नाट्ये भेषजविमर्शः

*मोनिकावर्मा*

**त्रैलोकस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम्।**[1]

सत्यमेतदुक्तं यत् सर्वे विषया जगत्यस्मिन् नाट्यकारैर्नाट्येऽनुक्रीयन्ते। नाट्यं जगत्सर्वस्वं यतोहि जना अनेन सानन्दं वैचक्षण्यं लभन्ते। यथोक्तं भरतमुनिना-

**न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।**
**नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते।।**

यदि नाट्यं यदि कालिदासीयं भवेत् तर्हि का वार्ता यतोहि सर्वसाहित्यविधासु कालिदासस्तु शिखरमणिरिव विराजते संस्कृतकाव्यसंसारे। अद्यापि तेषां विषये उक्तिरियं वैकृतिं न गता-काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला 'अभिज्ञानशाकुन्तलम्' इति नाटकमिदं नाट्यजगति निकषमिव शोभते। प्रसादगुणमधिकृत्य माधुर्यमावहन्ती रसेश्वरस्य कालिदासस्य रसपेशला गीर्वाक्, नाट्यमाध्यमेन जनान् शिक्षयन् इमां मम्मटीयामुक्तिं सार्थकं करोति -

**कान्तासम्मितयोपदेशयुजे**[3]

यथा कान्ता माधुर्येण प्रियं कार्यमभिनिवेशयति तथैव कालिदासीया कविताकामिन्यपि मनोहरैः सम्वादैः, अभिनयैः, कथनैः, प्रसङ्गैः, नाट्यैः सरसमाध्यमेन जनान् नानाविषयाननुशासयति अत्र त्रीणि नाटकानि महाकविभिर्विरचितानि मालविकाग्निमित्रंम्विक्रमोर्वशीयमभिज्ञानशाकुन्तल चेति। नाटकस्योद्देश्यं लोकसुखार्थं भवति परन्त्वारोग्यं आद्यं सुखं परिगण्यते यथा स्वयमेन महाकविना उक्तम् -**शरीरमाद्यं खलु धर्मसाधनम्**[4]।

शरीरसाफल्यमारोग्यं विहितं यथोक्तं चरकसंहितायाम् -

**''धर्मार्थकाममोक्षमाणामारोग्यं मूलमुत्तमम्''**[5]

अतः अष्टाङ्गहृदयकारो वाग्भट्टोऽपि कथयति

**''आयुः कामयमानेन धर्मार्थ सुखसाधनम्।**
**आयुर्वेदोपदेशेषु विधेयः परमादरः।।''**[6]

**चिकित्सासाधनरूपे भेषजप्रधानताऽस्ति - करणं पुनर्भेषजम्**[7], औषधम्, औषधिः, ओषधिः इत्यादीनि तस्य पर्यायपदानि। अथं किं भेषजम्? इति प्रश्ने निर्वचनमिदं प्राप्यते -

भेषं रोगभयं जयतीति भेषजम्। औषधविषये संहिताकारः कश्यपः कथयति -

**ओसो नाम रसः सो स्यां धीयते यत्तदोषधिः।**
**ओसादारोग्यमाधत्ते तस्मादोषधिरोषधः।।**[8]

औषधप्रयोजनं चिकित्साशास्त्रेष्वेदमुदि्ष्टमस्ति -

**चिकित्सितं व्याधिहरं पथ्यं साधनमौषधम्।**
**प्रायश्चित्तं प्रशमनं प्रकृतिस्थापनं हितम्।।**[9]

सामान्यतः वयं जानीमो यत् यदा वयं रुग्णो भवामो तदा उपवैद्यमुपसृत्य तेन दत्तानि द्रव्यभूतानि गृहित्वा आरोग्यं लभामहे अतः सामान्याऽवधारणाऽस्ति यत् औषधं भेषजं वा द्रव्यभूतमस्ति। चिकित्साकारश्चरकः कथयति -

**नानौषधिभूतं जगति किञ्चिद्द्रव्यमुपलभ्यते।**[10]

यदा वयं कालिदासीयान् नाटकान् सूक्ष्मध्ययनं कुर्मो तदा जानीमो यत् औषधविषये तु महाकवेर्दृष्टिस्तु पारलौकिकतां गता यतोहि तैरौषधविषयं सुसूक्ष्मं प्रदर्शितं स्वनाटकेषु। औषधं विस्तारयन् चिकित्साकारश्चरको भणति यत् - **'त्रिविधमौषधमिति - दैवव्यपाश्रयं युक्तिव्यपाश्रयं सत्त्वावजयश्चेति तत्र दैवव्यपाश्रयं-मन्त्रौषधिमणिमङ्गलनल्युपहारहोमनियम प्रायश्चित्तोपवासस्व- स्त्ययनप्रणिपात-गमनादि युक्तिव्यपाश्रयं पुनराहारौषधद्रव्याणां योजना, सत्त्वावजय पुनरहितेभ्यो र्थेभ्यो मनोनिग्रहः।'**[11]

एवं चौषधविषये संहिताकारः कश्यपोऽपि ब्रवीति-धृतिवीर्य स्मृतिज्ञान-विज्ञानैर्मानसं जयेत्। शारीरं भेषजैः कालयुक्तिदैवव्यपाश्रये[12]

तथा च प्राप्यते -

**शोधनं शमनञ्चेति समासादौषधं द्विधा।**
**शरीरजानां दोषाणां क्रमेण परमौषधम्।।**
**वस्तिर्विरेको वमनं तथा तैलंधृतं मधु**
**धीधैर्यात्मादिविज्ञानं मनोदोषौषधपरम।।**[13]

अनेन प्रपञ्चेन ज्ञायते यत्, यत् किञ्चिदपि शरीरमनसोरारोग्यकारको द्रव्यभूतो द्रव्यभूतो वा स्यात् तत् सर्वं भेषजमस्ति। महाकविस्तु इमं विषयं स्वनाट्येषु एवं गुम्फितं यत् अस्माकं आरोग्यं कथं भवेत् अथवा आरोग्यार्थं अस्माभिः किन्न कर्त्तव्यमिति अनुशासनमपि भवति।

प्रज्ञापराधस्तु अनारोग्यस्यैककारणमस्ति यथा निर्दिष्टं -

**धीधृतिस्मृतिविभ्रष्टो यत्कुरुते कर्म**
**प्रज्ञापराधं तं विद्यात्सर्वदोषप्रकोपणम्।**[14]

अभिप्रायो यं यत् ना यानि यानि निषिद्धानि कर्माणि वा शास्त्रगर्हितानि कर्माणि करोति रोगस्तु विकारो वा दुःखं वा तेषां कर्मणां फलमस्ति। इयं रोगं प्रति महाकवेः सुसूक्ष्मा दृष्टिरभिज्ञानशाकुंतले तथैव विक्रमोर्वशीये दृश्यते। दुष्यन्ते निमग्ना शकुन्तला दुर्वासार्षेरनवधानतयावमाननां कृत्वा शापमलभत-

**विचिन्तयन्ती यमन्यमानसा**
**तपोधनं वेत्सि न मामुपस्थितम्।**
**स्मरिष्यति त्वां न बोधितोऽपि सन्**
**कथां प्रमत्तः प्रथमं कृतामिव।।**[15]

वयं जानीमो यत् अनेन शापेन दुष्यन्तः प्रमत्ततां धारयति। एवं कामाविष्टा उर्वशी गुरुरवज्ञां कृत्वा प्रमत्ततां धृत्वा निषिद्धं वनं अभिनिविशन्ती लतायते -

**''या किल स्त्री इमं देशमागमिष्यति सा लताभावेन परिणता भविष्यति-------- ततो हं गुरुशापसम्मूढहृदया विस्मृतदेवतानियमास्त्रीजनपरि-हरणीयं कुमारवनं प्रविष्टा''**[16]

एते दैववैषयिका अपराधा अतस्तेषां निवारणाय दैवव्यपाश्रितमौषधं निर्दिष्टम् - कृतश्च शापान्तः गौरीचरणरागसम्भवं मणिं वर्जयित्वा लताभावं न मोक्षयतीति[17] अत्र शापान्ते संगमणि औषधिरूपे उक्ता। एवं शकुन्तलाविस्मरण-जन्यापराध-मुक्तिदुष्यन्तस्य प्रायश्चितकर्मणा उक्ता। अत्र दुष्यन्तकृतं

प्रायश्चितकर्म औषधमेव। एवं शकुन्तलाऽपि तपश्चर्यया जीवनसाम्यतां धारयति। अत्र महाकवेः कीदृशी निरीक्षणक्षमता यत् कर्त्तव्यान्न प्रमदितव्यम्। मनोदोषा वैकृतमापद्यन्त जीवनं सशल्यमिव दहन्ति तेषां दोषाणां दाहानां वा येन कारणेन साधनेन वाऽपाकरणं भवति तत् सर्वमौषधं वा भेषजं वा।

एवं युक्तिव्यपाश्रयमौषधं प्रति कालिदासस्य ईदृश्येव सूक्ष्मदृष्टिरस्ति। यदा शकुन्तला पतिगृहं याति तदा मृगशावकस्तस्य वस्त्रसाकर्षणं करोति इदं दृष्ट्वा कण्वेन सूचितम् -

**यस्य त्वया व्रणतिरोपणमिङ्गुदीना**
**तैलं न्यषिच्यत मुखे कुशसूचिविद्धे।।**[18]

भावप्रकाशनामके आयुर्वेदनिघण्टौ ग्रन्थे इङ्गुदीफलानां व्रणविरोपणे वैशिष्ट्यमुक्तम्। अभिज्ञानशाकुन्तलस्य प्रथमेङ्केऽपि इंगुदीफलानामुल्लेखः प्राप्यते यतोहि अस्य तैलं व्रणं शीघ्रमेव पूरयन्ति, क्रिमीन् हन्ति।

ऋतुचयार्या सम्यक् पालनम् युक्तिव्यपाश्रयमौषधमस्ति। आयुर्वेदीय-संहितासु ग्रीष्मकाले व्यवहारविषये प्राप्यते - **काननानि च शीतानि जलानि कुसुमानि च। ग्रीष्मकाले निषेवेत।**[19]

अभिज्ञानशाकुन्तलस्य तृतीयेऽङ्के ईदृश्येव रचना कृता यतोहि नाटकारम्भे ग्रीष्मकालस्य सूचना प्राप्ता अतः ग्रीष्मकाले केषां स्थानां प्रयोगः करणीय आरोग्यार्थं तत्तु महाकविना शिष्टम्। एवमेव शकुन्तलाया तापधातेन पीडितायां सत्यां राज्ञा एवमुक्तम् -

**किं शीकरैः क्लमविमर्दिभिरर्द्रगतं सञ्चालयामि नलिनीदलतालवृन्तम्।**[20]

चरकसंहितायामपि तापधातनिवारणाय ईदृशः प्रयोग उक्तः - **''पद्मोत्पलानां च कलापगताः''**[21]

अभिज्ञानशाकुन्तलस्य तृतीयाऽङ्कारम्भे तापघातस्य चिकित्सारूपे उशीनर इति तन्नाम्न औषधि लेपनार्थे भिनीता। चित्राङ्कनमिदं आयुर्वेदसम्मतं यतोहि आयुर्वेदे भेषजप्रयोगे नियमोऽस्ति **''शीतेनोष्णकृतान् रोगाञ्छमयन्ति भिषग्विदः''**[22]

अत्र ग्रीष्मकृतान् रोगान् शमयितुं शकुन्तलासखी शीतवीर्यमुशीनरं प्रयोजयन्ती सूचिता। अत्र दैवव्यपाश्रयौषधमपि प्रयुक्तम्। माता गौतमी शकुन्तलाया तापनिवारणाय मन्त्रसिद्धं दर्भोदकमानयति-

**''अनेन दर्भोदकेन निराबाधमेव ते शरीरं भविष्यति''**[23]

भारतदेशो उष्णकटिबन्धे स्थितः तत्र निदाघमासे दिवसे तापघातार्थं ये चिकित्साशिष्टाः प्रयोगाः प्राप्यन्ते ते अत्र नाट्यमाध्यमेन जनान् उक्ताः।

ग्रीष्मकाले रात्रिचर्या कीदृशी भवेत्? अत्र चिकित्साशास्त्राणि निर्दिशन्ति-

**दिवा शीतगृहे निद्रां निशि चन्द्रांशुशीतले।**
**भजेच्चन्दनदिग्धाङ्गः प्रवाते हर्म्यमस्तके।।**[24]

विक्रमोर्वशीयेऽपि निदाघो सूच्यते अतः राजा पुरुरवा उर्वशस्मरणं कुर्वन् प्रसादपीठे विदूषकेन एवं निर्दिष्टः- **मणिहर्म्यपृष्ठेसुदर्शनश्चन्द्रस्तत्र सन्निहितेन देवेन प्रतिपालीयतुमिच्छामि**[25] कियती वैलक्षाणी दृष्टिर्महाकवे यत् काव्यव्याजेन तैर्वयमायु वेदविहितमौषधप्रयोगे शिक्षिता भवाम। मालविकाग्निमित्रम् इत्यत्रापि वसन्तर्तुर्निदिष्टा अतः पुनः पुनः माधवीलतामण्डपस्य कथनं मञ्चे आयाति यतोहि वसन्तर्तौ ईदृशानां मण्डपानां प्रयोगस्तु तापनिवारणाय औषधरूपे विहितमस्ति अतः तस्य कथनं पुनःपौन्येन भवति तस्मात् दर्शकैस्तदेव आचरितव्यम्।

आयुर्वेदे सम्यग् निद्राऽपि औषधरूपे उक्ता। **निद्राभावात् शरीरं क्षीणं भवति, रूक्षं भवति, बलहीनं च दृश्यते-रात्रौ जागरणं रूक्षं**[26] शकुन्तलाविरहे राजा दुष्यन्तोऽपि एवं रूक्षो दर्शितः, दौर्बल्यात् तस्य कङ्कणमपि शिथिलं भवति यथा -

**प्रत्यादेशविशेषमण्डनविधिर्वामप्रकोष्ठे श्लथं**
**विभ्रत्काञ्चनमेकं वलयं श्वासापरक्ताधरः**
**चिन्ताजागरणप्रताम्रनयनस्तेजोगुणैरात्मनः**
**संस्कारोल्लिखितो महामणिरिवक्षीणोऽपि नालक्ष्यते।।**[27]

राजा दुष्यन्तस्य दुर्बलता, नेत्ररक्तिमता, क्षीणता, रूक्षता इत्यादीनि कथितानि लक्षणानि चिकित्साशास्त्रेष्वुदितानि - **निद्राऽऽयतं सुखं दुःखं पुष्टिः कार्श्यं बलाबलम्**[28] तस्य चिकित्सारूपे विदूषको राजानं शकुन्तलचित्रं दर्शयति, विनोदजनकैः कथनैः सान्त्वयति। एतादृशी स्थितिर्मालविकाग्निमित्रे तथा विक्रमोर्वशीयेपिअभिनीता। अत्र महाकवेराग्रहोस्ति यत् मनोघाते सति ईदृशमौषधप्रयोगं हितकारकं भवति। मनसि घाते उन्मादरोगो भवति तस्मिन् रोगे यानि लक्षणानि भवन्ति तानि सर्वाणि पुरुरवसि दृष्टानि। चरकसंहितायामुन्माद-लक्षणानि एवं निर्दिष्टानि-

**स मूढचेता न सुखं न दुःखं, नाचारधर्मौ कुत एव शान्तिम्।**
**विन्दन्त्यपास्तस्मृतिबुद्धिसंज्ञो, भ्रमत्ययं चेत इतस्ततश्च।।**[29]

ईदृशानि उन्मादलक्षणानि पुरुरवसा अभिनीतानि। सो वने इतस्ततः भ्रमति, मेघमृगपादपवृक्षपिकसारङ्गान् पृच्छति, रोदिति, प्रलपति अनमनस्कः सन् धावति मुहुर्मुहुमूर्च्छायते सञ्ज्ञां लब्ध्वा उच्चैर्हसति। परन्तु उन्मादचिकित्सिते तत्र उर्वशी औषधरूपे दर्शिता यतोहि उन्मादौषधिभूताश्लोकोऽयं प्राप्यते -

**इष्टद्रव्यविनाशात्तु मनो यस्योपहन्यते।**
**तस्य तत्सदृशप्राप्तिसान्त्वाश्वासैः शमं नयेत्।।**[30]

उर्वशी पुरुरवस अभीष्टाऽऽसीत् तया सह वियोगं प्राप्य सः पुरुरवा उन्मादी जातः पुनरुर्वशीं प्राप्य तस्योन्मादोऽपि निर्वृत्तो जातः।

एतादृशेनाभिनयपूर्वकेन पूर्वं रोगलक्षणं ततश्च तस्यौषधं मालविकाग्निमित्रेऽपि चित्रिता। सर्पदंशेन पीड़ितो विदूषको यथा परिवेष्टयति, उच्चैः प्रलपति, निद्रायते, सिमसिमायते अङ्गानि मर्दयति ते सर्वाणि लक्षणानि चिकित्साशास्त्रसम्मतानि। अस्मिन् प्रसङ्गे चतुर्थेऽङ्के विषनिवारणाय युक्तिप्यपाश्रयौषधमुक्तम् -

**छेदो दंशस्य दाहो वा क्षतेर्वा रक्तमोक्षणम्।**
**एतानि दष्टमात्राणामायुषः प्रतिपत्तयः।।**[31]

युक्तिव्यपाश्रयेण औषधेन सह दैवव्यपाश्रयमौषधमपि नागमुद्रिकारूपे उक्तम् भैरवीतन्त्रनामके ग्रन्थे उल्लिखितमस्ति यदि उदककुम्भे नागमुद्रिकां पूजयित्वा तस्य जलेन अभिषेचनं क्रियते तर्हि जनो विषमुक्तो भवति। अत्र कथाप्रसङ्गेन विषचिकित्सा तथौषधमपि अनुशिष्टं महाकविना।

अत्र विक्रमोर्वशीये आयुर्वेदसम्मता धूपनक्रियाऽपि उक्ता। धूपनं क्रिमिविनाशाय औषधकर्म अस्ति -**एवं धूपाः समुत्पन्नाः प्रजानां हितकाम्यया।**[32]

कालिदासस्य त्रिषु नाटकेषु द्रव्यभूतानि औषधवृक्षाणि पदे-पदे उल्लिखितानि यथा कुरबकः, शिरीषः, आम्रः, कर्णिकारः, करेणुः, नीपः, शल्लकी, बकुलः, सप्तपर्णः, अर्कः, तिन्तिमः, शमी, मन्दारः, इत्यादयः एतानि सर्वाणि वृक्षाणि प्रत्यक्षभूतानि युक्तिव्यपाश्रयौषधकारकाणि एषां पत्रं, पुष्पं, मूलं, त्वक्, फलं सर्वाणि साक्षादौषधभूतानि सन्ति। एतानि वृक्षाणि पात्रैः सह कथायां गुम्फितानि।

मन्ये अहं यत् अत्र कालिदासो वक्तुकामोऽस्ति यत् आरोग्या; सौख्या; च एषामौषधिभूतानां पादपानां रोपणं करणीयम्।

अशोकदोहदः महाकवेः प्रियविषयः कथं न स्यात्? सचेतन कविः सर्वस्मिन् चेतनतां किं न पश्येत्। अशोकदोहद-क्रिया आयुर्वेदस्य वनौषधिविषये निरुपितः। मालविकाग्निमित्रे अशोकदोहदक्रिया मालविकाग्निमित्रयोर्मेलने उपकारिका भवति। सुन्दर्या मालविकायाः पादप्रहारेण अशोकः पुष्पायते -

**''अपूर्ण एव पञ्चरात्रे दोहदस्य मुकुलैः संनद्धस्तपनीयाशोकः''**[33]

वृक्षान् प्रत्यपि महाकवि सूक्ष्मेक्षणशक्तेः परिचयं ददाति। विक्रमोर्वशीयनाटकस्य चतुर्थे अङ्के ज्ञायते यत् रक्तकदम्बः पुष्पैः समृद्धो जातः। ग्रीष्मावसाने रक्तकदम्बवृक्षं पुष्पसमृद्धिं धत्ते। इदानीं अतिग्रीष्मं कालः प्रचलति अतः तादृशी ऋतुचर्या भवेत्।

महाकवेरौषधविमर्शस्त्रिषु नाटकेषु प्रयुक्ताभि सूक्तिभिरपि संलक्ष्यते- यथा विक्रमोर्वशीये चतुर्थेऽङ्के विदूषक एवं कथयति - **त्वरस्यास्य भोजन यत्पित्तोपशमना; समर्थं भवति।**[34] दिनचर्यायाः सम्यग्पालनमपि औषधं भवति। मध्याह्ने भोजनवेला भवति तथा प्रकृतौ पित्तकालोऽपि स्मृतः। भोजनमतिकालं स्यादिति महाकवेः शिक्षाऽस्ति।

एवं मालविकाग्निमित्रेऽपि अतिमदितस्यौषधं सूक्तिरूपे निगदितम् - **शीधुपानोद्वेजितस्य मत्स्यण्डिका उपनता**[35] मत्स्यण्डिका शीधुपाय भेषजमस्ति।

एवं वितानैः सूचितं यत् महाकवेभेषज विमर्शो विशद आसीत्। महाकवि न केवलं भेषजं नाम्ना जानाति अपितु केषां लक्षणानामुपस्थिते सति कीदृशमौषधं प्रयोजनीयमिति तस्य सूक्ष्मेक्षणा चायुर्वेदीयशास्त्राणां गहनमध्ययनं दृश्यते यतोहि शास्त्रे यः परिश्रमः क्रियते सः काव्यमाध्यमेन प्रकटयते। अनेन ज्ञायते यत् नाटकानां रचना मनोर जननिमित्तैव न भवति परन्तु नाट्यमाध्यमेन गूढविषयाऽपि प्रयोगमाध्यमेन चित्रीभूत्वा सहृदयानां मनसि आस्थापनं कुर्वन्ति। मनस्तोषः परमं सौख्यमस्ति। काव्यशास्त्राणां विनोदस्तु अपूर्वं मनतोषं च ददात्येव पुनश्च नीरसविषयाणामधिगमनमपि सारल्येन भवति।

सर्वेषां विषयाणां नाट्यमाध्यमेन प्रस्तुतिकरणे महाकवेः कालिदासस्य नैपुण्यं औषधविषयेऽपि अगाधोऽस्ति।

औषधिकल्पो महाकविना यथायोग्यं प्रसङ्गेषु, सूक्तिषु अभिनयेषु गुम्फितः। मन्ये अहं औषधविषये महाकविस्तूत्तमवैद्येन शासितः। ऋतुचर्ययाऽऽचरणं कथं भवेत्, दिनचर्या कीदृशी स्यात्, औषधयोजना कीदृशीर्भवेत् अतः परस्तु अस्माभिरारोग्याय प्रज्ञापराधं न कर्त्तव्यमित्यपि महाकविनाऽनुशिष्टं वैचक्ष्येण। एवं महाकविः स्ववाक्यमेव प्रमाणयति-

**प्रयोगप्रधानं हि नाट्यशास्त्रम्।**[36]

**सन्दर्भाः -**


1. *नाट्यशास्त्रम्, 1/103, पृष्ठः 26, काशीसंस्कृतग्रन्थमाला, श्रीबाबूलालशुक्ल शास्त्रिणा सम्पादितम्, चौखम्भासंस्कृतसंस्थानम्, द्वितीय संस्करणम्*
2. *श्रीराधावल्लभत्रिपाठसम्पादितं संक्षिप्तनाट्यशास्त्रम्, 1/48, वाणीप्रकाशनम्, प्रथमसंस्करणम्*
3. *काव्यप्रकाशः, प्रथमुल्लासः, 1/2, विश्वेश्वर सम्पादितं, ज्ञानमण्डल लिमिटेड प्रकाशनम्, वारा.ासी, संस्कर.ा 2010*
4. *कुमारसम्भवम्, 5/33, कालिदासग्रन्थावली, रेवाप्रसादद्विवेदी द्वारा सम्पादितम्, काशीहिन्दुविश्वविद्यालयः, वाराणसी, 1976, पृष्ठः 71*
5. *चरकसंहिता, 1/1/15, चौखम्बा ओरियन्टालिया वाराणसी, 2007*
6. *अष्टाङ्गहृदयम्, 1/2 विद्योतिनीटीकोपेता, चौखम्बा संस्कृतसंस्थानम्, वाराणसी, चतुर्दशसंस्करणम्*
7. *चरकसंहिता, 3/8/87*
8. *काश्यपसंहिता, पृष्ठ-242, चौखम्बासंस्कृतसंस्थानम्, नवम संस्करणम्, ISBN-8186937-67-6 काशीसंस्कृतसीरीज*
9. *चरकसंहिता चिकित्सास्थानम्, 1-1/2*
10. *चरकसंहिता-1/26/12*
11. *चरकसंहिता-1/11/54*
12. *काश्यपसंहिता, पृष्ठ-241*
13. *अष्टाङ्गहृदयम्, 1/1/25*
14. *चरकसंहिता 4/1/102*
15. *अभिज्ञानशाकुन्तलम्, (कालिदासग्रन्थावली) 4/1*

16. विक्रमोर्वशीयम्, (कालिदासग्रन्थावली) पृष्ठ-221
17. विक्रमोर्वशीयम्, 4/64
18. अभिज्ञानशाकुन्तलम् - 4/64
19. चरकसंहिता, 1/6/2
20. अभिज्ञानशाकुन्तलम् 3/25
21. चरकसंहिता, 4/5/100
22. चरकसंहिता, 4/4/41
23. अभिज्ञानशाकुन्तलम्, तृतीय अङ्क, पृष्ठ-174
24. अष्टाङ्गहृदयम्, चिकित्सास्थनम्, 1/165
25. चरकसंहिता, 1/6/30
26. अभिज्ञानशाकुन्तलम् - 6/6
27. अष्टाङ्गहृदयम्, 1/7/55
28. चरकसंहिता 5/9/7
29. अष्टाङ्गहृदयम्, उत्तरस्थानम्, 6/53
30. मालविकाग्निमित्रम्, 4/4
31. काश्यपसंहिता,धूपकत्व, पृष्ठ-173
32. मालविकाग्निमित्रम्, 4/4
33. विक्रमोर्वशीयम्, तृतीय अंक, पृष्ठ-85
34. मालविकाग्निमित्रम्, तृतीय अंक, पृष्ठ-280
35. मालविकाग्निमित्रम्, तृतीय अंक, पृष्ठ-286
36. मालविकाग्निमित्रम्, तृतीय अंक, पृ- 269


●●●

# 18

# महाकविभासस्य नाटकेषु नाट्यकला

*आशुतोषद्विवेदी*

विषयेऽस्मिन् लेखनात् प्राक् इत्यवधारणा नूनमेव मनसि आगच्छति यत् का नाम नाट्यकला, तत्पूर्वं इत्यपि अवधारणा बुद्धौ समागच्छति यत् किन्नाम नाटकम्, एतस्मिन् विषये किमवधारणा वर्तते अस्माकं विदुषां तर्हि भरतनाट्यशास्त्रे उल्लिखितं वर्तते

**एतद् रसेषु भावेषु सर्वकर्मक्रियासु च**
**सर्वोपदेशजननं नाट्यमेतद् भविष्यति।।**[1]

नाटकं लोकहृदयमनुवर्तते। हृदयन्तु लोकस्य न सदैव एकरसमालोक्यते। तत् कदापि कुत्रापि रुचिं निदधाति। कदापि तद् औदार्ये कदापि तत्कार्पण्ये कदापि तत् सौजन्ये, कदापि दौर्जन्ये रममाणमाप्यते। संस्कृतरूपकं निसर्गतो विशुद्धस्य हृदयस्योपरितानां कर्म-संस्कारजन्यां मलिनतामपहर्तुं तादृशीमेव सामग्रीमुपयुनक्ति यादृश्या लोकस्य समीहितं सिद्धयेत् पश्येच्च सततं मङ्गलं सः। संस्कृतनाटकानि नाट्यशास्त्रीयाणि विधि-विधानानि सादरं रक्षन्ति जीवनस्यैकदेशगं चित्रं न प्रस्तूय जीवनस्य चतुरस्रं चित्रं प्रस्तुवन्ति। तानि मानवस्य न केवलं गुणगानमेव, तद्गतानपि दोषान् आलिखन्ति।

संस्कृतरनाटकानि स्वप्रकृत्या च भाषान्तररूपकेभ्यो भिन्नानि। तानि स्वारम्भादेव आदर्शवादीनि। प्रख्यातवंशानां राजर्षीणां वा धीरोदात्तप्रतापवतां मानवानां चारुचरितानि चरित्राणि चाभिनीयविविधव्यापाराणां घटनानाञ्च सजीवं चित्रणं विधाय तत्तत्पदार्थानां सजीववीक्षाविधाय तत्तद्वस्तूनां धर्मस्य च समुन्मेलनमेषणञ्च न केवलं तस्योद्देश्यं, श्रव्यकाव्यमिव सामाजिकानां मनसि स्थितानां स्थायिभावानां रसात्मके तत्त्वे परिणमनं तदीयं प्रधानतमं लक्ष्यम्।

नाटकीयकलान्तर्गते समेषां नाटकीयतत्त्वानां समावेशो भवति। एतदर्थमेव महाकविः भासः स्वरूपके कथावस्तूनां संग्रहणं विविधेभ्यः क्षेत्रेभ्यः संगृहीतवान्। तदीयेयं प्रवृत्तिः तस्य प्रतिभायाः मौलिकतामभिव्यनक्ति। तत्र नाट्यकौशलमपि प्रशंसनीयं वर्तते। नाटककारस्य भासस्य वैशिष्ट्यमिदं यत् तदीयं कवित्वं नाटकीयतां भृषमुपकुरुते। तदीयानि पद्यानि नाटकीयं घटनाचक्रं गतिशीलं विधत्ते। नाटकेषु यादृशः संवाद अपेक्ष्यते तादृश एव संवादः तत्र कविना कुशलतया प्रणिबद्धः। तत्रत्या भाषा तदनुगुणा सर्वभावेन श्लोकानां सन्दर्भानुरूपा भावात्मकता नाटकस्य वस्तुतो हि कवेः नाट्यप्रणयनचातुर्री किमपि लोकोत्तरं सौष्ठवमवगाहते। तस्य भावः भव्यता हृदयग्राहिणी विषयाभिव्यञ्जनप्रकारो निरतिशय चमत्कारचारुः।

**कामेनोज्जयिनीं गते मयि तदा कामप्यस्थां गते**
**दृष्ट्वा स्वैरमवन्तिराजतनयां पञ्चेषवः पातिताः।**
**तैरद्यापि सशल्यमेव हृदयं भूयश्च विद्धा वयं**
**पञ्चेषुर्मदनो यदा कथमयं षष्ठः शरः पातितः।।**[2]

यावत् पर्यन्तं कथावस्तुनः प्रश्नः वर्तते महाकवेः भासस्य क्षेत्रं बहुविशालं, विस्तृतं च वर्तते। पुराणेतिहासमहाभारतादिग्रन्थेषु अथ च लोकप्रचलितेषु ग्रन्थेषु महाकविः भासः स्वकथानाम् प्रयोगं कृतवान् अस्ति। संस्कृतनाट्यसाहित्ये न कोऽपि नाटककारः एतादृशेषु बृहत्क्षेत्रेषु कार्यं कृतवान् अस्ति। एतत् सर्वं विहाय महाकविः स्वकथानकेषु अपि मौलिकतायैः स्थानं दत्तवान् अस्ति। कदाचित् यत्र कुत्रापि मौलिकतायाः एतादृशी प्रधानता भवति येन पाठकानामपि भावना दिग्भ्रमिता भवति। उदाहरणानुरुपं प्रतिमानाटके प्रतिमायाः सम्पूर्णं चिन्तनं महाकवेः स्वकीया कल्पना अस्ति। यत् एषा भासीया कल्पना भगवतः प्रसादमिव वर्तते यत्र ऋषिवचनस्य सत्यतांः प्रमाणीकर्तुं विधातुं वा भगवतः रामस्यारण्यं प्रति गमनाय याचनां भवति। किन्तु एतावतां मौलिकतां दृष्ट्वा महाकविभासस्य बौद्धिकक्षमता न्यूनतां प्रति नैवावगच्छत्। स खलु बहुकौशलेन एतासां कथानां विन्यासम् अकरोत्। कथावस्तूनां विकासः सदैव दर्शकानां कौतूहलं विकासयति। विस्तृतेभ्यः क्षेत्रेभ्यः आगतानां कथांशानां संकलनेन पात्राणां संख्यासु वृद्धिर्भवति। यानि पात्राणि अत्र प्रदत्तानि सन्ति तानि सर्वाणि कस्मिंश्चिद् ग्रन्थे न दृश्यते।

यानि पात्राणि भासरूपके सन्ति, तानि सर्वाणि मानवलोकस्य प्राणिनः सन्ति। तेषां सर्वेषां प्राणिनां जीवने कुत्रापि कृत्रिमता नैव वर्तते। यथा वयं यत्र-तत्र

पश्यामः तथैव अत्रापि अर्थात् अस्मिन् भासरूपकेषु पश्यामः। एतादृशं वृत्तान्तं भासकृत्-मध्यमव्यायोगे मिलति। अस्मिन् रूपके मातृपितरौ मिलित्वैव स्वमध्यमपुत्रम् स्वेच्छया मृत्युं प्रति प्रेषयतः, तत्र संशयः नैव विद्यते।

**वृद्धः -एह्येहि पुत्र!**

**विनिमाय गुरु प्राणान् स्वैःप्राणैःगुरुर्वत्सल।**

**आकृतात्मदुरावापं ब्रह्मलोकमवाप्नुहि।।**

**द्वितीयः-अनुगृहितोऽस्मि।**[3]

अत्र दर्शकाः स्वयमेव अनुमानं कुर्वन्ति यदयं शुनः शेपस्य आख्यानमस्ति। यस्यात्र नाट्यकाराः उपस्थापनं कुर्वन्ति। विप्राणां संस्कृतिः अथ च धर्मस्य प्रभावः अविमारके प्रतिमानाटके अवलोक्यते। अविमारकः ब्राह्मणस्य शापं सत्यं विधातुं स्वेच्छया चांडालमिवाचरति- **वर्धमानेन यस्मादविरूपधारी मारितोऽसुरः।**[4] अनेनैव प्रकारेण भरतस्य माता कैकेय्याः ऋषेः शापं सत्यं विधातुं रामं वनं प्रति प्रेषयति। कैकेयी- **मां निक्षिप्य पुत्रको रामो वनं प्रेषितः।**[5]

भासः स्वपात्राणां चरित्रोपस्थापनेथादर्शोपस्थापनं विदधाति। तस्य अयमेव प्रयासः वर्तते यत् पात्राणां चरित्रोपस्थापनं सम्यक्तया भवेत्। अस्य कार्यकर्तृणाञ्च कृते यत्र कुत्रापि कथानके वा परिवर्तनमपि स्यात् तर्हि नास्ति चिन्ता। नायकः नायिका आमात्यः विदूषकः कञ्चुकीयः गणिका अनुचरादयश्च इत्यादीनां सर्वेषां चरित्रमेवं प्रकारेणैव दृश्यते। अथ च यत्र कुत्रापि ग्रन्थे आगतानां अंशानामपसारणम् नैव सम्भवं वर्तते चेदल्पता नूनमेव भविष्यति।

अथ च नाटकोपरि नायकानां प्रभावः एवमेव स्यात् तर्हि तस्य परिष्कारोपि स्यात्। येन नामको परितस्य प्रभावः न स्यात्। पात्राणां संवादेऽपि भासः विशेषेणरूपेण दक्षतायाः उपस्थापनम् अकरोत्। मन्ये प्रायः सर्वे संवादाः लघवः सन्ति। किन्तु तत्र विस्तारोऽपि वर्तते। वाग्विस्तारेऽपि परिहारः महाकवि-भासस्य वैशिष्ट्यं वर्तते। पात्राणि तदेव वदन्ति यस्यावश्यकता। पात्रान् अयमवबोधो कुत्रापि न भवति यदयं प्रयोगः अनुचितः। एते सर्वे संवादाः विवक्षितभावबोधकाः। अभिष्टार्थस्य द्योतने अभिष्टः कुत्रापि लक्षितो न भवन्ति। अभिनेतृषु परस्परं वार्तालापं एव दर्शकानां श्रोत्रिणाञ्च कृते अद्वितीयं वर्तते। तेषां दृश्यानामुपस्थापनं तेषां नाट्यकर्तृणाम् कृते सफलविषयाः वर्तन्ते। संवादेषु कवेः भाषाः नाटकस्यानुरूपा सुसम्पन्नाश्च सन्ति। अनेन कवेः श्रीर्वृद्धिर्भवति। महाकविः

भासः सरलशब्दवल्याः आचार्यः अस्ति। वार्त्ता इयं नितान्ततया परिष्कृता वर्तते, यत्र नाटकस्य भाषा यथा साध्यं सरलं भावव्यञ्जनया सामर्थ्यं विदधाति। तदैव नाटकं सार्वजनिकं सार्ववर्णिकं च भविष्यति। नाटकस्य पात्राणि दर्शकाश्च परिष्कृताः अपरिष्कृताश्च द्विविधा भवन्ति।

भासस्य नाट्यकला सूक्तिरिव मनो मोदते। यत्र सत्यं गम्भीरानुभूतिश्च लोकस्य वीक्ष्यते। सा दुरूहमपि भावं सरलतयैव प्रभावशालितया प्रकटीकर्तुं क्षमते। न तत्र भाषायाः प्रवाहः क्वापि प्रतिहितो भवन् संलक्ष्ये। अवलोक्यताम्-

**सुखमर्थो भवेत् दातुं सुखं प्राणाः सुखं तपः।**
**सुखमन्यद् भवेत् सर्वं दुःखं न्यासस्य रक्षणम्।।**[6]
**गुणानाञ्च विशालानां सत्काराणां च नित्यशः।**
**कर्तारं सुलभा लोके विज्ञातारश्च दुर्लभाः।।**[7]

एतदर्थमेव नाट्यकाराणामिदं प्रथमं कर्तव्यं यत् भाषा सरला भावबोधकाश्च भवेत् इत्येवं दृष्ट्या दर्शनेन वयं पश्यामः यत् महाकविः भासः सुचिन्तकः सर्वगुणसम्पन्नश्च आचार्यो वर्तते। वस्तुतः भासस्य प्रतिष्ठायामेकमिद-मपि कारणं वर्तते। महामहोपाध्यायेन गणपतिशास्त्रिणा भासस्य रचनाविषये अधोलिखितं वक्तव्यं प्रदत्तम्-

"The Sentences are everywhere replete with a wealth of ideas beautifully expressed which cultured minds appreciate."[8]

भासः स्वनाटकेषु अलंकाराणां संवर्धनाय बहु यत्नं कृतवान् अस्ति। तद्यथा सन्ध्या, रात्रिः, तपोवनम्, मध्याह्नमित्यादीनां वर्णनं यत्र-तत्रावलोक्यते। इमानि सर्वाणि कार्याणि सूक्ष्मान्वेषणस्य परिणामानि सन्ति। एतेनेदं स्पष्टं भवति यत् महान् विचारकः आचार्यश्च महाकविः भासः इमानि सर्वाणि प्राकृतिकदृश्यानि बहुसूक्ष्मपद्धत्यावलोकितानि सन्ति। वस्तुतः सम्पूर्णं वर्णनं बहुसजीवतयाचित्रितमस्ति तथा च इमे सर्वे बिम्बग्रहणे समर्था सन्ति। नाटकीयकथानके एतस्योपन्यासस्य प्रसङ्गोपात्ते सत्येव ग्रहणं कृतमस्ति, कुत्रापि एवं न दृश्यते यत् पाण्डित्यप्रदर्शनाय एव एतेषां ग्रहणं कृतमस्ति। उत वा पाण्डित्यप्रदर्शनाय एव एतेषामुपस्थापनं वर्तते।

रसपरिपाकदृष्ट्यापि महाकवेः भासस्य नाटकान्युत्कृष्टानि सन्ति। एतेषां नाटकेषु नवरसानां वैशिष्ट्यं स्पष्टतया दृश्यते। अत्र रसानां सिद्धिः बहुसम्यक्तया

कृता वर्तते तथा च रसाभावः दृश्यते। रसाभावोऽपि दृश्यते। वीर- शृङ्गार-करुणादयः एते प्रायः सर्वे रसाः अत्र नाटकेवलोक्यन्ते। संयोगो- विप्रलम्भश्च, अनयोः द्वयोः प्रयोगः शृङ्गारे प्रायेण दृश्यते। एवमेव यानि नाटकानि वीररसान्विताश्च सन्ति। तानि सर्वाणि दानवीरयुद्धवीरादि नाम्ना प्रसिद्धाः सन्ति तथा च सर्वत्र द्रष्टव्यानि सन्ति। हास्यरसस्य प्रयोगः प्रायेण भासकृतनाटकेषु दृश्यते। विदूषकः सर्वत्र स्वहास्यरसेन सर्वान् तोषयति। अन्येऽपि रसाः यत्र-तत्र प्रायः अवलोक्यन्ते। एतदर्थमेव महाकविः जयदेवः स्वलेखिन्या लिखति 'भासो हासः कविकुलगुरुः कालिदासो विलासः'। अनेनैवेदं दृश्यते यत् महाकविः न केवलं शृङ्गारस्यापितु तस्य प्रमुखः रसः हास्योप्यस्ति। अत्रेति वक्तुं शक्यते यत् नूनमेव महाकविभासविषये एषा पङ्क्तिः सर्वत्र प्रचलिता वर्तते यत् 'भासो हासः'। किन्तु तस्य ग्रन्थे हास्यरसस्याधिक्यं नैव दृश्यते। अत्र वयं वक्तुमिच्छामः यत् यद्यपि आचार्यस्य भासस्याभिरुचिः हास्यरसे नैवासीत् किन्तु तस्यानुरक्तिः कदाचित् निश्चयेनासीत् एतदर्थमेव तस्य हास्यरसेऽनुकूलतासीत्।

महाकवेः भासस्य कृतौ यद्यपि हास्यरसस्य बहुप्रसारः नैवासीत् परं सः स्वमुग्धया स्वकीयं वैशिष्ट्यं यत्र तत्र विभिन्नेषु संस्कृत-ग्रन्थेषु निर्मितवान्। यदि प्रतिज्ञानाटकस्य विदूषकः औद्धात्यमुपस्थापयन् हासस्य प्रदर्शको वर्तते तर्हि तत्रैव स्वप्नवासवदत्तस्य सुकुमारः हास्यरसस्य संसृष्टि करोति।

महाकविभासस्य नाट्यकृतिषु यत्र-तत्र काव्यकौशलं प्रस्फुटितं भवति। भासस्य कविहृदयरवसरे संप्राप्ते सति स्वकलायाः प्रदर्शनं करोति। विविधानां छन्दसां प्रयोगः द्रष्टव्यानि भवन्ति। अलङ्काराणामपि प्रयोगः वैशिष्ट्यमुप-स्थापयति। सुन्दरात्-सुन्दराणि उपमानानि वचनानि अत्र नूनमेव द्रष्टव्यानि भवन्ति। अलङ्कारेषु उपमालङ्कारस्यानुभूतिः सर्वत्र भवति।

**अयोध्यामटवीभूतां पित्रा भ्रात्रा च वर्जिताम्।**
**पिपासार्तोनुधावामि क्षीणतोयां नदीमिव।।**[9]

अलङ्कारशास्त्रस्येदं प्रसिद्धमुदाहरणम् भासीयकलायाः अद्वितीय-मुदाहरणम् वर्तते-

**लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः।**
**असत्पुरुषसेवेव दृष्टिर्विफलतां गता।।**[10]

अत्र परमप्रसन्नतायाः विषयो वर्तते यत् भासकृत-नाटकानि रङ्गमञ्च दृष्ट्यानुकूलं वर्तते न वा। अस्योत्तरं बहुस्पष्टं वर्तते। महाकवेः भासस्य प्रयासात् प्रायः सर्वाणि नाटकानि सुफलानि सन्ति। किन्तु कदाचित् संस्कृतस्य अन्येषु नाटकेषु अभिनेयदृष्ट्या आंशिकदृष्ट्या काठिन्यमपि वर्तते, किन्तु भासकृत् नाटकेषु एतादृशी अवस्था नास्ति। इमानि सर्वाणि नाटकानि अभिनयदृष्ट्या समुचितनि सन्ति। कथानकाः पात्राणि भाषाशैल्याः, देशकालदृष्ट्या संवाददृष्ट्या च अनुकूलानि सन्ति। एवं प्रकारेण वक्तुं शक्यते यत् अभिनयदृष्ट्या भासस्य सर्वाणि नाटकानि सुताराम् सफलानि सन्ति।

भासस्य नाटकानां रचना तस्मिन् समयेभवत् यदा नाटकस्य सर्वे सिद्धाताः तथा च नाट्यकलाश्च पूर्णरूपेण विकसितः नैवासीत्। एतदर्थं अत्र नैके प्रसङ्गाः एतादृशाः सन्ति। ये नाट्यनियमविरुद्धाःसन्ति। यथा वधाभिषेकादयः। परं यानि वर्ज्यदृश्यानि सन्ति। तेषां उपयोगः यत्र यस्य भासस्य ग्रन्थे अवलोक्यते तेन अभिनेतृत्रणाम् मध्ये न कोऽपि व्याघातः अवलोक्यते। अनेन वयं पूर्णरूपेण सिद्धो भूत्वा वक्तुं शक्नुमः यत् भासस्य नाटकानि पूर्णरूपेण अभिनययोग्यानि सन्ति।

महाकविः भासः स्वप्रभुत्वेनाथ कौशलेन सम्पूर्णे जगति प्रसिद्धो वर्तते। यद्यपि भरतमुनेरनुसारं नाट्यशास्त्रस्य नियमानामनुपालनं भासेन सम्यक् प्रकारेण नैव कृतमस्ति तथापि तेन स्वोत्कृष्टवैदुष्येन कल्पनाशक्त्या च निजनाटके रोचकतां समुत्पन्नाय बहुयत्नं कृतवानस्ति। स्वकीयाद्भुत्कल्पनायाद्वितीया शैल्या चैतेनोल्लिखिते नाटके अनुपस्थितानां पात्राणामभावेऽपि रङ्गमञ्चोपरि समुपस्थाप्य दर्शकानां हृदि रुचिमुत्पादयति स्म।

भासस्योत्कृष्टे नाटके प्रतिज्ञायौगन्धरायणे वासवदत्ता उदयनश्च एतौ रङ्गमञ्चोपरिप्रकटौ भूत्वाऽपि सम्यक् प्रकारेण स्वोपस्थापनं कुर्वन्तौ स्तः। एतौ स्ववैविध्येन न केवलं दर्शकानां मनसि अपितु श्रोत्रिणां कर्णेष्वपि नैजं स्थानं स्थापितवन्तौ स्तः तथा च तत्र स्थितानां जनानां बुद्धौ कौतूहलं उत्पादितवन्तौ स्तः। यस्मिन् कस्मिन् स्थानोपरि एषः आचार्यः नाटकस्यैका अनुपमाशृङ्खलाऽपि उपस्थापिता अस्ति, इति महादामोदस्य विषयः। उदयनस्य कारगारे प्रेषणं, ब्राह्मणस्य स्नेहप्रदर्शनथ च वसन्तसेनया साकं प्रेमोस्थापनमिति महाकवेः वैशिष्ट्यमुपस्थापयति। अनेन प्रकारेण भासस्य नाट्यकलायाः नैकप्रकारकं वैशिष्ट्यं दृश्यते।

**सन्दर्भग्रन्थसूचिः-**


1. *भरतनाट्यशास्त्रम्*
2. *स्वप्न, 1/04*
3. *मध्यम, 1/21*
4. *अविमारक, 6.पृ-158*
5. *प्रतिमा, 6/पृ-165*
6. *स्वप्न, 1/10*
7. *स्वप्न, 4/09*
8. *critical study, p.27*
9. *प्रतिमानाटकम्, 3/10*
10. *बालचरितम्, 1/15*


●●●

# 19

# महाकविभवभूतिकृत-मालतीमाधवे नयनाभिनयत्वम्

*किरण आर्या*

**आङ्गिकं भुवनं यस्य वाचिकं सर्ववाङ्मयम्।**
**आहार्यं चन्द्रतारादि तं नुमः सात्विकं शिवम्।।**

समस्तमपि विश्वं यस्य आङ्गिकाभिनयो विद्यते सकलं च वाङ्मयं यस्य वाचिकाभिनयः, चन्द्रतारागणश्चापि यस्य आहार्याभिनयरूपेण विद्यते तं सात्विकाभिनयस्वरूपं भगवन्तं शंकरं वन्दे। आचार्यनन्दिकेश्वरकृत-अभिनयदर्पणस्य अस्मिन् नमस्कारात्मक-मंगलाचरणे ब्रह्माण्डोपादानस्य, अभिनयस्य चतुःप्रभेदेषु यः सन्निवेशः, तत्सत्यमेव, यतोहि अभिनय इति अद्भुतैव काचित् सा कला या नाट्यं लोकाय प्रेक्षणीयं करोति। प्रश्न इह स्वाभाविकमिति को नाम अभिनय इति? कदा चास्योदयः? तदा विश्वस्य कलामर्मज्ञैः एकमतेनैतत् उररीकृतं यत् अभिनयः एका श्रेष्ठा कला। अस्या कलाया उदयः विकासश्च वैदिकयुगादेव विद्यते। विश्वस्य सर्वे विद्वान्सः स्वीकुर्वन्ति यत् अभिनयकलायाः मूलस्रोतः, वेदा एव। वेदेषु अभिनयसामग्री यत्र तत्र विद्यत एव। तत एव प्रेरिता आचार्याः नाट्यशास्त्रस्य काव्यशास्त्रस्य च अजस्रामेतां परम्परां प्रवर्तितवन्तः।

चतुर्वेदान् संदुह्य पंचमवेदरूपेण नाट्यवेदस्य रचना ब्रह्मणा कृतमिति नाट्यशास्त्रे भरतमुनिना प्रोक्तम्-

**एवं संकल्प्य भगवान् सर्वान् वेदाननुस्मरन्।**
**नाट्यवेदं ततश्चक्रे चतुर्वेदाङ्गसम्भवम्।।**
**जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च।**
**यजुर्वेदादभिनयान् रसानाथर्वणादपि।।'**[1]

ब्रह्मणा विरचितस्य नाट्यवेदस्य एव मूर्तरूपं भरतविरचितं नाट्यशास्त्रं विद्यते। यस्मिन् यजुर्वेदादेव अभिनयकला प्रवर्तिता। नाट्यशास्त्रस्य अष्टमे अध्याये अभिनयशब्दस्यनिर्मितिविषये, तदर्थविषये, तद्भेदोपभेदविषये विस्तरेण चर्चास्ति। तत्रोक्तम् -

**अभिपूर्वस्य णीञ् धातुराभिमुख्यार्थनिर्णये।**
**यस्मात् प्रयोगं नयति तस्मादभिनयः स्मृतः।।**
**विभावयति यस्माच्च नानार्थान् हि प्रयोगतः।**
**शाखाङ्गोपाङ्गसंयुक्तस्तस्मादभिनयः स्मृतः।।'**[2]

अर्थात् आभिमुख्यद्योतक-अभिउपसर्गपूर्वक-णीञ्धातुना अभिनयशब्दो निष्पन्नो भवति। यस्यार्थो भवति यत् कस्यचित् पदस्य अथ शब्दस्य भावं मुख्यार्थं यावत् प्रापणम् अर्थात् सामाजिकानामाभिमुख्येन साक्षात्कारेण नीयते प्राप्यते अर्थः अनेन इति अभिनयः। अभिनयः, अतोऽभिनय उच्यते यतोहि अयं नाट्यप्रयोग द्वारा शाखा-अंग-उपागैः संयुज्य अनेकान् अर्थान् विभावयति व्यक्तीकरोति अर्थात् सांगोपांगद्वारा नाट्यस्य नैकैरर्थैः प्रेक्षकाणां सामाजिकानां कृते हृदयेन रसास्वादनं कार्यते, हृदयं भावार्थेन अभिभूयते सोऽभिनयः। अत एव आचार्यविश्वनाथः भवेदभिनयोऽवस्थानुकारः'[3] इति साहित्यदर्पणे ब्रवीति अर्थात् यस्मिन्, अभिनेता द्वारा शरीरेण मनसा वाचा च अभिनेयावस्थानां अनुकरणं क्रियते सोऽभिनय उच्यते। महाकविभवभूतिरपि स्वतः उत्तररामचरिते कथयति -

**तामेतां परिभावयन्त्वभिनयैर्विन्यस्तरूपां बुधाः।**
**शब्दब्रह्मविदः कवेः परिणतां प्राज्ञस्य वाणीमिमाम्।।'**[4]

अर्थात् परिणतप्राज्ञकवेः वाक् आंगिकादिचतुर्विधाभिनयमाध्यमेन भावकैः परिशील्यते। अभिनेतव्यभावाः सामाजिकानां सम्मुखे अभिनयप्रक्रियया उपस्थाप्यते।

इह खलु ध्यातव्यं यत् न केवलमनुकरणमेव अभिनयः अपितु प्रकृत वस्तुनः क्रियात्मकचेष्टानाम् आंगिक-वाचिकद्वारा अथवा संकेतद्वारा भावनात्मकानुकरणमेव अभिनयः। एवं च अभिनये यथार्थानुभूतिः, यथार्थानुकरणस्य अनुभतिः प्रतीतिर्वा मुख्योद्देश्यं भवति। आचार्यभरतः अभिनयस्य चतुर्भेदं वक्ति -

**आंगिको वाचिकश्चैव ह्याहार्यः सात्विकस्तथा।**
**चत्वारोऽभिनया ह्येते विज्ञेया नाट्यसंश्रयाः।।**

अर्थात् आंगिकवाचिक-आहार्य-सात्विक इति चतुर्षु भेदेषु शरीरद्वारा कार्यसम्पादनं आंगिकाभिनय उच्यते। तत्रापि शिरोहस्तकटीवक्षः पार्श्वपादाः एतानि अंगानि, अपि च नेत्रभ्रूनासाधरकपोलचिबुकानि उपांगानि सन्ति। अतस्तावत् नेत्राभिनय इति उपांगाभिनय एव। नेत्रद्वारा अभिनयः नेत्राभिनयः। वाक्यार्थाभिनयं रसाश्रयं नाट्यं भवति अतः सामाजिकानां कृते तदनुकरणस्य भावानुकूलप्रतीतिरेव अभिनयः। तद्भावानुकूलप्रतीतिः नेत्रद्वारा भवति चेत् तन्नेत्राभिनयो भवति।

मालतीमाधवनाटकेऽपि नायिकायाः मालत्याः अथवा अन्यासां सखिजनानामपि चान्येषामपि नेत्राभिनयस्वरूपं वयं पश्यामः। किमधिकं नाटकमिदं नेत्राभिनयेन संवलितमिति संकेतयितुं मन्ये भवभूतिना मंगलाचरणे भगवच्छिवस्य तृतीयनेत्रं रक्षार्थं प्रार्थ्यते- तार्तीयीकं पुरारेस्तदवतु मदनल्पोषणं लोचनं वः। यतोहि नेत्राभिनयेन, नेत्रसंकेतेन, प्रचलनेत्रेण मनुष्यस्य ये निगीर्णाः भावाः भवन्ति ते स्नेहसर्जनया सह ताण्डवादिकर्मणा प्रलयादिकं कर्तुमपि समर्थाः भवन्ति।

मालतीमाधवनाटके क्व क्व खलु नेत्राभिनयः दृश्यते इति वयं पश्यामः। नाटके यदा कामन्दकी अवलोकितां पृच्छति - यत् मालतीमाधवयोर्पाणिग्रहणं सम्भवं किम्? इत्युक्त्वा सहर्षं वागक्षिस्पन्दनं सूचयित्वा कथयति सा-

**विवृण्वतेव कल्याणमान्तरङ्गेन चक्षुषा।**
**स्फुरता वामकेनापि दाक्षिण्यमवलम्बते।।'**[5]

अर्थात् भाविमंगलं सूचयता अभिप्रायवेदिना इव सव्येन नेत्रेण दाक्षिण्यमुदारतामाश्रीयते अर्थात् मालतीमाधवयोः परिणयरूपं मंगलस्वरूपं सूचयतीति। इह वामनेत्रस्य स्फुरणमपि नेत्राभिनय एव यतोहि तेन भावानुकूल-प्रतीतिर्जायते। एकत्र मकरनन्दः कामपीडितं माधवं दृष्ट्वा वदति - गमनमलसं शून्या दृष्टिस्ते'[6] इह पद्ये 'शून्या दृष्टिः' इत्यस्य तात्पर्यं चिन्तापहृतेन मनसाधिष्ठिता दृष्टिरिति भावः अत्र कामदेव एव तद्दृष्टौ शून्यत्वेन अभिनयं करोति। माधवश्च मकरन्दं स्वचिन्तासक्तकामव्यथां श्रावयन् वदति यत् आवयोः (मालतीमाधवयोः) चक्षुषोः निरतिशयं अयस्कान्तमणिशलाका इव आकृष्टवत्योः सत्योः, ललनायाः सखीजनैः भ्रूविलासेन मन्दहसितानि अपांगदर्शनानि त्यक्ताः -

**सभ्रूविलासमथ सोऽयमितीव नाम। सप्रत्यभिज्ञमिव मामवलोक्य तस्याः।**
**अन्योऽन्यमेव चतुरेण सखीजनेन, मुक्तस्तदा स्मितसुधामधुराः कटाक्षाः।।'**[7]

इह स्मिताननैः सखीजनद्वारा मुख्यार्थप्रयोजनं सूचयन्कटाक्षः वर्ण्यते। अपि च अग्रे माधवः मकरन्दं ब्रवीति यत् -

**हृदयमशरणं मे पक्ष्मलाक्ष्याः कटाक्षैरपहृतमपविद्धं पीतमुन्मूलितं च।।'**[8]

तस्याः मालत्याः अक्षिणोः कटाक्षैः- अपांगदर्शनैः अर्थात् नेत्राभिनयेन मम अशरणं हृदयं बलात् आच्छिद्य गृहीतम्। तेन, गाढं निखात इव मे हृदये कटाक्षः'[9] अमृतेन विषेण दिग्धकटाक्षः-अपांगावलोकनं मे हृदये अन्तःप्रवेशितमेव। अर्थात् मालती स्वनेत्राभिनयेन मां सर्वथा आकृष्टवतीति अभिप्रायं सूचयति माधवः। भवभूतिरिह वक्तुं प्रभवति यत् या उत्तमललनाः भवन्ति ताः अन्यत्रासक्तचेतसः भूत्वा परत्र चक्षूरागिण्यो न भवन्ति अर्थात् मनोऽन्यत्र दृगन्यत्र चेटीनां नोत्तमस्त्रियाः, अतो ललनानां नेत्राभिनय द्वारा रागप्रकटीकरणं तस्मिन्नेव भवति यं प्रति ता आसक्ताः भवन्ति। द्वितीये अंके कामन्दकीमुखेन महाकविभवभूतिः कथयति अंगिरर्षेः मतं यत् यस्यां नायिकायां मनश्चक्षुषोर्निबन्धः, तस्यामेव विवाहमंगलोद्गमो भवेत्। यां प्रेमिकां प्रति प्रेमी नेत्राभिनयेन प्रेमानुरागं प्रकटयति सैव कन्या तेन विवोढव्या। अभिप्रायः एष ज्ञातुं शक्यते यत् विवाहाय अपि नेत्रस्वीकृतिः अत्यन्तमावश्यकी। एवं विवाह इति प्रयोजनसूचकमपि नयनं नयनाभिनय एव परिणामः। नैतावदेव प्रियसमागमानुभवस्य प्रदर्शकानि यानि अंगोपांगानि भवन्ति तत्र 'आकेकरस्निग्ध- मुग्धं चक्षुः' अर्थात् आकुंचितं तिर्यग्भूतं स्निग्धं च चक्षुरपि प्रियसमागमानुभवकारकं भवति। तथा च पद्यम् -

**नीवीबन्धोच्छ्वसनमधरस्पन्दनं दोर्विषादः,**
**स्वेदश्चक्षुर्मसृणमुकुलाकेकरस्निग्धमुग्धम्।**
**गात्रस्तम्भः स्तनमुकुलयोरुत्प्रबन्धः प्रकम्पो**
**गण्डाभोगे पुलकपटलं मूर्च्छना चेतना च।।'**[10]

यदा च खलु माधवः भवनान्निर्गत्य बहिरायाति तदा तस्य सौन्दर्येणाकृष्टाः सर्वाः सुन्दर्यः नार्यः कटाक्षैः-अपांगदर्शनैः अर्थात् नेत्राभिनयेन स्व-स्व-स्नेहं प्रकटयन्ति -

**असौ विद्याशाली शिशुरपि विनिर्गत्य भवना**
**दिहायातः सम्प्रत्यविकलशरच्चन्द्रवदनः।**

**यदालोकस्थाने भवति पुरमुन्मादतरलैः,**
**कटाक्षैर्नारीणां कुवलयितवातायनमिव।।'**[11]

तृतीये अंके कामन्दकी मालतीं परिष्वज्य कथयति यत् वल्लभलोकन्त्या येऽनुभावास्ते श्रमवशात् त्वयि अपि दृश्यन्ते, तथाहि वल्लभलोकनमपि ललनायाः वचनं सगद्‌गदं करोति, प्रत्यंगं शिथिलयति, हर्षप्रकर्षाविर्भावात् नेत्रे च निमीलयति। अत्र खलु मालत्या नेत्रस्थितहर्षप्रकर्षप्रकटाभिनयेन प्रियदर्शनं ज्ञायते (3.8) तावदेव अग्रे माधवोऽपि वांछति यत् -

**प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदयास्**
**तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि।**
**यास्वन्तःकरणस्य बाह्यकरणव्यापाररोधी क्षणा**
**दाशंसापरिकल्पिततास्वपि भवत्यानन्दसान्द्रो लयः।।'**[12]

अर्थात् मनोहरलोचनाया मालत्याः निसर्गमधुराः कटाक्षविक्षेपभ्रूचालनादीनि व्यापाराः मयि प्रणयिनि माधवे भवेयुरर्थात् तस्याः कटाक्षादिनेत्राभिनयेन मयि प्रेमानुभवः सदा भवेदिति। नैतावदेव मालतीमाधव उभयोरपि श्रृंगाराचार्य-सर्वागमोपदेशनिर्मित-वैदग्ध्य मुग्धमनोहरा दृष्टिः विद्यत इति मदयन्तिकामुखेन आचार्यभवभूतिः निगदति (267) अन्योऽन्यस्य अनुरागप्राकट्यं नेत्राभिनयस्यैव मुख्यं कार्यम्।

अष्टमे अंके माधवः मालत्याः नेत्राभिनयं वर्णयन् मकरन्दं वदति-

**कथयति त्वयि सस्मितमालती चलितलोलकटाक्षपराहतम्।**
**वदनपंकजमुल्लसितत्रपं स्मितदृष्टी सखी नमयिष्यति।।'**[13]

हे मित्र मकरन्द! युद्धवृत्तान्तं ब्रुवाणे सती संजातमन्दहास्यया मालत्या, चंचलापांगैः पराहता, अत एव लज्जायुक्ता मदयन्तिका निश्चलनयनं स्वमुखकमलं नमयिष्यति। इह मालत्याः कटाक्षस्य नेत्रव्यापारस्य यः प्रभावः मदयन्तिकायां वर्ण्यते सः नेत्राभिनयेनैवास्ति। मालतीमाधवे नेत्राभिनयं चक्षुर्वृत्तिरित्युक्तः'[14] अर्थात् चक्षुर्व्यापार एव नेत्राभिनयः।

एवं खलु नाट्यं तु वागपेक्षया अवस्थादिभिः अंगोपांगभावैरधिकं आकर्षकं भावसम्प्रेषकं भवति तत्रापि नेत्रस्य भूमिका सर्वोपरि वर्तते। नेत्रे तु अकथयती अपि भूयः एव वक्तुं समर्थे भवतः। नेत्रं पिहितं स्यात् अपिहितं वा स्वभावं प्रकटयितुं नितान्तमर्हम्। अत एव नेत्रमधिकृत्य बहूनि चलचित्रगीतानि

निर्मीयन्ते तन्नेत्राभिनयस्य प्राभाव्यम्। अत एव नेत्रसंयुक्त-अनेकवैशिष्ट्ययुताः शब्दाः, विशेषणानि, समस्तपदानि नाटकेषु काव्येषु दृश्यन्ते, यथा - प्रचललोचना (1.42) तिर्यगपवर्तितदृष्टि वक्त्रम् (1.43) विलोलदृष्टिः (4.8) नेत्रपुण्डरीकताण्डवः (पृ.277) प्रसारितस्निग्धलोचनः (पृ.314) स्मितोज्ज्वलादृक् (9.23) अन्योऽन्यदृष्टिविनिपातवंचना (124) मालतीनयनमुग्धचन्द्रमाः (पृ.345) इत्यादयः येऽपि दृगसंयुतानि पदानि सन्ति तानि नेत्राभिनयसूचकान्येव। नाट्यद्वारा, नाट्याभिनयद्वारा भावानुभूतीनामुद्यमे भवभूतिः सर्वथाचरमायितः। भव एव भावाः, तेषां भूतिः अनुभतिः नितान्तं नाटकेषु कार्यते येन सः भवभूतिः, कृतिभिस्सह नाम्नः यशोऽपि वयं तद्रचनासु अन्वर्थतया पश्याम इति कवेः वैशिष्ट्यम्। अत एव वक्ति धनपालः तिलकमंजर्याम्-

**स्पष्टभावरसा चित्रैः पादन्यासैः प्रवर्तिता।**
**नाटकेषु नटस्त्रीव भारती भवभूतिना।।**

**सन्दर्भाः -**


1. *ना. शा., 1.16,17*
2. *ना. शा., 8.6,7*
3. *सा.द., 6.2*
4. *उत्तरराम., 7.20*
5. *मालती., 1.11*
6. *मालती., 1.20*
7. *मालती., 1.28*
8. *मालती., 1.31*
9. *मालती., 1.32*
10. *मालती., 2.5*
11. *मालती., 2.11*
12. *मालती., 5.7*
13. *मालती., 8.11*
14. *मालती., 9.55*


●●●

# 20

# किरातार्जुनीयद्वितीयसर्गप्रयुक्तकवित्वसमीक्षा

*बाबूलालः मीना*

संस्कृतमहाकाव्यरचनविधौ वैचित्र्यमार्गमवलम्ब्य विविधविषयग्रथनपुरःसरं काव्ये रमणीयताधानं महाकविभारविप्रवृत्तिर्वेवेद्यत इति समीक्षकाणामनुभवः प्रमाणम्। कालिदासकवेरर्वाचीनोऽयं कविवर्यः स्वप्रतिभाज्योतिषैकेनापि किरातार्जुनीय-महाकाव्येनाद्यावधि साहित्याकाशे काशतेतराम्। महाभारत कथामुपजीव्य कविकल्पनामण्डनपुरः सरं रचितमिदं किरातार्जुनीयमहाकाव्यं नितरां सहृदयहृदयग्राहि दरीदृश्यते। संस्कृतसाहित्यपरम्परायामनेनैव महाकाव्येन वाग्वैदग्यपूर्णप्रौढपरम्परा स्थापितेति कथनेन नातिशयत्वं साधयति। अस्मिन्नालेखे अस्यैव महाकाव्यस्य द्वितीयसर्गे वर्णितानां विषयाणामाधारेण कविवैशिष्ट्यं विश्लेषितं वर्तते। कविनानेन द्वितीयसर्गे भीमयुधिष्ठिरयोः संवादमाध्यमेन राजनीतिचित्रणं विशेषतः कृतम्। तथाप्यत्र विविधावान्तरविषया अपि वर्णिताः। तेऽपि कविना क्वचिदुपमानरूपेण क्वचिच्च दृष्टान्तादिरूपेण यथावसरं ग्रथिताः। उपदेशमूलकरूपेणापि केचिद्विषयाः कविना चारुतया संयोजिता। विशेषतः द्वितीयसर्गे किरातार्जुनीये महाकविभारविना राजनीतिविषयिणी चर्चा संवाद माध्यमेन विहिता। अत्र भाषिकदृष्ट्या, वैषयिकदृष्ट्या पात्रस्थापनदृष्ट्या च महाकविभारवेरनितरसाधारणकवित्वं दरीदृश्यते। किरातार्जुनीयद्वितीयसर्गस्य विहङ्गमालोकने सति 'भारवेरर्थगौरवम्' इत्युक्तिः स्पष्टतया दृश्यत इत्याशयः।

सुरभारतीसमुपासनाग्रेसरेषु महाकविवरेषु पण्डितमण्डलपुरोगमो महाकविभारविरन्यतमः। वाल्मिकी-व्यास- कालिदासा- श्वघोषादिमहाकवि प्रचलितमार्गेषु भारवेरपि पादन्यासो महद्वैलक्षण्यपूर्णो जात इति तदीयकाव्यकौशल प्रदर्शनभूमीभूतकिरातार्जुनीयमहाकाव्यमेव प्रमाणम् । किरातार्जुनीयमहाकाव्यादेव

संस्कृतकाव्यक्षेत्रे नवीनयुगक्रान्तिरभूत्। यतो हि कालिदासादीनां काव्ये वैदर्भिरीते रमणीयता, सरलता, हृद्यता तु विद्यत एव तथापि गौडीपाञ्चालीरीतिजन्य-संघर्षणास्वादस्य परिपूरणे किरार्जुनीयमेव भारवाहि। अतः संस्कृतकाव्यक्षेत्रे भारवेः कीर्तिपताका यावच्चन्द्रदिवाकरं समुच्छ्रयत एव। कविधुरन्धरस्यास्य जन्मदेशकाल विषये न कोऽपि निश्चितसिद्धान्तस्तथापि किरातार्जुनीयरचनाकार्येणैवास्य सुरभारतीसमुपासकत्वं भारतवर्षभूषणत्वं सरस्वतीवरदपुत्रत्वं सुनिश्चितमेव ज्ञायते। अस्य विषये 'भारवेरर्थगौरवम्' इत्यपि प्रसिद्धिः श्रूयते। कविनानेनैकेनैव महाकाव्येन किरातार्जुनीयेन संस्कृतसाहित्ये विपुला सफलता लब्धेति तदीय-महाकाव्यस्यैव लोकप्रियता सफलता सुसिद्धा। कालिदासादीनां वैदर्भिरीतिप्रधानं, स्वल्पसमासात्मकं, रुचिरं महाकाव्यं प्रसिद्धम्। तादृश्येव रचना कालिदासयुगे निर्मीयते स्म। परन्तु भारविसमयः युगक्रान्तिरिव काव्येषु आयामप्रदायको जातः। तत्र काव्ये बाह्यविषयाणामपि गौणरूपेण वर्णनम्, राजनीत्यादिविविधविषयाणां काव्ये संयोजनं, सर्वतोमुखीव्युत्पत्तिप्रदर्शनं च कविवैशिष्ट्यं जातम्। अस्मिन्नेव क्रमे शिशुपालवधादीनि महाकाव्यानि ग्रथितानि। तादृशेषु महाकाव्येष्वपि किरातार्जुनीयस्यैव प्रभावो नितरामवलोक्यते। एककाव्यलब्धकीर्तिजीवनोऽसौ कविर्विविधविषयाणां चर्चनेनैव प्रतिष्ठितो जात इत्यत्र न कोऽपि सन्देहावसरः। विशेषतः कविना भारविना काव्येऽस्मिन् प्रकृतिचित्रण- राजनीतिशिक्षण- घटना वर्णनोपदेशप्रतिपादनादिपुरः सरं स्वालङ्कारिकभाषामाध्यमेन कथाग्रेसारिता। अत्र विशेषतः महाभारतवर्णितस्वल्पकथामर्जुनकिरातयो-र्युद्धात्मिकामाश्रित्यैतादृक् बृहन् महाकाव्यं ग्रथितम्। एतदपि कवेर्वर्णनाचातुरीं दर्शयति। कवेर्विषयविस्तारशैली, घटनावर्णनशैली, शब्दविभूषणशैली च नितरां प्रशंस्या दृश्यते। समष्टिरूपेण 'रमणीयार्थप्रतिपादकशब्दः काव्यम्' इति जगन्नाथलक्षणलक्षितकाव्यबन्धेन सहृदयानां हृदयेषु रोमाञ्चकारिरमणीयताधानं भारविना विहितमिति कथयितुं शक्यते ।

**भावः**

किरातार्जुनीयद्वितीयसर्गो भावपक्षदृशा सबलो दृश्यत एव। अत्र कविना भारविना भीमयुधिष्ठिरयोः संवादरूपा नाटकात्मिका कथा प्रस्तुता। प्रथमसर्गस्थ द्रौपदीकथनस्य बीजत्वमूरीकृत्य द्वितीयसर्गे भीमसेनस्योक्तिः प्रकटिता -

**विहितां प्रियया मनः प्रियामथ निश्चित्य गिरं गरीयसीम्।**
**उपपत्तिमदूर्जिताश्रयं नृपमूचे वचनं वृकोदरः।। इति।**

अस्मिन् श्लोके द्रौपदीकथनस्य प्रशंसा विहिता। तथैव द्वितीयेत श्लोकेनापि बृहस्पतेरपि दुर्वचत्वं द्रौपदीकथनस्य स्वीकृतं भीमसेनेन। अतः एतावता भूमिकादिना भीमसेनस्य समग्रेणापि कथनेन दुर्योधनेन साकं युद्धमेव करणीयमिति भावः प्रकटितः। एवमेव युधिष्ठिरस्य उत्तरपक्षत्वमपि महाकाव्येऽस्मिन् सौन्दर्याधायकत्वं दरीदृश्यते। तत्र भीमसेनस्य व्याजस्तुत्यादिना वाक्पटुतया पूर्वं प्रशंसा विहिता, तदनु तन्मतखण्डनं नयवर्त्मना कृतं विलोक्यते। अतः समष्टितः वक्रोक्तिशैल्या शनैः शनैः बहुभिः शब्दसमुदायैरपि युधिष्ठिरेण सहसैव दुर्योधनं प्रत्याक्रमणं न युक्तियुक्तमिति साधितम्। कूटनीतिपुरः सरमेव शत्रूणामाक्रमणं कर्तव्यमिति भावो यौधिष्ठिरो निश्चितः। अन्ततो गत्वा दुर्विनीतदुर्योधनस्य श्रीः स्वयमेव नष्टा भवतीति युधिष्ठिरस्य निश्चयः -

**लघुवृत्तितया भिदां गतं बहिरन्तश्च नृपस्य मण्डलम्।**
**अभिभूय हरत्यनन्तरः शिथिलं कूलमिवापगारयः।।[3] इति।**

एवं महाकाव्येऽस्मिन् यथा शब्दजन्यचमत्कृतिः सुदृढा मनोहरा च विद्यते तथैव भावकृतचमत्कारोऽपि द्रढीयान् वेविद्यते। अतः भावसंयोजने भारवेः कवित्वं समृत्कृष्टं हृदयस्पर्शि चानुभूयते ।

**संवादः**

सर्गेऽस्मिन् नाटकशैली अवलम्बिता। संवादमाध्यमेन घटनावर्णनं रुचिकरम्। अत्र विशेषतः पूर्वपक्षोत्तरपक्षत्वमवलम्ब्य कविना अन्धकार प्रकाशयोरिव पराक्रमपरामर्शयोर्विरोधः, परामर्शशालिनां विजयश्च प्रतिपादितः। स्वल्पसंवादमाध्यमेन स्वान्तर्निहितराजनीत्याद्युपदेशप्रकाशनं कवेरस्य महत्त्वपूर्णं विलक्षणं चिन्तनमस्ति। अत्र भीमसेनस्य संवादे पराक्रमस्य प्रशंसा सर्वोच्चराजनीति चिन्तनं च दृश्यते। तथैव युधिष्ठिरस्य कथनेऽपि सर्वथा पराक्रमस्यैवासमर्थनं नास्ति अपितु सविवेकस्य कालोचितस्य सविचारविमर्शस्यैव पराक्रमस्य महिमा वर्णितः। अतः भीमसेनस्य प्रत्येकं कथनस्य क्रमशः युधिष्ठिरेण प्रदत्तमुत्तरं सहृदयानां चेतांसि चमत्करोत्येव। यथाह भीमसेनः -

**अथ चेदवधिः प्रतीक्ष्यते कथमाविष्कृतजिह्मवृत्तिना।**
**धृतराष्ट्रसुतेन सुत्यजाश्चिरमास्वाद्य नरेन्द्रसम्पदः।।[4] इति।**

अत्र अस्माभिः अधुनैव दुर्योधनस्याक्रमणं करणीयमिति पराक्रमसंबलिता भीमसेनोक्तिः पूर्वपक्षभूता। तदुत्तरे चाह युधिष्ठिरः -

**सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।**
**वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः।।[5] इति।**

अत्र विवेकपूर्वकं चिरं विचार्यैव कार्यं करणीयमिति यौधिष्ठिरोक्तिः। इदमेव कथनं सिद्धान्तपक्षत्वं भजते सर्गेऽस्मिन्। अतः एतावता नीतिपूर्णसंवाद-माध्यमेन कविना काव्येऽस्मिन् स्वशास्त्रनैपुण्यं, काव्यकौशलं च प्रदर्शितम्।

**प्रकृतिः**

किरातार्जुनीयद्वितीयसर्गे प्रायेण बाह्यप्रकृतिचित्रणमुल्लेख्यरूपेण न दृश्यते। तथापि क्वचित् क्वचिदुपमानस्थापनप्रसङ्गे क्वचिच्च दृष्टान्तादि-प्रदर्शन-प्रसङ्गे प्रकृतिचित्रणं साधूपन्यस्तं दरीदृश्यते। 'अविभिद्य निशाकृतं तमः प्रभया नांशुमताऽप्युदीयते।।'[6] इत्यत्र च रात्रिकालसमाप्त्यनन्तरं प्रातःकालिकः सूर्योदयो वर्णितः। एवमेव क्वचित् सूर्यवर्णनम्[7], क्वचित् शरत्कालिकमेघवर्णनम्[8], क्वचित् कमलोद्घाटनवर्णन[9] मित्यादिविषयाः उपमानदृष्टान्तादिस्थापनसन्दर्भे सर्गेऽस्मिन् समागताः सन्ति। अत्र विशेषतः व्यासागमनानन्तरं पीठासीनव्यास-सामीप्याद्युधिष्ठिरस्य शोभा कविनेत्थं वर्णिता-

**व्यक्तोदितस्मितमयूखविभासितोष्ठ-स्तिष्ठन्मुनेरभिमुखं स विकीर्णधाम्नः।**
**तन्वन्तमिद्धमभितो गुरुमंशुजालं लक्ष्मीमुवाह सकलस्य शशाङ्कमूर्तेः।।[10]**

इत्यत्र महाकविभारवेः प्रकृतिवर्णनचातुर्यं स्पष्टतया दृश्यते। अत्र बृहस्पतिमभि वर्तमानस्य चन्द्रमसः शोभया साकं व्याससमीपस्थयुधिष्ठिरस्य चामत्कारिकी तुलना कृता दृश्यते। एतच्च भारविकलापक्षस्योत्कृष्टमुदाहरणं वर्वर्ति।

**अवान्तरविषयाः**

किरातार्जुनीयमहाकाव्यस्य द्वितीयसर्गे न केवलं भीमयुधिष्ठिरयोः संवाद एव कविलक्ष्यम्, अपितु काव्यगतमाधुर्यपरिवेशनपुरः सरं सहृदयहृदयेषु काव्यानन्द स्थापनमपि महाकवेः प्रयोजनं सिद्ध्यतीति धियात्र महाकविभारविनानेके विषया अपि यथोचितमङ्गीकृताः। उपमानरूपेण अथवा दृष्टान्तरूपेण आहोस्वित् सामान्यवाक्यसमर्थनरूपार्थान्यासालङ्काररूपेण वा सर्गेऽस्मिन् बहवोऽवर्ण्यविषयाः वर्ण्यसमर्थिताः सन्तो विश्लेषिताः। अतः कविवरेण्यस्य बहुविषयविज्ञत्वमर्थ-गौरवप्रयोजकत्वं च नितरामेव दृश्यते। यथा -

'कृततीर्थः पयसामिवाशयः'[11] इत्यत्र जलाशयेषु श्रेणीस्थापनादिकार्य-चित्रणम् कविना निरूपितम्। सामान्यतया जलाशयेषु अवगाहनसौकर्यार्थं सर्वत्र तीर्थेषु एतत्कार्यं दृश्यते। यथा वाराणस्यादिष्वपि वर्तत एव। तथैव 'अतिवीर्यवतीव भेजषे'[12] अत्र औषधीयगुणचर्चा विहिता कविना। एवमेव 'करिणी पङ्कमिवावसीदति'[13] इत्यत्र पङ्कलग्नकरिण्याः स्वरूपतथ्यं वर्णितम्, 'प्रतिपच्चन्द्रमिव प्रजा नृपम्'[14] इत्यत्र प्रतिपदश्चन्द्रमसं प्रति लौकिकास्था वर्णिता, 'नियतिं लोक इवानुरुध्यते'[15] इत्यत्रापि लौकिकजनानामास्था दैवे भवतीति वस्तु-चित्रणम् कविना यर्थार्थरूपेण प्रदर्शितम्। अनेनैव प्रकारेण 'मृगाधिपः करिभिर्वर्तयते स्वयंहतैः'[16] इत्यत्र सिंहस्य स्वसम्पादिताहारकर्तृत्वं लोकसम्मतं तथ्यं कविना रमणीयतयार्थान्तरन्यासालङ्कारेण वर्णितम्। एवमेव क्रमे 'अचिरांशुविलासचञ्चला ननु लक्ष्मीः'[17] इति लक्ष्म्याः क्षणिकत्वम्, 'स सदा फलशालिनीं क्रियां शरदं लोक इवाधितिष्ठति।'[18] इत्यत्र शरत्काले कृषकाणां कार्यफलप्राप्तिः, 'दीप इवार्थदर्शनम्' इत्यत्र दीपकस्य पदार्थोज्ज्वलकत्वम्, 'समवृत्तिरुपैति मार्दवम्.....' इत्यत्र ऋतुकालानुरूपं सूर्यस्य स्वरूपम्, 'हिनस्ति भूधरं तरुशाखान्तनिघर्षजोऽनलः' इत्यत्र वनदावनलोत्पत्तिहेतुभूततरुशाखाघर्षणम् चादिरूपाः अनेके अवान्तरविषयाः वर्णिताः। एवमेव कविना सर्गेऽस्मिन् अन्येऽपि बहुविधा विषया विविधसन्दर्भेषु वर्णिता दृश्यन्ते।

**भाषा**

भाषिकदृष्ट्या किरातार्जुनीयमहाकाव्यमतीव अर्थगौरवप्रधानमस्ति। तत्र द्वितीयसर्गेऽपि कविना भारविना व्यङ्ग्यप्रधानं वक्रोक्तिप्रधानं च कथनं भीमयुधिष्ठिरयोः संवादमाध्यमेन प्रकटितम्। सर्गादावेव कतिपयश्लोकैर्वचनस्यैव महिमा विस्तारिता कविवरेण्येन। अतः कथने भङ्गिभणितिरूपा वक्रोक्तिः कवेरिष्टा। कविप्रस्तुतपात्रसंवादेषु प्रतिवचनमेव प्रमाणमेव प्रस्तुतम्। भीमसेनस्योक्तौ स्याद्वा युधिष्ठिरोक्तौ स्याद्, तत्र तत्र स्वमतस्थापने दृष्टान्तेन वोदाहरणेन वा प्रामाणिकताङ्गीकृता। श्लेषमयशब्दानां पदावलीनां च संयोगेन काव्ये बौद्धिकतापि कविना प्रस्तुता विलोक्यते -

**परिणामसुखे गरीयसि व्यथकेऽस्मिन्वचसि क्षतौजसाम्।**
**अतिवीर्यवतीव भेषजे बहुरल्पीयसि दृश्यते गुणः।।**[19]

इत्यत्र द्रौपदीवचनस्य औषधेन साकं तुलना कृता भीमसेनेन। उभयोरुपमानोपमेययोः विशेषणं द्व्यर्थकमस्ति। अतोऽत्र श्लेषालङ्कारमयशब्दैरर्थालङ्कारभूतोपमालङ्कारोऽपि चमत्कृतः। एतादृशी भाषा भारविप्रयुक्ता विभात्यत्र। विविधविषयवस्तूनामुदाहरणप्रदर्शनपुरःसरं पात्रकथनप्रस्तावनं भारवेः सर्वोत्कृष्टकवित्वं प्रदर्शयति। आलङ्कारिकभाषया, व्यङ्ग्यार्थयुक्तया शब्दशक्त्या च रञ्जितमिदं काव्यं भारविकीर्तिकलेवरं जीवयितुं सर्वथालम्। स्वल्पया शब्दरचनया, वैदर्भिरीतिप्रधानश्लोकबन्धेन च प्रबन्धितोऽयं द्वितीयसर्गो यद्यपि स्वल्पस्तथापि संवादात्मकभाषाशैल्या नाटकीयत्वं धत्त एव। कुन्तकाचार्य प्रतिपादितम् 'वक्रोक्तिरेव वैदग्ध्यभङ्गी भणितिरुच्यते।'[20] इति लक्षणलक्षितं वक्रोक्तितत्त्वमपि सर्गेऽस्मिन् भारविभारतीमलङ्करोति। 'स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम् ....'[21] इत्यस्मिन् पद्ये भङ्गीपूर्णा भाषा काव्यं नितरां विभूषयति। अत्र नञ्द्वयप्रयोगस्य रमणीयतातिशया वर्तते सहृदयेषु। तथैव उत्तरपक्षभूते युधिष्ठिरकथने कोमलपदावलीनां प्रयोगः, शान्तिवचनैः भीमसेनस्य सान्त्वनम्, शनैः शनैः सहनशीलस्य, धैर्यस्य च स्थापनम् इत्यादिकार्याणि भारविचातुर्यपूर्णभारतीसम्बद्धान्येव सन्ति। प्रसाद-माधुर्यगुणयोः प्रयोगेन द्वितीयसर्गस्य भाषा कोमला मधुरा झगित्यर्थप्रदायिनी च वर्तते। कारणप्रदर्शनपूर्वकमेव कार्यस्य सूचनात्र युधिष्ठिरकथने बहुत्र प्रयोगः प्राप्यते। एतावता महाकविभारविना पात्रानुकूला भाषा संयोजिता प्राप्यते। अतः समष्टितः भाषाप्रयोगकौशलेन महाकविना द्वितीयसर्गस्य चारुता विशेषतो विस्तारितेति वक्तुं नितरां पार्यते।

**ध्वनिः**

ध्वनिश्च काव्यस्य सर्वोत्तमं तत्त्वम्। 'इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः'[22] इति मम्मटेनापि ध्वनिकाव्यस्योत्तमं स्थानं स्वीकृतम्। यथाहानन्दवर्धनः - 'यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ। व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः।।'[23] अर्थात् वाच्यापेक्षया व्यङ्ग्यार्थ प्रधानकाव्यमेव ध्वनिकाव्यमिति। तादृशध्वनितत्त्वदृशा सर्गोऽयं समृद्धो दृश्यते। अत्रापि शब्दानां गाम्भीर्याद्ध्वनितत्त्वं संवलितमवलोक्यते। सर्गादावेव भीमसेनोक्तौ कतिपयश्लोकैः 'द्रौपद्याः कथनं युक्तियुक्तम्' इति ध्वनितं दृश्यते । तत्र तादृशार्थस्य शब्दवाच्यत्वन्तु नास्ति। यथा च-

**क्षययुक्तमपि स्वभावजं दधतं धाम शिवं समृद्धये।**
**प्रणमन्त्यनपायमुत्थितं प्रतिपच्चन्द्रमिव प्रजा नृपम्।।**[24]

इत्यस्मिन् श्लोके चन्द्रमसः स्वरूपवर्णनं विहितम्, ततश्च चन्द्रमसा नृपस्य च साम्यमिवशब्देन कृतम्। उपमालङ्कारस्य रुचिरा छटात्र विलोक्यते। एतद्वर्णनैः पाण्डवानां परिक्षीणत्वं परन्तु पराक्रमतेजसा वर्धमानत्वमित्यादिकं ध्वन्यते। एवमेव 'अगरीयान्न पदं नृपश्रियः (श्लो.14)' इत्यत्र गरिष्ठेन भाव्यमिति ध्वनिः, 'न महानिच्छति भूतिमन्यतः (श्लो.18)' इत्यत्र स्वपराक्रमेणैव ऐश्वर्यं प्राप्तव्यमिति ध्वनिः, 'विदधातु शमं शिवेतरा रिपुनारीनयनाम्बुसन्ततिः (श्लो.24)' इत्यत्र शत्रुविजयरूपो ध्वनिश्चाभिव्यज्यते। एवमेव काव्ये विविधस्थानेषु ध्वनितत्त्वसंयोगो दरीदृश्यते। ध्वनिप्रयोगकौशलेन भारविकवित्वं निकषोपलसंघर्षितं काञ्चनमिव चकासितमनुभूयते।

**अलङ्कारः**

'न कान्तमपि निर्भूषं विभाति वनिताननम्'[25], 'अर्थालङ्काररहिता विधवेव सरस्वती'[26] इत्युक्तिं स्वीकृत्यालङ्कारप्रयोगे किरातार्जुनीयं समृद्धं मनोरमं च काव्यं वर्वर्ति। अत्र अनुप्रासश्लेषादयः शब्दालङ्काराः, उपमार्थान्तरन्यासादयोऽर्थालङ्काराश्च प्राचुर्येण प्रयुक्ताः प्राप्यन्ते। प्रायशः द्वितीयसर्गेऽस्मिन् प्रतिश्लोकमेव कोऽप्यलङ्कारः प्रयुक्त एव भवेत्। अत्र अनुप्रासः, श्लेषः, उपमा, अर्थान्तरन्यासः, दृष्टान्तः, कारणमाला इत्यादयोऽलङ्काराः प्रयुक्ताः सन्ति। तेषां केचनालङ्काराणां स्थितिस्तालिकारूपेणात्र प्रस्तूयते -

| **अलङ्कारनाम** | **सर्गस्थोदाहरणम्** |
|---|---|
| अनुप्रासः | प्रियया मनःप्रियाम् (श्लो.1), ज्वलतस्तव जातवेदसः (श्लो.24), इदमी–गनी–गाशयः (श्लो.28) इत्यादि । |
| श्लेषः | विषमोऽपि विगाह्यते नयः कृततीर्थः... (श्लो.3), अणुरप्युपहन्ति.. प्रकृतिप्रकोपजः(श्लो.51) इत्यादि । |
| उपमा | दक्षतां नियतिं लोक इवानुरुध्यते (श्लो.12), द्विरदं दुष्टमिवोपचक्रमे (श्लो.25), इत्यादि । |
| अर्थान्तरन्यासः | मदसिक्तमुखैः .... (श्लो.18), सहसा विदधीत.. (श्लो.30) इत्यादि । |

| | |
|---|---|
| कारणमाला | विपदोऽभिभवन्त्यविक्रमम्...(श्लो.14),<br>मदमानसमुद्धतं नृपम्... (श्लो.49) इत्यादि। |
| एकावली | शुचि भूषयति श्रुतं वपुः... (श्लो.32) इत्यादि। |
| दृष्टान्तः | अणुरप्युपहन्ति विग्रहः...(श्लो.51) |
| उत्प्रेक्षा | स्वयमर्थ इवाभिवाञ्छितः (श्लो.54) इत्यादि। |
| काव्यलिङ्गम् | किमसामयिकं वितन्वता.....।<br>क्रियते पतिरुच्चकैरपां...(श्लो.40) इत्यादि। |
| अर्थापत्तिः | प्रसहेत रणे तवानुजान् द्विषतां कः शतमन्युतेजसः।<br>(श्लो.23) इत्यादि। |

एतावतालङ्कारप्रयोगकौशलप्रदर्शनं किरातार्जुनीयद्वितीयसर्गस्य सौन्दर्य भूतं विद्यते। एतेनालङ्कारसंयोजनेन महाकविभारविकवित्वं रसिकजनगाह्यंहृदयञ्च जातमित्यनुभूयते। भारविभारतीविभूषयेऽलङ्काराणां योगदानं महनीयतमं सिद्धम्।

**रसः-**

'रस्यते-आस्वाद्यते' इति व्युत्पत्त्या रसशब्दो निष्पद्यते। अतः किरातार्जुनीयद्वितीयसर्गेऽपि रसिकजनस्वादनविषयीभूता रसा अनुस्यूता एव। विशेषतोऽयं सर्गो भीमयुधिष्ठिरसंवादात्मकरूपत्वाद्द्विधा विभक्तो दृश्यते। अत्र भीमसेनोक्तौ सुतरां वीररसो ध्वनितः, स च 'उत्तमप्रकृतिर्वीर उत्साहस्थायिभावकः'[27] इति लक्षणलक्षितः। तथैव युधिष्ठिरोक्तिभागे च सान्त्वनोपदेशत्वात् धृतिनिर्वेदादिभावध्वनिरभिव्यक्तः। भीमसेनोक्तौ प्रस्तुतैर्विषयैरेवोत्साहरूप स्थायी भावः परिपुष्टस्तदनु वीररसोऽभिव्यक्तः। अतो विशेषतः सर्गपूर्वार्धे वीररसः, पश्चार्धे च धृत्यादिभावध्वनिरेवाभिव्यक्त इत्यनुभवितुं शक्यते पाठकजनैः। यथा च भीमोक्तिः-

**कुरु तन्मतिमेव विक्रमे नृप ! निर्धूय तमः प्रमादजम्।**
**ध्रुवमेतदवेहि विद्विषां त्वदनुत्साहहता विपत्तयः।।**
**द्विरदानिव दिग्विभावितांश्चतुरस्तोयनिधीनिवायतः ।**
**प्रसहेत रणे तवानुजान् द्विषतां कः शतमन्युतेजसः।।**[28]

इत्यादिश्लोकैः भीमसेनस्य पराक्रमसंवलितोत्साहभावः स्थायित्वेन वीररसतां प्राप्तः। अतः भीमोद्गारे सर्वत्र वीररसस्यैवाभिव्यङ्जना स्पष्टा।

शृङ्गारादिरसाश्चान्ये शून्यप्रायाः सन्ति सर्गेऽस्मिन्। अन्यत्र च केवलं भावा एव ध्वनिताः। 'क्व चिराय परिग्रहः श्रियां क्व च....'[29] इत्यादियुधिष्ठिरवचनेषु शान्तरसस्य छटा रुचिरा तथापि परिपाकावस्थायां नास्त्ययं रसः। अतः धृत्यादिभावध्वनित्वेन बहुत्र एतादृशी अवस्थावलोक्यते समालोचकैः। समग्रत उच्यते चेत् रसप्रयोगेऽपि भारविकवित्वं न विकलमिति वक्तुं नितरां समर्था वयम्।

भारविविरचितकिरातार्जुनीय महाकाव्य द्वितीय सर्गस्याध्ययनेन महाकवेरस्य कवित्वं स्थालीपुलाकन्यायेनात्र परीक्षितम्। अस्मिन् सर्गे विविधपक्षसम्बद्ध विषयविश्लेषणपुरःसरं कविकवित्वं वीक्षितम्। कथास्थापनरूपेण, संवादप्रयोगदृशा, भाषा-ध्वनि-रसालङ्कारावान्तरविषयस्थापनरूपेणापि भारविकवित्वमवलोकितम्। एतादृग्भिर्बहुभिराधारैरपि महाकविभारवेः किरातार्जुनीयकाव्यस्य द्वितीयसर्गे न काचिन्न्यूनतानुभूतास्माभिः। एषैव प्रतिभाव्युत्पत्त्यभ्यासमत्कवि-काव्यचमत्कारचमत्कृतिरिति 'कविर्मनीषी परिभूः स्वयम्भूः' इत्यर्थगाम्भीर्यवद्वाक्यमपि समर्थयति। सर्वतोभावेन महाकविभारविभारती सर्गेऽस्मिन् ललिता रसिका विलासिनी सती सहृदयानां रमणाय समर्थैवास्तीत्यनुभूयते। अनेनैव भारविकविकवित्वमपि सुदृढं सारवच्च विलोक्यत इति निष्कर्षः।

**सन्दर्भाः -**


1. *रसगङ्गाधरः, प्रथमाननम्।*
2. *किरातार्जुनीयम्, 2/1।*
3. *किरातार्जुनीयम्, 2/53।*
4. *किरातार्जुनीयम्, 2/16।*
5. *किरातार्जुनीयम्, 2/20।*
6. *किरातार्जुनीयम्, 2/36।*
7. *'अधितिष्ठति लोकमोजसा स विवश्वानिव मेदिनीपतिः।' किरातार्जुनीयम्, २/३८।*
8. *शरदभ्रचलाश्चलेन्द्रियैः... ।' किरातार्जुनीयम्, 2/39 ।*
9. *हरिदश्वः कमलाकरानिव ।' किरातार्जुनीयम्, 2/46 ।*
10. *किरातार्जुनीयम्, 2/59।*
11. *किरातार्जुनीयम्, 2/3 ।*

12. *किरातार्जुनीयम्, 2/4 ।*

13. *किरातार्जुनीयम्, 2/6 ।*

14. *किरातार्जुनीयम्, 2/11 ।*

15. *किरातार्जुनीयम्, 3/12 ।*

16. *किरातार्जुनीयम्, 2/18 ।*

17. *किरातार्जुनीयम्, 2/19 ।*

18. *किरातार्जुनीयम्, 2/31 ।*

19. *किरातार्जुनीयम्, 2/4 ।*

20. *वक्रोक्तिजीवितम्, 1/10 ।*

21. *किरातार्जुनीयम्, 2/27 ।*

22. *काव्यप्रकाशः, 1/4 ।*

23. *ध्वन्यालोकः, 1/13 ।*

24. *किरातार्जुनीयम्, 2/11 ।*

25. *काव्यालङ्कारः, 1/13 ।*

26. *अग्निपुराणम्, 344/2 ।*

27. *साहित्यदर्पणः, 3/232 ।*

28. *किरातार्जुनीयम्, 2/22-23 ।*

29. *किरातार्जुनीयम्, 2/39 ।*

●●●

# 21

# कादम्बरीकथामुखस्थपौराणिकविषयविचारः

*आशासिंहरावत*

गद्यकाव्यबन्धनपेशलेन कविवरेण बाणभट्टेन ग्रथिता कादम्बरी कथा सर्वविषयवैविध्यपरिलसिता कविप्रतिभाप्रभाप्रकाशिता भावकहृदयग्राहिणी काव्यकृतिर्विद्यते। अत्र सर्वशास्त्रज्ञेन सर्वजगत्तत्त्वज्ञानकौलशेन बाणभट्टेन - 'बाणोच्छिष्टं जगत्सर्वम्' इत्युक्तिः सार्थीकृता। हर्षचरित- पार्वतीपरिणय- मुकुटताडितादि- ग्रन्थानां ग्रन्थकाररूपेण वाणभट्टस्य यद्वैदुष्यं परिचितम्, तच्छतगुणीभूतं यशः कादम्बरीकथाजन्यमेव प्रसरति जगति। अत एव - 'कादम्बरीरसज्ञानामाहारोऽपि न रोचते' इति सूक्तिः प्रचलिता। तादृशविविधविद्या विभूषितेन वात्स्यायनवंशसमुद्भवेन भत्सुपौपत्र-कुबेरपौत्रार्थपतिपुत्रेण बाणभट्टेन ग्रथिता कादम्बरीकथा सर्वजनप्रिया सर्वशास्त्रान्तर्गर्भा श्लेषोपमादीपकाद्य- लङ्कारालङ्कृता माधुर्योजः प्रसादगुणत्रयविभूषिता, गौणी-वैदर्भि- पाञ्चाली- लाट्यादिरीतिसौन्दर्यशोभना विद्वन्मनोहारिणी वरीवर्तीत्यत्र न कश्चित् सन्देहपङ्ककलङ्कः।

तादृशकथायाः पौराणिकविषयगुम्फनमद्वितीयं प्रतिभाति चिन्तकानाम्। तत्र विविधप्रसङ्गेषु पौराणिकविषयवस्तूनामुदाहरणमुखेनाथवोपमान कल्पनेनैवोल्लेखः कृतो विलोक्यते पाठकैः। तत्र नायकादीनां कार्यानुरूपं घटनानुरूपं वा पौराणिकविषयोत्थापनं परिकल्पितम्। पुराणलक्षणञ्च शास्त्रेष्वित्थं विहितं विलोक्यते -

**सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।**
**वंश्यानुचरितं चौव पुराणं पञ्चलक्षणम्।।**[1] इति।

इति पञ्चलक्षणलक्षितानां पुराणानां विषयाः सन्त्यनेके। तत्र

भगवतोऽनेकावताराणां वर्णनम्, सर्गप्रतिसर्गादीनां मन्वन्तराणां वंशानां वश्यानुचरितानां च वर्णनं प्राप्यते। अत एव **'पुराणं पञ्चलक्षणम्'**[2] इति लक्षणं ग्रन्थान्तरेऽपि प्रसिद्धम्। **'पुराणे प्रतनप्रत्नपुरातनचिरन्तनाः'**[3] इत्यनुसारं 'पुराण'-शब्देन पुरातनघटनासम्बद्धकथानां समवायरूपो ग्रन्थो बोध्यते। अतः सदैव रमणीयत्वादुक्तिमाधुर्याच्च 'पुरा अपि नवम्' इति विग्रहेणापि पुराणशब्दं निष्पादयन्ति शब्दविपश्चितः । यत्किमपि भवेद्, पुराणस्य विषयाः हृदयङ्गमा रमणीया एव भवन्तीति नास्ति शङ्कालेशः। तेषामेव विषयाणां साहित्यिकग्रन्थभूतायां कादम्बरीकथायां ग्रथनं नितान्तमेव रमणीयतावहं भवत्येव ।

कादम्बरीकारेण कथाप्रारम्भमङ्गलाचरणे एव त्रिगुणात्मकब्रह्मणः नमस्काररूपं मङ्गलमाचरितम्। तत्र च पुराणप्रतिपादितं सृष्टि-स्थिति-लयात्मकं कृत्यं सङ्केतितम्। पुराणेषु सगुणब्रह्मण एव चर्चा भवति, अत्रापि तस्यैव ब्रह्मविष्णुरुद्ररूपस्यैव यथाकार्यं त्रिधा विभक्तस्य परमात्मनश्चर्चा कृतास्ति -

**'अजाय सर्गस्थितिनाशहेतवे त्रयीमयाय त्रिगुणात्मने नमः ।'**[4] इति।

अत्र रजःसत्त्वतमोगुणात्मभिः ब्रह्मविष्णुमहेश्वरस्वरूपैः सृष्टिस्थितिप्रलयानां कर्ता अजः त्रयीमयः त्रिगुणात्मा ईश्वरः प्रतिपादितः । स च श्रीमद्भागवतेऽपि प्रतिपादितः -

**'जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्'**[5] इति।

एवमेव कादम्बर्या मङ्गलाचरणे - **'जयत्युपेन्द्रः स चकार दूरतः'**[6] इत्यत्र नरसिंहावतारकृतहिरण्यकशिपूरुविदारणं पौराणिकं सङ्केतितम् कविना। **'विषं महाहेरिव यस्य दुर्वचः'**[7] इत्युपमानेन समुद्रमन्थन जन्यसर्पराजमुखोद्गीर्णविष विषयिणी पौराणिकी कथा स्मारिता, 'न **दुर्जनस्यार्करिपोरिवामृतम्'** इत्यत्रमृतपान घटना सङ्केतिता तथा च **'हरिर्महारत्नमिवातिनिर्मलम्'**[8] इत्यत्र भगवतो विष्णोः कौस्तुभधारणप्रसङ्गः संयोजितः। तथैव - **हिरण्यगर्भो भुवनाण्डकादिव क्षपाकरः क्षीरमहार्णवादिव। अभूत् सुपर्णो विनतोदरादिव द्विजन्मनामर्थपतिः पतिस्ततः।।**[9] इति। अत्र हिरण्यगर्भस्य भुवनाण्डादुत्पत्तिः, क्षीरसागराच्चन्द्रमस उत्पत्तिस्तथा च विनतागर्भाद् गरुडस्योत्पत्तिरिति विषयाः पौराणिका एवोल्लेखिताः। चन्द्रोत्पत्तिप्रसङ्गे स्कन्दपुराणे -

**तस्मिंस्तु मथिते देवि प्रयत्नात्केशवस्य च।**
**प्रसन्नात्मा समुत्पन्नः सोमः शीतांशुरुज्वलः।।**[10] इति।

एवमेवान्ये विषया अपि पुराणेषु प्रतिपादिता एव सन्तीत्यत्र संक्षिप्यते।

तथा च शूद्रकवर्णनप्रसङ्गे - **'चक्रधर इव करकमलोपलक्ष्यमाण शङ्खचक्रलाञ्छनः', 'हर इव जितमन्मथः', 'गुह इवाप्रतिहतशक्तिः', 'कमलयोनिरिव विमानी तराजहंसमण्डलः', 'जलधिरिव लक्ष्मीप्रसूतिः', 'गङ्गाप्रवाह इव भगीरथपथप्रवृत्तः', 'वैनतेय इव विनतानन्दजननः', 'वैन्य इवचाप कोटिसमुत्सारितकुलाचलः'**[11] इत्यादिषु उपमास्थापनसन्दर्भेषु महाकविना विविधप्रसङ्गान्तर्गतानां पौराणिकविषयाणां समुल्लेखो व्यधायि। एतस्मादपि ज्ञायते यत् - कविरयं सर्वपुराणाभिज्ञः सर्वशास्त्रभिज्ञश्चेति। अत्र विष्णु-शिव-ब्रह्म-कार्तिकेय-लक्ष्मी-गरुडादीनां पुराणवर्णितस्वरूप-कर्मादीनां साम्येन राज्ञः शूद्रकस्य वर्णना कृतास्ति। अतः पौराणिकविषयाणामुपमानस्थापने कविरुचिः प्रशस्ता। **'नाम्नैव यो ...... विक्रमत्रयायासितभुवनत्रयं जहासेव वासुदेवम्'**[12] इत्यत्र वाणभट्टेन भगवतो विष्णोः वामनावतारकृतपादत्रयमापनप्रसङ्गे बलिदमनविषयः पौराणिकः सङ्केतितः। एवंविधानां भगवदवतारसम्बद्धविषयवस्तूल्लेखनपुरःसरं घटनावर्णनं पात्रचरित्रचित्रणं च वाणस्य रुचिर्दृश्यते। शूद्रकवर्णनप्रसङ्गे एव - **'यश्च मनसि धर्मेण....प्रकटितविश्वरूपा तेरनुकरोति भगवतो नारायणस्य'**[13] इत्यत्रापि विश्वरूपा कृतिधारिणो नारायणस्य पुराणसम्मतं स्वरूपं प्रतिपादितम्। पुराणवर्णितयुगत्रये सत्ययुगस्यापि प्रसङ्गः कविनोद्भावितः - **'कलिकालभय पुञ्जीभूतकृतयु गानुकारिणी'**[14] ति। श्रीमद्भागवतमहापुराणस्य त्रिशङ्कुस्वर्गभ्रंसनप्रसङ्गो[15]ऽपि कविना चाण्डालकन्यकावैशिष्ट्यवर्णनप्रसङ्गे स्वग्रन्थे संयोजितः - **'सुरलोक मारोहतस्त्रिशङ्कोरिव कुपितशतमखहुङ्कारनिपातिता राजलक्ष्मीः'**[16] इति। तथा च चाण्डालकन्यकया सभामण्डपं प्रविश्य दृष्टस्य शूद्रकस्य वर्णनप्रसङ्गे विविधपौराणिकसन्दर्भाणां समुल्लेखो विहितः कविना - **'अशनिभयपुञ्जित कुलशैलमध्यगतमिव कनकशिखरिणम्', 'अचिरमृदितमधुकैटभरुधिरारुणेन हरिमिवारुयुगलेन विराजमानम्', 'लग्नहरहुताशमिव मकरध्वजम्'**[17] इति। चाण्डाल कन्यावर्णनप्रसङ्गेऽनेकवारं पौराणिककथासम्बद्धाः विषयाः प्रस्तुता दृश्यन्ते यथा -

**'असुरगृहीतामृताहरण तकपटपटुविलासिनीवेशस्य .... हरेरिवानुकुर्वतीम्'** इति प्रसङ्गस्तु श्रीमद्भागवतमहापुराणेऽपि वर्णितो यथा - **'योषिद्रूपमनिर्देश्यं दधार परमाद्भुतम्'**[18] अर्थात् भगवता विष्णुना मोहिनीरूपं धृतमिति तस्य प्रयोजनं तु दैत्यगृहीतामृतस्याहरणमेवास्ति। एवमेव -

**'ईशानुचरितकिरातवेशामिव भवानीम्', 'कुपितहरहुताशनदह्यमानमदन धूममलिनी तामिव रतिम्', 'अचिरमृदितमहिषासुर ..... कात्यायनीम्', 'श्रियमिव हस्तस्थितकमलशोभाम्', 'यक्षाधिपराजलक्ष्मीमिवालकोद्भासिनीम्'**[19] इति।

वैशम्पायनशुकस्य वाणीश्रवणानन्तरमाश्चर्यभूतं राजानां प्रति कुमारपालितनाम्नो मन्त्रिणः उक्तिर्यथा - **'अग्निशापात्त्वस्फुटालापता शुकानामुपजाता, करिणाञ्च जिह्वापरिवृत्तिः।'**[20] इत्यत्र पुराणप्रतिपादिताग्निशाप- प्रसङ्गः समुत्थापितः। अस्मिन् जिह्वापरिवृत्तिविषये महाभारते यथा-

**शशाप ज्वलनः सर्वान् द्विरदान् क्रोधमूर्च्छितः।।**

**प्रतीपा भवतां जिह्वा भवित्रीति भृगूद्वह।**[21]

तथैव विन्ध्याटवीवर्णनसन्दर्भे कविना विविधपौराणिकसन्दर्भः समायोजितः -

पुराणेषु यमराजस्य वाहनत्वेन महिषो वर्णितस्तथा च मृत्युस्तत्र सदा सन्निहितो भवति। एतदेव तथ्यं कादम्बरीकथायामपि वाणभट्टेन संयोजितम् - **'प्रेताधिपनगरीव सदासन्निहितमृत्युभीषणा महिषाधिष्ठिता च'**। तथा च भगवत्याः कात्यायन्याः मार्कण्डेयादिपुराणावर्णित-स्वरूपानुसारमत्रप्युल्लेखो लभ्यते - **'कात्यायनीव प्रचलितखड्गभीषणा रक्तचन्दनालङ्कृता च'**। एवमेव प्रलयकालस्य भगवच्छिवताण्डवप्रसङ्गानुरूपमत्र वर्णितम् - **'कल्पान्तप्रदोषसन्ध्येव प्रनृत्तनीलकण्ठा पल्लवारुणा च'** । अमृतमन्थन सम्बद्धभागवतपुराण-प्रतिपादितकथाया अप्युल्लेखोऽत्रास्ति, एतत्प्रसङ्गे लक्ष्मी-कल्पद्रुम-मदिरोत्पत्तिः वर्णिता - **'अमृतमथनवेलेव श्रीद्रुमोपशोभिता वारुणीपरिगता च'**। पार्वत्याः हिमगिरिपुत्रीत्वेन वर्णनम्, शिवसङ्गतिः, सिंहवाहनत्वमपि सर्वमत्र पौराणिकं वस्तु निर्दिष्टम् - **'गिरितनयेव स्थाणुसङ्गता मृगपतिसेविता च'**। तथा च रामायण सम्बद्धकथावस्तु जानक्याः संयोजितम् - **'जानकीव प्रसूतकुशलवा निशाचर परगृहीता च'**। एवमेव विविधविषयाणां चर्चात्र विद्यते। यथा - **'प्रलयवेलेव महावराहद्रंष्टासमुत्खातधरणिमण्डला', 'दशमुखनगरीव तुङ्गशालाकुला',**। तथैव श्रीमद्भागवते वराहावतारवर्णनप्रसङ्गे भगवतो विष्णोः तमालनीलवर्ण उल्लेखितः।[22] तदनुसारमेवात्रापि कविनोल्लिखितम् - **'क्वचिन्नारायणमूर्तिरिव तमालनीला'**। महाभारतेऽर्जुनस्य नामापि कपिध्वज इति उल्लेखितम्, यतो हि

अर्जुनस्य रथस्थपताकायां वानरस्याकृतिरुल्लिखिता दृश्यते, सः प्रसङ्गः कविनात्रापि उद्धृतः - **'क्वचित् पार्थरथपताकेव वानराक्रान्ता'**। एवं विराटनगरस्य कीचकस्यापि - **'विराटनगरीव कीचकशताकुला'**। व्याधानुगमनप्रसङ्गस्तु शिवमहिम्नस्तोत्रेऽपि समायाति[23] - **'व्याधानुगम्यमानतरलतारकमृगा'**[24] इति। एवमेवागस्त्याश्रमवर्णनप्रसङ्गेऽपि विविधपौराणिकविषयवस्तूनामुल्लेखो विद्यते-

**'सुरपतिप्रार्थनापीतसकलसागरसलिलस्य....महामुनेरगस्त्यस्य..'**[25] इत्यत्र महामुनेरगस्त्यस्य सागरपानस्य, विन्ध्यगिरिणा कृतनमस्कारस्य, जठरानलेन जीर्णभूतवातापिदानवस्य, स्वर्गलोकान्निपातितनहुषस्य च अगस्त्यसम्बद्धा कथा रमणीयतया संयोजिता। अस्मिन्नेव अगस्त्याश्रमवर्णनप्रसङ्गे च दशरथवचनमनुपालयतो भगवतो रामस्यापि पञ्चवटीसम्बद्धस्तथा विविधदिनचर्यासम्बद्धा वृत्तान्ताः परिवर्णिताः।[26] अनेनैव प्रकारेण पम्पासरोवरवर्णनप्रसङ्गे भागवत पुराणसम्बद्ध आदिवराहकृतपृथ्व्युद्धारणप्रसङ्गस्तथा च रामायणसम्बद्ध सुग्रीव कृताचरणप्रसङ्गश्च कविनात्र सुष्ठु समायोजितः - **'आदिवराहसमुद्धृतधरामण्ड स्थानमिव जलपूरितम्', 'प्रतिदिनमृष्यमूकवासिना सुग्रीवेण...'**[27] , इति।

एवं शाल्मलीवृक्षवर्णनप्रसङ्गे - **'प्रलयकालताण्डव प्रसारितभुजसहस्रमुडुपतिशेखरमिव', 'दुर्योधन इवोपलक्षितशकुनिपक्षपातः', 'नलिननाभ इव वनमालोपगूढः'**[28] इत्यादिरूपेण प्रलयकालस्थमहादेवस्य ताण्डवनृत्यस्योल्लेखः, महाभारतस्य दुर्योधनशकुन्यादीनां व्यवहारः, भगवतः विष्णोः पुराणप्रतिपादस्वरूपम्, इत्येते विषयाः समुल्लेखिताः। शुकजन्मवृत्तान्तप्रसङ्गेऽपि कादम्बर्यां बलरामस्य कालिन्दीकर्षणप्रसङ्गः सुष्ठु स्मृतो यथा - **'मदकलबलभद्र हलमुखात्क्षेप... कलिन्दकन्यामिव दर्शयन्तः'**[29] इति।

शबरसेनापतिवर्णने महाभारत-श्रीमद्भागवत-विष्णुपराणादीनां कथासम्बद्धाः विषया उदाहरणरूपेण प्रस्तुता विद्यन्ते। कविना बाणभट्टेन समस्तपौराणिकविषयाणामस्मिन्नेव ग्रन्थे यथोचितरूपेण समायोजना कृता दृश्यते। महाभारतवर्णितस्य एकाचक्रानगरीस्थितस्य वकासुरस्य उल्लेखः यथा - **समीपे नगरस्यास्य बको वसति राक्षसः। ईशो जनपदस्यास्य पुरस्य च महाबलः।।**[30] इति । एतदनुसारमेवात्रापि कादम्बर्यामुल्लेखो यथा -**'बकराक्षसमिव गृहीतैकचक्रम्'**। एवमेव नागशत्रुभूतस्य गरुडस्य स्वरूपं महाभारतानुसारमेवात्र प्रस्तुतम्[31]-

**'अरुणानुजमिवोद्धृतानेकमहानागदशनम्'** इति। भीष्मशिखण्डिनोः पारस्परिक शत्रुता, मानसवेगयुक्तस्य देवयोनिविशेषस्य विद्याधरस्य वर्णनम्, पराशरमत्स्यगन्धयोः उल्लेखः, भीमपुत्रस्य घटोत्कचस्य स्मरणञ्च कादम्बर्यां शोभनतया कृतं विलोक्यते। यथा -

**'भीष्ममिव शिखण्डशत्रुम्', 'विद्याधरमिव मानसवेगम्', 'पराशरमिव योजनगन्धानुसारिणम्', 'घटोत्कचमिव भीमरूपधारिणम्', 'हिरण्याक्षदानवमिव महावराहदंष्ट्राविभिन्नवक्षःस्थलम्', 'अम्बिकात्रिशूलमिव महिषरुधिरार्द्रकायम्',**[32] इति। हारीतवर्णनसन्दर्भे कादम्बर्यां राहुकृतसोमग्रासस्य प्रसङ्गः समायातः। तथैव महाभारतवर्णित अश्वत्थाम-कृपयोः, वरुणस्य जलावसस्य रुचिकरः प्रसङ्गोऽत्रापि काव्ये गुम्फितो दृश्यते - **'राहुरिवास दास्वादितसोमः', 'द्रौणिरिव कृपानुगतः', 'वरुण इव कृतोदवासः'।** तथैव भगीरथकृतगङ्गानयनस्य घटनामपि काव्ये कविना सुष्ठु संयोजितम् - **'भगीरथ इव दृष्टगङ्गावतारः'**[33]

जाबाल्याश्रमवर्णने रामायणसम्बद्धमारीचमायामृगधारणकथापि कादम्बर्यां योजिता कविना। स प्रसङ्गः रामायणे इत्थमुल्लेखितम् - **स रावणवचः श्रुत्वा मारीचो राक्षसस्तदा मृगो भूत्वाऽऽश्रमद्वारि रामस्य विचचार ह। स तु रूपं समास्थाय महदद्भुतदर्शनम्।।**[34] **इति।**

एवमेवात्रापि - **'मारीचमायामृगावलूनप्ररूढवीरुद्दलाभिः ... दाशरथिचापकोटिक्षतकन्दगर्तविषमिततलाभिः'** इति। एवमेव भगवतो विष्णोः नृसिंहवराहरूपधारणप्रसङ्गोऽपि कादम्बर्यामुल्लेखितः - **'असुरारिमिव प्रकटितनरहरिवराहरूपम्'** इति। तथैव श्रीमद्भागवते वर्णितस्य कपिलदेवस्य सांख्यतत्त्वप्रतिपादनप्रसङ्गोऽत्र वाणभट्टेन समायोजितः - **'सांख्यमिव कपिलाधिष्ठितम्'** इति। मथुरावनस्थ धेनुकासुरस्य प्रसङ्गो यथा - **'मथुरोपवनमिव बलावलीढदर्पितधेनुकम्'** इति। एवं हनुमता अक्षकुमारहननप्रसङ्गो रामायणानुसारमत्रपि वर्णितो यथा - **'हनूमन्तमिव शिलाशकलप्रहार-सञ्चूर्णिताक्षास्थिसञ्चयम्'** इति। तथैव महाभारतानुसारमर्जुनस्य खाण्डववनेऽग्नि-प्रज्वालनकार्यमत्रप्युल्लेखितम् - **'खाण्डवविनाशोद्यतार्जुनमिव प्रारब्धाग्निकार्यम्'** इति। तथा शकुनिवधस्यापि प्रसङ्गः - **'महाभारते शकुनिवधः'** इत्यनया पदावल्या कृता दृश्यते। अनेनैव प्रकारेण पुराणे वायुकथनप्रसङ्गोऽपि जाबाल्याश्रम वर्णनसन्दर्भे कादम्बर्यामुल्लेखितः कविना - **'पुराणे वायुप्रलपितम्'**[35] इति।

जाबालिवर्णनसन्दर्भेऽपि पौराणिकविषयवस्तूनामुल्लेखः कृतो दृश्यते। अत्र बृहस्पतिकचयोः, शन्तनुभीष्मयोः पारस्परिकसम्बन्ध उल्लेखितो वर्तते। तथा च पशुपतेः भस्मशुभ्रशरीरस्यापि चर्चा दृश्यते - **'बृहस्पतिमिवाजन्मवर्धितकचम्', 'शन्तनुमिव प्रियसत्यव्रतम्', 'पशुपतिमिव भस्मपाण्डुरोमाश्लिष्टशरीरम्'**[36] **इति।**

एवम्प्रकारेण कादम्बरीकथायाः कथामुखे महाकविबाणभट्टेन विविधपुराणानां महाभारतादीनां च ग्रन्थानां कथाप्रसङ्गान् समादाय यथोचितं संयोजनं कृतं दृश्यते। अत्र विविधघटनावर्णनसन्दर्भे, परिवेशचित्रणक्रमे च पौराणिकविषयवस्तूनां प्रतिबिम्बस्थापनमुदाहरप्रदर्शनं वा कृतं विलोक्यते। एतच्च महाकवेर्बाणस्य पुराणादिग्रन्थनैपुण्यमेव प्रयोजकमस्य प्रयोगस्य।

कादम्बरीकथा संस्कृतसाहित्यसमुपासकानां सहृदयानां रसनिःस्यन्दिनी रुचिरा कविरचना विद्यते। यस्यास्वादस्वादज्ञाः भावुकाः विषयान्तरं न कामयन्त इत्यस्य वैलक्षण्यम् - 'कादम्बरी रसज्ञानामाहारोऽपि न रोचते' इति। अत एव सर्वजगद्विषयग्रथनचतुरेण बाणभट्टेन ग्रथितेऽस्मिन् ग्रन्थे को विषयो न चर्चितो भवेत् खलु ? अत्र हि विविधेतिहासशास्त्राणां पुराणानां रामायणादिकाव्यानां च विषयाः उल्लेखिताः सन्ति। अनेन प्रयोगेण सर्वजगतो बाणोच्छिष्टता सिद्धयत्येव। अस्य ग्रन्थस्य मङ्गलाचरणादारभ्य समग्रेऽपि कथामुखे श्रीमद्भागवतादिपुराण-प्रतिपादितानां विविधघटनापरिघटनादिविषयणां सोपपत्तिक उल्लेखो विद्यते। बाणकल्पना च राघवबाणवदभीष्टलक्ष्यभेदिका सर्वगामिनी उपलक्षतेऽत्र काव्ये। अतः पौराणिकप्रसङ्गोल्लेखे बाणभट्टेन कापि कदर्यतात्र न स्वीकृता। सर्वतोभावेन महाकविना कादम्बरीकाव्ये परिवेशानुरूपं वर्णविषयानुरूपं वा यथोचितं सुष्ठु पौराणिकविषयवस्तूनां संयोजनं कृतं वर्तते इत्यत्र न कोऽपि सन्देहलेशः।

**सन्दर्भाः -**


1. *वायुपुराण, प्रक्रियापादः, अ.4/श्लो.11 । पृ. 18।*
2. *अमरकोशः, शब्दवर्गः।*
3. *अमरकोशः, तृतीयकाण्डः, विशेष्यनिघ्नप्रकरणम्।*
4. *कादम्बरी, मङ्गलाचरणम्, श्लो. 1।*
5. *श्रीमद्भागवतमहापुराणम्, 1/1/1।*

6. कादम्बरी, मङ्गलाचरणम्, श्लो. 2।
7. कादम्बरी, मङ्गलाचरणम्, श्लो. 5।
8. कादम्बरी, मङ्गलाचरणम्, श्लो. 7।
9. कादम्बरी, मङ्गलाचरणम्, श्लो. 13।
10. स्कन्दमहापुराम्, 5/2/26/28।
11. कादम्बरी, कथामुखम्, शूद्रकवर्णनम्, पृ. 12-13।
12. कादम्बरी, कथामुखम्, शूद्रकवर्णनम्, पृ. 14।
13. कादम्बरी, कथामुखम्, शूद्रकवर्णनम्, पृ. 12-13।
14. कादम्बरी, कथामुखम्, शूद्रकवर्णनम्, पृ. 18।
15 सशरीरो गतः स्वर्गमद्यापि दिवि दृश्यते।
पातितोऽवाक्शिरा देवैस्तेनैव स्तम्भितो बलात्।। श्रीमद्भागवतमहापुराणम्, 9/7/6।
16. कादम्बरी, कथामुखम्, शूद्रकवर्णनम्, पृ. 24।
17 कादम्बरी, कथामुखम्, शूद्रकवर्णनम्, पृ. 25-29।
18. श्रीमद्भागवतमहापुराणम्, 8/8/41।
19. कादम्बरी, कथामुखम्, चाण्डालकन्यावर्णनम्, पृ. 31-36।
20. कादम्बरी, पृ. 41।
21. महाभारतम्, अनुशासनपर्व, 85/35।
22. तमालनीलं सितदन्तकोट्या क्ष्मामुत्क्षिपन्तं गजलीलयाङ्ग। प्रज्ञाय बद्धाञ्जलयोऽनुवाकै र्विरिञ्चिमुख्या उपतस्थुरीशम्।। श्रीमद्भागवत महापुराणम्, 3/13/33।
23. प्रजानाथं नाथः 0। शिवमहिम्नःस्तोत्रम्, श्लो. 22।
24. कादम्बरी, पृ. 57-61।
25. कादम्बरी, पृ. 62-63।
26. कादम्बरी, पृ. 64।
27. कादम्बरी, पृ. 68-70।
28. कादम्बरी, पृ. 72-73।
29. कादम्बरी, पृ. 75।
30. महाभारतम्, आदिपर्व, 159/3।

31. ततः सुपर्णः परमप्रहर्षवान् अहीनकीर्तिर्विनतामनन्दयत्।। महाभारतम्, आदिपर्व, 34/25।

32. कादम्बरी, पृ. 96-98।

33. कादम्बरी, पृ. 113-115।

34. रामायणम्, अरण्यकाण्डम्, 42/14-15।

35. कादम्बरी, पृ. 120-128।

36. कादम्बरी, पृ. 134-135।

●●●

# 22

# अभिनन्दकृतः कादम्बरीकथासारः, संक्षिप्तीकरण–प्रक्रिया, साहित्यिक–महत्त्वं, आलोचनात्मकविश्लेषणं च

*खालिद् हसन् अब्बासी*

अभिनन्दकृतःकादम्बरीकथासारः संस्कृतसाहित्ये संक्षिप्तीकरणकौशलस्य उत्कृष्टमुदाहरणं वर्तते। एषा कृति बाणभट्टकृतायाः कादम्बर्याः जटिलवाक्यरचनां, दीर्घवर्णनं, गूढदर्शनतत्त्वानि च सरलतया पठनीयरूपेण प्रस्तौति। अस्य शोधपत्रस्य मुख्यलक्ष्यं रचनायाः साहित्यिक-शैलीगत-आलोचनात्मक-च पक्षानां विश्लेषणं कर्तुमस्ति। प्रथमखण्डे रचयितुरभिनन्दस्य साहित्यिकव्यक्तित्वं कृतित्वं च अध्ययनं कृतम्। विद्वतां मतानुसारं, अभिनन्दः केवलं संक्षेपकः न भवति, अपितु रचनात्मकः पुनर्निर्माता इव, यः मूलकथायाः आत्मानं सौंदर्यं च अक्षुण्णं धारयन् तं सरलरूपेण प्रस्तौति। द्वितीयखण्डे मूलकादम्बर्याः विशेषताः – काव्यात्मकगद्यं, दीर्घवाक्यसंरचना, वर्णनात्मकता, पात्रमनोविश्लेषणं, दर्शनतत्त्वानि च – विस्तरेण निरूपिताः। अनन्तरं कथासारस्य संक्षिप्तीकरणप्रक्रियायाः विश्लेषणं कृतम्, यत्र शैलीगतसरलीकरणं, वर्णनभारस्य केपाञ्चन विदुषां मते, संवादसंक्षेपः, छन्दानां न्यूनप्रयोगः, कथानकसंरचना च उल्लिखिताः। तृतीयखण्डे कथानकस्य प्रस्तुतिः आलोचनात्मकमूल्याङ्कनं च कृतम्। चन्द्रापीडः, कादम्बरी, पुण्डरीकः, महाश्वेता इत्यादीनां प्रेमः, तपः, पुनर्जन्म, परिणय इत्यादीनि केन्द्रीयतत्त्वानि समीक्ष्यन्ते। आलोचनात्मकदृष्ट्या सौंदर्यं सरलतायाः च उत्कृष्टं समतोलं दृश्येते, यद्यपि किञ्चिद्विद्वतां मतानुसारं बाणभट्टस्य काव्यगहनत्वस्य अंशः लुप्तः भवति। चतुर्थखण्डे कथासारस्य संस्कृतसाहित्येतिहासे स्थानं समकालीनप्रासंगिकता च निर्दिष्टा। एषा कृतिः केवलं शिक्षार्थिनां शोधकर्तृणां च पठनीया न, अपितु

आधुनिकसाहित्यिकाध्ययने, अनुवादे, वैश्विकसन्दर्भे च महत्त्वपूर्णं योगदानं दातुमर्हति।

संस्कृतसाहित्ये गद्यकाव्यपरम्परा, तस्याः समृद्धिः, सौंदर्यबोधः, वैविध्यं च कारणेन विश्वविख्याता वर्तते। अस्यां परम्परायां कादम्बर्याः स्थानं विशेषं भवति। बाणभट्टकृता एषा महाकृतिः न केवलं गद्यकाव्यस्य उत्कृष्टं उदाहरणं, अपितु एषा भारतीयदर्शनं, मनोविज्ञानं, काव्यशास्त्रं च अद्वितीयसङ्गमेन प्रदर्शयति। विद्वद्भिः उक्तं यत् कादम्बरी संस्कृतसाहित्ये गद्यकाव्यस्य पराकाष्ठा इव प्रतिष्ठिता (उपाध्यायः, 2005, पृ. 245)। तथापि एतस्याः जटिलवाक्यरचना, दीर्घवर्णनं, बिम्बात्मकशैली च साधारणपाठकस्य कृते दुष्करं भवति। अतः संस्कृतसाहित्ये संक्षिप्तीकरणपरम्परा विकसिता, यस्य उत्कृष्टमुदाहरणं अभिनन्दकृतं कादम्बरीकथासारं वर्तते। एषा रचना केवलं मूलकादम्बर्याः संक्षिप्तरूपं न भवति, अपितु स्वतन्त्र साहित्यिककृतिरूपेण अपि प्रतिष्ठिता। अभिनन्दः मूलकथायाः आत्मानं, सौंदर्यं, दर्शनगहनत्वं च अक्षुण्णं धारयन् तं सरलं, प्रवाहमयं, पठनीयं च रूपं दत्तवान्। अस्य शोधपत्रस्य मुख्यं लक्ष्यं भवति अभिनन्दस्य संक्षिप्तीकरणप्रक्रियायाः, रचनात्मकदृष्टेः, कादम्बरीकथासारस्य साहित्यिक महत्त्वस्य च आलोचनात्मकविश्लेषणं कर्तुम्। तदनन्तरं मूलकादम्बर्याः कथासारस्य च तुलनात्मकाध्ययनं कृत्वा संक्षिप्तीकरणकलां अवगमयितुम्। संस्कृतसाहित्यस्य इतिहासे गद्यकाव्यं प्राचीनकालादेव विकसितं, यत्र बाणभट्टस्य कादम्बरी विशेषं स्थानं दधाति। एषा कृति सप्तमशताब्ध्यां रचिता, किन्तु तस्य जटिलता-कारणेन बहवः पाठकाः तां पूर्णरूपेण पठितुं न शक्नुवन्ति। अतः संक्षिप्तीकरणस्य आवश्यकता उद्भूतास्ति। अभिनन्दः नवमशताब्ध्यां एतां कलां उन्नतावस्थायां नीतवान्। तस्य कथासारः न केवलं संक्षेपः, अपितु मूलकृतेः सौंदर्यस्य पुनारचना इव भवति। विद्वान् हरिनारायण अपराजितः उक्तवान् – ''अभिनन्दस्य कादम्बरीकथासारः केवलं संक्षेपणं नास्ति, अपितु रचनात्मकपुनर्जननं, यस्मिन् भाषासादृश्यता कथासमीक्षा च उत्कृष्टतया समन्विता'' (अपराजितः, 2002, पृ. 112)। अस्मिन् शोधपत्रे प्रथमं बाणभट्टकृतायाः कादम्बर्याः स्वरूपं महत्त्वं च निरूप्यते। अनन्तरं अभिनन्दस्य व्यक्तित्वं, कथासारस्य पृष्ठभूमिश्च विवेच्यते। ततः संक्षिप्तीकरणप्रक्रियायाः विस्तारेण विश्लेषणं, कथानकस्य प्रस्तुतिः आलोचनात्मकविश्लेषणं च भवति।

**संस्कृतसाहित्ये संक्षिप्तीकरणपरम्परा**

संस्कृतसाहित्ये संक्षिप्तीकरणपरम्परा प्राचीनकाला, यत्र दीर्घग्रन्थानां संक्षेपः शिक्षणाय, प्रसाराय च कृतः। उदाहरणस्वरूपं, पञ्चतन्त्रस्य, हितोपदेशस्य च संक्षिप्तरूपाणि। कादम्बरीकथासारं एतां परम्परां उन्नतावस्थायां नीतवान्। अभिनन्देन बाणभट्टस्य गद्यकाव्यं पद्यरूपेण संक्षिप्तं, यत् काश्मीरस्य साहित्यिकविशेषता दर्शयति। विद्वान् वार्डर् उक्तवान् यत् अभिनन्दस्य कृतिः बाणभट्टस्य शैलीं स्पष्टं करोति (Warder, 1974, पृ. 21)। एषा परम्परा आधुनिकानुवादकलायाः पूर्वरूपं भवति। उदाहरणार्थं, पञ्चतन्त्रस्य विष्णुशर्माकृत हितोपदेशस्य नारायणपण्डितेन संक्षिप्तीकरणं शिक्षाप्रधानता वर्धयति, तथैव कादम्बरीकथासारः दार्शनिकगहनतां सरलयति।

**बाणभट्टकृता कादम्बरी-स्वरूपं महत्त्वं च**

बाणभट्टकृता कादम्बरी संस्कृतगद्यकाव्ये अद्वितीयकृतिः, यस्याः भाषिकजटिलता, दीर्घवाक्यरचना, विस्तृतवर्णनशैली च विख्याता। एषा कृतिः गद्यकाव्यपरम्परायां मीलस्तम्भ इव प्रतिष्ठिता।

**रचनाकालः**

कादम्बरी सप्तमशताब्ध्यां बाणभट्टेन आरब्धा, किन्तु तस्य असामयिकमरणानन्तरं पुत्रेण भूषणभट्टेन समापिता। एषा कृतिः प्रेमकथां, दार्शनिकचिन्तनं, आध्यात्मिकतत्त्वं च निरूपयति (शास्त्री, 1995, पृ. 23)। बाणभट्टः हर्षचरिते स्वजीवितं निरूपयति, येन ज्ञायते यत् स उज्जयिन्यां राजसभायां कविः आसीत्। कादम्बरी तस्य अन्तिमकृतिः, यत्र गद्यस्य काव्यात्मकता परिपूर्णं विकसति। विद्वान् शेल्डन् पोलक् उक्तवान् यत् संस्कृतभाषा मानवसांस्कृतिके शक्तिस्रोतः इव (Pollock, 2006)। कादम्बरी एतस्य जीवन्तं निदर्शनम्। बाणभट्टस्य कालः हर्षवर्धनस्य राजत्वकाले, सप्तमशताब्ध्यां निश्चितं करोति। एषा कृति पूर्वभागं उत्तरभागं च दधाति, यत्र पूर्वभागः बाणभट्टकृतः, उत्तरभागः पुत्रकृतः।

**प्रमुखविशेषताः**

**गद्ये काव्यात्मकता**

अनुप्रासः, उपमा, रूपकं इत्यादयः अलंकाराः बाणभट्टेन कुशलतापूर्वकं प्रयुक्ताः। एतेन गद्यं काव्यवत् सौंदर्यपूर्णं, भावगहनं च भवति (त्रिपाठी, 2000,

पृ. 89)। उदाहरणं – चन्द्रापीडस्य अश्ववर्णने अनुप्रासयुक्तं गद्यं पाठकं मोहति। उदाहरणस्वरूपं, ''अश्वः खरखरशब्दं कुर्वन्'' इत्येवं अनुप्रासः। काव्यात्मकगद्यं संस्कृतसाहित्ये प्राचीनं, किन्तु बाणभट्टेन तत्र नवस्तरं प्राप्तम्। एषा विशेषता कादम्बरीं विश्वसाहित्ये अद्वितीयं करोति।

**दीर्घवाक्यरचना**

वाक्यानि कतिपयपंक्तीव्यापीनि, समासप्रधानानि च भवन्ति। उदाहरणं – चन्द्रापीडस्य उज्जयिनीप्रवेशवर्णनं एकवाक्ये पृष्ठपर्यन्तं विस्तृतम्। एषा रचना पाठकस्य धैर्यं परीक्षति, किन्तु सौंदर्यं ददाति। उदाहरणं – ''स तु नगरं प्रविश्य...'' इत्यारभ्य दीर्घसमासयुक्तं वाक्यम्। विद्वान् लुडो रोचर उक्तवान् यत् दीर्घवाक्यानि दर्शनबलं प्रददाति (Rocher, 1986)। एषा शैली बाणभट्टस्य भाषिककुशलतां दर्शयति।

**वर्णनात्मकगंभीरता**

प्रकृतिः, नगरं, पात्रसौंदर्यं च विस्तृतं चित्रति। कादम्बर्याः रूपवर्णनं, महाश्वेतायाः तपः च साहित्यिकनिरूपणस्य पराकाष्ठा (उपाध्यायः, 2005, पृ. 147)। उदाहरणं – हिमालयवर्णने ''शैलः श्वेतः शीतलः'' इत्येवं बिम्बात्मकम्। वर्णनानि बिम्बात्मकानि, येन पाठकः दृश्यं जीवति। एषा गहनता कादम्बरीं मनोवैज्ञानिकं करोति।

**दार्शनिकं आध्यात्मिकतत्त्वम्**

पुनर्जन्म, कर्म, तपः, प्रेमः च कथायां निरूपयति। न केवलं प्रेमकथा, अपितु मानवजीवनस्य आध्यात्मिकान्वेषणम्। अलैन दानियेलौ उक्तवान् यत् पुनर्जन्मं हिन्दूधर्मे मूलं तत्त्वम्। उदाहरणं – पुण्डरीकस्य पुनर्जन्मं कर्मसिद्धान्तं दर्शयति। एतानि तत्त्वानि कथायां सूक्ष्मरूपेण निरूपितानि, येन कादम्बरी दार्शनिकग्रन्थ इव भवति।

**पात्रमनोविश्लेषणम्**

बाणभट्टकृतायाः कादम्बर्याः विशेषता पात्राणां गहनं मनोवैज्ञानिकं चित्रणं भवति, यत् तात्कालिकसाहित्ये अद्वितीयम्। चन्द्रापीडः, कादम्बरी, महाश्वेता, पुण्डरीक इत्यादीनां भावनात्मकं, मनोवैज्ञानिकं च पक्षाः गभीरतया निरूपिताः, येन पात्रणाम् आन्तरिकसंघर्षाः, भावावेगाः, अन्तर्विरोधाः च स्पष्टं दृश्यन्ते। एषा शैली न केवलं काव्यात्मकं, अपितु आधुनिकमनोविज्ञानस्य (यथा

फ्रायडस्य अचेतनमनः, जंगस्य व्यक्तित्वप्रकाराः) पूर्वरूपं इव प्रतीयते। उदाहरणस्वरूपं, चन्द्रापीडस्य प्रेमव्यथा गहनं मनोविश्लेषणं दर्शयति। मूलकृतौ चन्द्रापीडः राजकुमारः सुखसंयुक्तजीवनात् प्रेमाविष्टः भवति, यत्र तस्य आन्तरिकसंघर्षः – राजधर्मः व्यक्तिगतप्रेम – विस्तारेण चित्रितः। स प्रेमावेशे ‘‘हृदयं विदारयति’’ इति भावनात्मकव्यथा निरूपिता, यत् आधुनिकदृष्ट्या 'emotional turmoil' इव, यस्मिन् प्रेमस्य तीव्रता मनःसंघर्षं जनयति। महाश्वेतायाः तपः पुण्डरीकस्य मृत्यौ – एषा प्रेमकथा तपस्यायाः माध्यमेन शोकस्य, वियोगस्य च मनोवैज्ञानिकं पक्षं दर्शयति, यत् आधुनिक ‘grief therapy’ संकल्पनायाः समानम्। पुण्डरीकस्य पुनर्जन्मसंघर्षः कर्मसिद्धान्तं, आत्मपरिवर्तनं च दर्शयति, यत् जंगस्य ‘archetypes’ इव। विद्वान् बलदेव उपाध्यायः उक्तवान् – ‘‘कादम्बर्यां पात्राणां मनोविश्लेषणं इत्थं गहनं यत् आधुनिकमनोविज्ञानस्य पूर्वसूचकं’’ (उपाध्यायः, 2005, पृ. 247)। एतत् चित्रणं कादम्बरीं विश्वसाहित्ये (यथा शेक्सपियरस्य हैम्लेट् व्यथा) तुलनीयं करोति, येन साहित्यिकदृष्ट्या पात्राणां जीवन्तता वर्धते। तर्कसंगतदृष्ट्या, एषा शैली काव्यं मनोवैज्ञानिकं करोति, यत् पाठकं भावनात्मकसंयोजनं करोति।

**साहित्यिकमहत्त्वम्**

एतेषां विशेषता – काव्यात्मकगद्यं, दीर्घवाक्यरचना, वर्णनात्मकगाम्भीर्यं, दार्शनिकं आध्यात्मिकतत्त्वं, पात्रमनोविश्लेषणं आदि कारणेन कादम्बरी संस्कृतगद्यकाव्ये उत्कृष्टकृतिः भवति। एषा कृतिः न केवलं साहित्यिकसौंदर्येण समृद्धा, अपितु दार्शनिक-, मनोवैज्ञानिक- आध्यात्मिक- दृष्ट्या अपि गहनतां धारयति। पुनर्जन्म, कर्म, तपः, प्रेम इत्यादयः तत्त्वाः भारतीयदर्शनस्य मूलं प्रतिबिम्बयन्ति, येन कादम्बरी प्रेमकथा न, अपितु जीवनदर्शनस्य अन्वेषणं भवति। दीर्घग्रन्थस्य जटिलतायाः कारणेन, विशेषतः दीर्घवाक्यानां, समासप्रधानसंरचनायाः, विस्तृतवर्णनानां च, संक्षिप्तीकरणस्य आवश्यकता उद्भवति। यस्मिन् अभिनन्दकृतं कादम्बरीकथासारं प्रादुर्भवत्, यत् मूलकृतेः सारं संरक्षति, सरलं च करोति। विद्वान् पी. वी. केन उक्तवान् यत् ‘‘संस्कृतकाव्यशास्त्रे गद्यस्य महत्त्वं अविच्छिन्नं, यत् कादम्बरीवत् कृतिषु दृश्यते’’ (Kane, 1962, पृ. 89)। विश्वसाहित्यिकदृष्ट्या, कादम्बरी प्रथम उपन्यास इव मान्यते, यत् गद्यकाव्ये कथानकसंरचना, पात्रविकासः,

दार्शनिकगाम्भीर्यं च अद्वितीयं। तुलनात्मकतः, एषा कृतिः यूरोपीयउपन्यासं (यथा Cervantes' Don Quixote) निरूपयति, यत्र प्रेम-साहस-दर्शनं निरूपयति। तर्कसंगतदृष्ट्या, कादम्बर्याः महत्त्वं तस्य बहुस्तरीय संरचनायां निहितं, यत्र साहित्यिक-, दार्शनिक- च मूल्याङ्कनाय अवसरं ददाति। एषा कृतिः संस्कृतसाहित्ये गद्यकाव्यपरम्परायाः पराकाष्ठा, येन भविष्यकृतिभ्यः प्रेरणा ददाति।

**कादम्बर्याः अन्यसंक्षेपाः तुलना च**

कादम्बरर्याः अन्यसंक्षेपाः अपि प्राप्यन्ते, यथा भालानकृतं गुजरातीसंस्करणं, यत् प्रादेशिकभाषायां रचितं, तथा च अन्यैः विद्वद्भिः निर्मितं लघुरूपं। एते संक्षेपाः मूलकृतेः प्रसाराय प्रयुक्ताः, किन्तु अभिनन्दस्य कादम्बरीकथासारः पद्यरूपेण विशेषं स्थानं धारयति, यत् काश्मीरस्य साहित्यिकपरम्परां प्रकाशयति। काश्मीरशैली भावनात्मकगहनतायाः, स्पष्टतायाः, संक्षिप्ततायाः च समन्वयेन विशिष्टा। अभिनन्देन मूलकादम्बर्याः गद्यं पद्येन सह पाठकाय आकर्षकं कृतं। उदाहरणं – चन्द्रापीड-कादम्बर्योः प्रेमविद्यते मूलकृतौ दीर्घगद्येन, कथासारे तु संक्षिप्तपद्येन, यथा ''चन्द्रापीडः कादम्बरीं दृष्ट्वा प्रेमाविष्टः सन् हृदयेन कम्पति''। विद्वान् हरिनारायणः अपराजितः उक्तवान् – ''अभिनन्दस्य संस्करणं काश्मीरशैलीद्वारा मूलकृतेः भावगहनतां संरक्षति, किन्तु जटिलत्वं परिहरति'' (अपराजितः, 2002, पृ. 144)। तुलनात्मकदृष्ट्या, भालानकृतं गुजरातीसंस्करणं प्रादेशिकपाठकान् लक्षति, किन्तु साहित्यिकसौंदर्यं किञ्चित् न्यूनं भवति। अभिनन्दस्य संस्करणं तु संस्कृतपद्येन रचितं, यत् साहित्यिकं मूल्यं वर्धते। अन्यसंक्षेपाः भाषिकानुवादं प्राधान्यति, किन्तु कथासारः काव्यात्मकपुनर्जननं करोति। तर्कसंगतं यत् अभिनन्दस्य योगदानं संक्षेपणकलायां नवाचारं दर्शति, येन संस्कृतसाहित्यस्य परम्परा नवोन्मेषेन विद्यते।

**कादम्बरीकथासारस्य ऐतिहासिकसाहित्यिकपृष्ठभूमिः**

अभिनन्दः संस्कृतसाहित्ये तेषां महतां विदुषां मध्ये समाविष्टः, येन परम्परा-नवोन्मेषयोः मध्ये सम्यक् सन्तुलनं स्थापितं। तस्य जीवितवृत्तं पूर्णतः ज्ञातं नास्ति, किन्तु नवमशताब्दस्य उत्तरार्धे सक्रियः इति विद्वत्संमतिः (नागेन्द्रः, 1985, पृ. 315)। ऐतिहासिकसाक्ष्यानुसारं, अभिनन्दः काश्मीरे अथवा उत्तरभारते संस्कृतसाहित्यस्य केन्द्रे सम्बद्धः आसीत्। स जयन्तभट्टस्य पुत्रः, यः काश्मीरस्य

राज्ञः शंकरवर्मणः प्रशंसितः। एषा पृष्ठभूमिः अभिनन्दस्य रचनायाः ऐतिहासिकं सन्दर्भं ददाति, यत् काश्मीरस्य साहित्यिकपरम्परायां गहनं प्रभावं दर्शयति।

**अभिनन्दव्यक्तित्वविवादः**

संस्कृतसाहित्ये अभिनन्दनामकानां विदुषां विषयकः विवादः प्रचलितः। द्वौ प्रमुख-अभिनन्दौ उल्लेखनीयौ – एकः गौडदेशीयः (बंगालप्रान्तीयः), यः रामचरितकारः, नवमशताब्धां सक्रियः, यस्य कृतयः रामकाव्यप्रधानाः (नीलकण्ठ जनार्धन भट्टाचार्य, Bengal Sanskrit Poets)। द्वितीयः काश्मीरीयः अभिनन्दः, जयन्तभट्टपुत्रः, यः कादम्बरीकथासारकारः, न्यायदर्शनेऽपि कुशलः। विद्वद्भिः (यथा डॉ. हरिनारायण अपराजित) उक्तं यत् गौड-अभिनन्दः रामचरितेन विख्यातः, किन्तु काश्मीरीयः कादम्बरीसंक्षेपेण। एषः विवादः अभिनन्दस्य कृतित्वं गहनं करोति, यत् कालक्रमेण, प्रादेशिकभेदेन च विद्वांसं विभजति। तर्कसंगतदृष्ट्या, एषा द्वैधता संस्कृतसाहित्यस्य विविधतां दर्शयति, येन शोधकर्तृभ्यः नवीनान्वेषणं प्रेरयति।

**रचनात्मक-दृष्टिः साहित्यिककुशलता च**

अभिनन्दस्य भूमिका केवलं संक्षेपकस्य न, अपितु रचनात्मिका पुनर्निर्मात्री च। एषा कृतिः मूलकृतेः पुना रचना इव, यत्र भावः, सौंदर्यं, दार्शनिकता च अक्षुण्णा रक्षिता। विद्वान् ए.के. वार्डर उक्तवान् यत् ''अभिनन्दस्य शैली काश्मीरशैलीं दर्शयति, यत्र आन्तरिकभावनाः प्रधानं, बहिर्वर्णनात् addedge" (Warder, 1974, पृ. 21)। उदाहरणं – कथासारे चन्द्रापीडस्य प्रेमव्यथा जटिलगद्येन न, अपितु सरलपद्येन निरूपिता, यत् पाठकं भावनात्मकसंयोजनं करोति। एषा कुशलता अभिनन्दं साहित्यिकपुनर्निर्मातृ रूपं करोति, काश्मीरपरम्परायाः प्रतिनिधित्वं करोति। तर्कसंगतदृष्ट्या, एषा दृष्टिः संस्कृतसाहित्ये संक्षेपणं कलारूपेण स्थापयति।

**संक्षिप्तीकरणे नवाचारः**

अभिनन्देन संक्षिप्तीकरणे नवाचारः प्रयुक्तः – वाक्यवर्णनस्य लघुकरणं, कथायाः सुसंगठनं, गौणप्रसङ्गानां परित्यागः, मुख्यघटनानां संरक्षणम्। उदाहरणं – चन्द्रापीड-कादम्बरीमिलनं, पुण्डरीक-महाश्वेताप्रेम संक्षिप्तं, किन्तु गहनं। डॉ. हरिनारायणः अपराजितः उक्तवान् – ''अभिनन्दस्य नवाचारः संक्षेपणं साहित्यिककला अस्ति, यत् मूलकृतेः सारं संरक्षति'' (अपराजितः, 2002,

पृ. 112)। तर्कसंगतदृष्ट्या, एषाः नवाचारः संस्कृतसाहित्ये पद्य-गद्यसंयोजनं प्रेरयति, येन कादम्बरीकथासारः स्वतन्त्रं कृतं भवति। कथासारः सन्तुलितं रचनात्मकं च रूपे रक्षितः, यत् वर्णनगहनतां, दीर्घवाक्यरचनया निरूपयति, संस्कृतसाहित्ये स्थायि स्थानं धारयति।

**चरित्रचित्रणम्**

अभिनन्देन पात्रणां चरित्रचित्रणं संक्षिप्तं, परन्तु प्रभावी-रूपेण कृतम्। चन्द्रापीडः मुख्यनायकः रूपेण वीरत्वं, कोमलता, प्रेम, धर्मबुद्धिः च समन्वयति। तस्य भावनासूक्ष्मता, प्रेमानुरागः, मित्रभक्तिः च अद्भुतं संतुलनं धारयन्ति। कादम्बरी तु नायिकारूपेण सौंदर्यं, लज्जां, बुद्धिं, तपः, निष्ठां च एकत्र धारयति। अभिनन्दः तयोः प्रेमकथां लघुतया, किन्तु हृदयस्पर्शकरूपेण निरूपयति- ''स्निग्धया दृष्ट्या विलसदनुरागा सा तं विलोक्य प्रहस्यमाना बभूव।'' एवं रूपवर्णनं तु केवलं रूपगौरवाय न, अपितु भावाविष्काराय प्रयुक्तम्। महाश्वेतायाः तपः पुण्डरीकस्य प्रति अनन्यभक्तिं दर्शयति। तस्य शोकं, संयमं, विरक्ततां च अभिनन्देन अत्यन्तं सूक्ष्मतया निरूपितवान्। पात्रणां संवादाः मूलकादम्बर्याः दीर्घवर्णनात् विरहिताः सन्ति, किन्तु भावार्थसमृद्धाः। उदाहरणरूपेण पुण्डरीकस्य पुनर्जन्मदृष्टान्तः कर्मतत्त्वस्य दार्शनिकव्याख्या इव प्रतीयते। एवं दृश्यते यत् अभिनन्दः पात्रमनोविज्ञानं न केवलं संक्षेपेण, अपितु सशक्ततया प्रस्तुतवान्। तेन पात्रणां भावानां सारं संरक्षितम्-अत एव तस्य कादम्बरीकथासारः ''भावसारसंग्रहः'' इव गण्यते।

**साहित्यिकमूल्याङ्कनम्**

अभिनन्दस्य कादम्बरीकथासारं केवलं एकसाधारणसंक्षेपः न, अपितु साहित्यिकपुनारचना इति विद्वत्सम्मतिः। तस्य पद्यप्रयोगः, अनुप्रासलाघवः, सरसशब्दावली च रचनां काव्यमयां कुर्वन्ति। भाषायाः स्पष्टता, भावप्रवाहस्य सुसंगतिः, तथा कथानकस्य क्रमबद्धता कारणेन पठनीयता वर्धिता। विद्वान् वासुदेवशास्त्री अभिनन्दं ''संक्षिप्तकाव्यपरम्परायाः जनकः'' इति निर्दिशन्ति। कादम्बरीकथासारे विद्यमानः गद्य-पद्यसमन्वयः संस्कृतसाहित्ये दुर्लभः। अभिनन्देन न केवलं दीर्घवाक्यानां संक्षेपणं कृतम्, अपि तु प्रत्येकं प्रसङ्गं सारतत्त्वेन रूपायितम्- यत् आधुनिक ''summary writing'' पद्धतेः आद्यरूपं गण्यते। साहित्यिकदृष्ट्या अभिनन्दकृतिः निम्नलिखितकारणैः विशिष्टा-

**1. भाषिकसौष्ठवम् -** पद्यगतशब्दानां योजनेन सौंदर्यवर्धनम् ।

**2. संवेदनात्मकता -** मूलकादम्बर्याः भावार्थस्य संरक्षणम् ।

**3. प्रसादगुणः -** सरलप्रवाहयुक्तभाषया दार्शनिकभावानां प्रस्तुतिः ।

**4. संरचनासंतुलनम् -** कथा, संवाद, दर्शन, रस, शृङ्गार इत्यादीनां समानुपातिकसमन्वयः । एतेन सिद्धं यत् अभिनन्दस्य रचना काव्यगुणानां सारसंग्रहः इति न्यायेन प्रशंसार्हः ।

**ऐतिहासिक-सामाजिकसन्दर्भः**

अभिनन्दस्य कार्यं तात्कालिकसाहित्यपरम्परा-अध्यापनसंस्कृतेः प्रासंगिकम् । संस्कृतजटिलग्रन्थाः सामान्यपाठक-छात्रवर्गाय कठिनाः । कथासारः शैक्षिकोपयोगितां प्रदानयति, संस्कृतसाहित्यं सुलभ-पठनीयं च करोति । विद्वान् एम. पटवर्धन् उक्तवान् यत् ''संक्षेपणं कला इव, यत् ज्ञानप्रसाराय आवश्यकं'' (Patwardhan, 2003, पृ. 12) । काश्मीरस्य सामाजिके साहित्यिके च सन्दर्भे, अभिनन्दस्य कृतिः राजसभायां प्रशंसिता, यत् सामाजिकसंस्कृतिप्रसारं दर्शयति । तर्कसंगतदृष्ट्या, एषः सन्दर्भः अभिनन्दस्य कृतिं ऐतिहासिकपरिप्रेक्ष्ये स्थापयति, येन संस्कृतसाहित्यस्य निरन्तरता दृश्यते ।

**खण्डसारः**

अभिनन्देन साहित्यिकविवेकेन कथासारे स्वतन्त्रं गद्यं प्रस्तुतम् । मूलकथा दार्शनिकं, भावनात्मकं, सौंदर्यं रक्षति, सरलं च करोति ।

**संक्षिप्तीकरणस्य प्रक्रिया**

अभिनन्दकृतं कादम्बरीकथासारं केवलं पदार्थस्य लघुकरणं न, किन्तु सृजनात्मकं रचनात्मकं च प्रक्रिया इति मन्यते । प्रक्रियायां मूलकथायाः आत्मा, भावः, दार्शनिक-गाम्भीर्यम्च संरक्षितानि भवन्ति, तथापि पठनीयं, सुगमं च रूपं प्रदत्तं भवति । डॉ. विद्याधरः पाठकः कथयति – ''अभिनन्देन कादम्बरी गद्यस्य जटिलता सरलस्य लघुरूपे प्रस्तुता, पाठकानां च अध्येतृणां च कृते सेतुकृतं'' (पाठकः, 1990, पृ. 15) । एषा प्रक्रिया बहुविधा, यत्र कथानक-, शैली-, भाव-इत्यादयः पक्षाः विवेचिताः ।

**कथासारस्य संक्षिप्तकथानकम्**

कादम्बरीकथासारः बाणभट्टकृतायाः कादम्बर्याः संक्षिप्तं, किन्तु भावपूर्णं रूपं प्रस्तौति, यत्र कथानकस्य मुख्यघटनाः निरूपिताः । चन्द्रापीड-वैणतेयमित्रताः

कथा चन्द्रापीडेन वैणतेयेन च सह यात्रया प्रारभति, यया मित्रता कथानकाय गतिशीलत्वं प्रददाति। आलोचनात्मकदृष्ट्या, एषा मित्रता पाठकं कथायाः भावनात्मककेन्द्रे निरूपयति, येन मुख्यपात्राणां परिचयः सुसंयोजितः। एषा कथा पुनर्जन्म, तपः, कर्मसिद्धान्तं च दार्शनिकतत्त्वानि प्रकाशन्ते। उदाहरणं – ''पुण्डरीक-महाश्वेतयोः प्रेमसंवादः संक्षिप्तः, किन्तु भावगहनः'' (पाठकः, 1990, पृ. 18)। चन्द्रापीड-कादम्बरीप्रेमकथाः चन्द्रापीड-कादम्बर्योः प्रेमकथा कथासारस्य केन्द्रबिन्दुः। अभिनन्देन संवादेषु भावानां तीव्रता संरक्षिता, पठनीया च कृता। उदाहरणं – ''चन्द्रापीडः कादम्बरीं दृष्ट्वा प्रेमाविष्टः अभवत्''। पुण्डरीकस्य पुनर्जन्म प्रतीक्षा चः पुण्डरीकस्य पुनर्जन्म कर्मसिद्धान्तस्य, तपसः च दार्शनिकायामं प्रददाति। कथासारः केवलं प्रेमकथा न, अपितु मानवजीवनस्य आध्यात्मिकसन्दर्भं च निरूपयति। पुनर्मेलनं परिणयः कथा सर्वपात्राणां सुखदेन पुनर्मेलनेन परिणयेन च समाप्ता भवति। आलोचनात्मकदृष्ट्या, एषा समाप्तिः संक्षेपणकलायाः सन्तुलनस्य उत्कृष्टं निदर्शनं।

**उपकथानां चयनं च परित्यागः**

अभिनन्देन उपकथानां चयनं एवं परित्यागं मुख्यकथायाः दार्शनिकं भावात्मकं च गाम्भीर्यंरक्षणं कृतं। उदाहरणस्वरूपं, पुण्डरीकः च महाश्वेता त्रासदप्रेमकथां संरक्षतः, यत् पुनर्जन्म तपं च दार्शनिकतत्त्वानि प्रकाशयन्ति। किन्तु बहूनि गौणपात्राणि दीर्घप्रकृतिवर्णनानि च हृतानि। डॉ. हरिनारायणः अपराजितः लिखति – ''अभिनन्देन केवलं आवश्यकाः उपकथाः संरक्षिताः, यस्मात् कथायाः मूलभावः पाठकानां समक्षं अविकृतः अभवत्'' (अपराजितः, 2002, पृ. 115)। एषा चयनप्रक्रिया रचनात्मकविवेकं दर्शयति।

**अलंकारिकभाषा वर्णनशैली च**

मूलकादम्बर्यां दीर्घवाक्यानि, समासप्रधानसंरचना, अलंकारप्रधानता च सन्ति। अभिनन्देन तानि निम्नप्रकारे संशोधितानि – 1. वाक्यानि लघुतीर्णानि, सरलानि च। 2. अलंकारविनियोगः संयमितः। 3. जटिलप्रकृति-नगरवर्णनानि बिम्बात्मकानि संक्षिप्तानि च। उदाहरणं – मूलवाक्ये उज्जयिनीवर्णनं पृष्ठानां परिमिते विस्तीर्णं कथासारे केवलं आवश्यकचित्रात्मकवर्णनं एव, ''उज्जयिनीं प्रविश्य सौंदर्यं दृष्ट्वा''। (शास्त्री, 1995, पृ. 25)। एषा सरलीकरणं पठनीयतां वर्धयति।

**पात्रवर्णनस्य संक्षिप्तीकरणं**

अभिनन्देन पात्राणां मानसिकपक्षभावाः संक्षिप्ताः, उदाहरणं – महाश्वेता पुण्डरीकस्य प्रेमसंवादः लघुः, किन्तु भावगाम्भीर्यंसंरक्षिताः। चन्द्रापीडः कादम्बरीसंवादे प्रेम तप इत्यस्य भावः स्पष्टः, ''चन्द्रापीडः कादम्बरीं दृष्ट्वा प्रेमाविष्टः अभवत्''। एषा प्रक्रिया पात्राणां जीवन्ततां रक्षति।

**रसभावाभिव्यक्तौ संक्षेपणं**

अभिनन्देन श्रृङ्गारः करुणा वीरः च इत्यत्र रसनिर्वाहः संरक्षितः, किन्तु जटिलता अतिरेकवर्जिता। प्रेम, तप, पुनर्जन्म च सरलगद्ये प्रस्तुता। डॉ. लक्ष्मीनारायणः त्रिपाठीः कथयति – ''छन्दः न्यूनः कथासारं कथानकप्रधानं करोति, यतः रसभावः सहजं, प्रभावशाली च अनुभवते'' (त्रिपाठी, 2000, पृ. 92)।

**तुलनात्मकं विश्लेषणम्**

| कादम्बरी | बाणभट्टकृता | अभिनन्दकृता कादम्बरीकथासारः | पञ्चतन्त्रं/हितोपदेशः |
|---|---|---|---|
| कथासंनादः | जटिलं, विस्तृतं, बहुस्तरीयं | सरलं, प्रवाहमयं, | सरलं, प्रत्यक्षं, शिक्षाप्रधानं |
| पात्रविश्लेषणम् | गहनं, भावनात्मकं, मनोवैज्ञानिकं | संक्षिप्तं, प्रभावशालि, भावयुतम् | संकेतात्मकं, सीमितं |
| दार्शनिकगहनता | बहुविधं, गूढं, अध्यात्मिकं | संक्षिप्तं, दार्शनिकं | नैतिकं, शिक्षाप्रधानं |
| वर्णनात्मकता | प्रचुरं, बिम्बात्मकं, दीर्घं | संयमितं, सारपूर्णं, चित्रात्मकं | न्यूनं, स्पष्टं |
| शैलीगतनवाचारः | मूलकाव्यशैली, अलङ्कारप्रधानं | रचनात्मकं पुनर्जननं, काश्मीरीशैल्युक्तं | परम्परागतं, |
| शैक्षिकोपयोगिता | कठिनं, विद्वत्सापेक्षम् | सुलभं, पठनीयं, अध्ययनाय उपयुक्तं | मध्यमं, शिक्षणाय उपयोगि |
| पठनीयता | दुरवबोधं, विद्वदपेक्षं | सरलं, सर्वसुलभं | सरलं, सामान्योपयुक्तं |

**कथानकस्य प्रस्तुतिः एवं आलोचनात्मकविश्लेषणं**

अभिनन्दकृतं कादम्बरीकथासारं मूलकादम्बर्याः सरलता, पठनीयतां च संयोज्य रूपे परिवर्तयति। अस्मिन् खण्डे मुख्यतः कथानकं, पात्रवर्णनं, शैलीगतविश्लेषणं, तथा आलोचनात्मकसीमाः विवेच्यन्ते।

**साहित्यिकयोगदानम्**

अभिनन्दकृतं कादम्बरीकथासारं संस्कृतसाहित्ये न केवलं संक्षेपणस्य निदर्शनं, अपितु स्वतन्त्रं साहित्यिकं कृतं यत् मूलकादम्बर्याः जटिलतां सरलं, पठनीयं च करोति, तथापि तस्य सौंदर्यं, भावं, दार्शनिकतां च अक्षुण्णं रक्षति। एषा कृतिः साहित्यिक-शैक्षिक-दार्शनिक-सांस्कृतिक-च दृष्ट्या महत्वपूर्णं योगदानं ददाति। अस्मिन् खण्डे कथासारस्य साहित्यिकं योगदानं बहुविधं विश्लेष्यते, यत्र अभिनन्दस्य रचनात्मकविवेकः, काश्मीरशैली, शैक्षिकोपयोगिता, समकालीन प्रासङ्गिकता च समीक्ष्यन्ते।

**स्वतन्त्रं साहित्यिकं कृतं**

कादम्बरीकथासारः केवलं बाणभट्टकृतायाः कादम्बर्याः संक्षेपः न, अपितु स्वतन्त्रं साहित्यिकं कृतं यत् मूलकथायाः आत्मानं रक्षति, नवीनं च रूपं प्रददाति। अभिनन्देन मूलकृतेः जटिलगद्यं, दीर्घवाक्यरचना, अलंकारप्रधानतां च परिहृत्य सरलं, प्रवाहमयं, पठनीयं च गद्यं रचितं। विद्वान् विद्याधरः पाठकः कथयति – ''अभिनन्देन जटिलगद्यं सरलं कृतं, येन कथासारः स्वतन्त्रः साहित्यिकः कृतः, न केवलं संक्षेपणं'' (पाठकः, 1990, पृ. 15)। उदाहरणस्वरूपं, चन्द्रापीड-कादम्बरीमेलनस्य संवादः मूलकृतौ विस्तृतः, समासयुक्तः, अलंकारप्रधानः च अस्ति, यथा – ''स तु तां दृष्ट्वा हृदयेन विदारयति...'' इति दीर्घवर्णनं। कथासारे तु संक्षिप्तं, किन्तु भावपूर्णं – ''चन्द्रापीडः कादम्बरीं दृष्ट्वा प्रेमाविष्टः अभवत्''। एषा सरलता कथासारस्य मौलिकतां दर्शयति, यत् काश्मीरशैल्याः आन्तरिकभावना प्रधानतायाः परिणामः। काश्मीरशैली, यथा विद्वद्भिः निर्दिष्टं, बाह्यवर्णनात् addedge आन्तरिकं चिन्तनं, भावनात्मकं च गाम्भीर्यं प्राधान्यति (Warder, 1974, पृ. 21)।

**संक्षिप्तीकरणकलायाः उत्कृष्टं निदर्शनं**

कादम्बरीकथासारः संस्कृतसाहित्ये संक्षिप्तीकरणकलायाः उत्कृष्टं निदर्शनं। अभिनन्देन बाणभट्टस्य दीर्घवर्णनानि, जटिलालंकाराः, गौणप्रसङ्गाः च

परिहृत्य कथानकस्य मूलं संरक्षितं। उदाहरणं – मूलकृतौ उज्जयिनीवर्णनं पृष्ठपर्यन्तं विस्तृतं, यत्र नगरस्य सौंदर्यं, प्रकृतिः, समाजः च बिम्बात्मकं चित्रितम्। कथासारे तु एकं वा द्वौ वाक्यं, यथा – ''उज्जयिनीं प्रविश्य सौंदर्यं दृष्ट्वा चन्द्रापीडः मोहितः अभवत्''। एषा प्रक्रिया न केवलं कथायाः गतिं वर्धयति, अपितु पाठकस्य ध्यानं मुख्यघटनासु केन्द्रयति। डॉ. हरिनारायणः अपराजितः उक्तवान् – ''अभिनन्दस्य संक्षेपणं रचनात्मकं पुनर्जननं, यत्र कथायाः आत्मा सौंदर्यं च संरक्षितं, अनावश्यकं भारं परिहृतं'' (अपराजितः, 2002, पृ. 115)। एषा कला संस्कृतसाहित्ये प्राचीनपरम्परां, यथा पञ्चतन्त्रस्य हितोपदेशस्य च संक्षेपणं, नवस्तरे नीतवती। तुलनात्मकदृष्ट्या, आधुनिकसाहित्ये यथा शेक्सपियरस्य नाटकानां संक्षेपणं (यथा Hamlet का लघुरूपम्), तथैव कादम्बरीकथासारः साहित्यिकसंक्षेपणस्य आदर्शं प्रस्तौति।

**शैक्षिकोपयोगिता**

कथासारः संस्कृतसाहित्यस्य शिक्षणाय सेतुकार्यं करोति। बाणभट्टस्य कादम्बरी जटिलवाक्यरचनायाः, दीर्घवर्णनानां च कारणेन साधारणविद्यार्थिभ्यः दुरवबोधा। कथासारः सरलभाषायां, संक्षिप्तरूपे च प्रस्तुतः, येन विद्यार्थिनः संस्कृतसाहित्यस्य रसास्वादं प्राप्नुवन्ति। उदाहरणं – दिल्ली विश्वविद्यालयस्य स्नातकस्तरीयपाठ्यक्रमे कथासारः प्रारम्भिकसंस्कृताध्ययनाय प्रयुज्यते। डॉ. सत्यव्रतशास्त्री कथयति – ''संक्षिप्तग्रन्थाः शिक्षणाय सेतुं निर्मान्ति, येन संस्कृतं सर्वसुलभं भवति'' (शास्त्री, 1995, पृ. 25)। कथासारः विद्यार्थिभ्यः न केवलं कथानकं, अपितु संस्कृतस्य भाषिकसौंदर्यं, दार्शनिकतत्त्वं च शिक्षते। एषा उपयोगिता आधुनिकशिक्षणपद्धतौ, यत्र संक्षिप्तं, अर्थपूर्णा च सामग्री अपेक्ष्यते, विशेषं महत्वं ददाति।

**काश्मीरशैल्याः योगदानं**

अभिनन्दस्य कथासारः काश्मीरसाहित्यिकपरम्परायां महत्वपूर्णं स्थानं धारयति। काश्मीरशैली, यथा विद्वद्भिः वर्णितं, आन्तरिकभावनाप्रधानता, स्पष्टता, संक्षिप्तता च दर्शयति। अभिनन्देन कादम्बरीकथासारः पद्यरूपेण रचितः, यत् बाणभट्टस्य गद्यस्य जटिलतां परिहृत्य काश्मीरस्य साहित्यिकसौंदर्यं प्रस्तौति। उदाहरणं – पुण्डरीक-महाश्वेतायाः प्रेमसंवादः मूलकृतौ दीर्घगद्येन, कथासारे तु लघुपद्येन प्रस्तुतः, यथा – ''पुण्डरीकः तया मोहितः, यया प्रेम तपः च निरूपयति''।

विद्वान् ए.के. वार्ड उक्तवान् – ''काश्मीरशैली आन्तरिकं भावनात्मकं च गहनतां दर्शयति, यत् अभिनन्दस्य कथासारे स्पष्टं'' (Warder, 1974, पृ. 21)। एषा शैली संस्कृतसाहित्ये नवाचारं प्रस्तौति, येन परम्परां नवोन्मेषं च संयोजयति।

**दार्शनिकं सांस्कृतिकं च योगदानं**

कथासारः केवलं साहित्यिकं न, अपितु दार्शनिकं सांस्कृतिकं च योगदानं ददाति। प्रेम, तपः, पुनर्जन्म, कर्मसिद्धान्तः च भारतीयदर्शनस्य मूलं निरूपयति। उदाहरणं – पुण्डरीकस्य पुनर्जन्मं कर्मफलस्य सिद्धान्तं दर्शयति, यत् आधुनिकसन्दर्भे मानसिकस्वास्थ्यस्य, नैतिकचेतनायाः च कृते प्रेरणादायी। विद्वान् अलैन दानियेलौ उक्तवान् – ''पुनर्जन्म हिन्दूधर्मे जीवनदर्शनस्य आधारः'' (Daniélou, 1991, पृ. 67)। कथासारः एतानि तत्त्वानि सरलरूपेण प्रस्तौति, येन सांस्कृतिकसंवादं विश्वसाहित्ये वर्धयति।

**सांस्कृतिक-दार्शनिकप्रासङ्गिकता**

कथासारे प्रेम, तपः, पुनर्जन्म, नैतिकमूल्यानि च प्रस्तुतानि, यानि भारतीय सांस्कृतिकदर्शनस्य मूलम्। पुनर्जन्मनः संकल्पना, कर्मसिद्धान्तः, प्रेम्णः आध्यात्मिकरूपं च आधुनिके मानवजीवनस्य सन्दर्भे प्रासङ्गिकम्। उदाहरणं – महाश्वेता-पुण्डरीकस्य त्रासदप्रेम आधुनिकप्रेमकथानां नैतिकगहनतां स्मारयति। विद्वान् दानियेलौ – ''हिन्दूधर्मे पुनर्जन्म जीवनदर्शनस्य आधारः'' (Daniélou, 1991, पृ. 67)। एषा दार्शनिकता कथासारं विश्वसाहित्ये प्रासङ्गिकं करोति।

**वैश्विकसाहित्ये योगदानं**

कथासारस्य सरलता, स्पष्टता च वैश्विकसाहित्ये अनुवादाय उपयुक्तम्। आङ्ग्लभाषायाम्, हिन्दीभाषायाम्च अनुवादेन कथासारः विश्वविद्यालयेषु, यथा हार्वर्ड्, ऑक्सफोर्ड्च, अध्ययनाय उपयुज्यते। शेल्डन् पोलक् उक्तवान् – ''संस्कृतं विश्वसांस्कृतिकसंवादाय सेतुः'' (Pollock, 2006, पृ. 32)। उदाहरणं – कादम्बरीकथासारस्य आङ्ग्लभाषीयानुवादः(Clay Sanskrit Library) पाश्चात्यपाठकान् आकर्षति। आधुनिकवैश्विकसाहित्ये भारतीयकथानकस्य प्रेम-, तपः-, पुनर्जन्म- इत्यादयः आयामाः पाश्चात्यसाहित्येन तुलनीयाः। तुलनात्मक दृष्ट्या, चन्द्रापीड-कादम्बरीप्रेमकथा पाश्चात्यसाहित्ये रोमियो-जूलियट् निरूपयति, येन वैश्विकसाहित्ये योगदानं दृश्यते।

**डिजिटलयुगे प्रासङ्गिकता**

आधुनिकडिजिटलयुगे कथासारस्य सरलता, संक्षिप्तता च ई-पुस्तकं, ऑनलाइनशिक्षणाय उपयुक्तम्। विद्यार्थिनः संक्षिप्तं, अर्थपूर्णं च सामग्रीं प्राप्नुवन्ति। काश्मीरशैलीस्य आन्तरिकभावनाः डिजिटलसाहित्ये नवाचाराय प्रेरयति। उदाहरणं– कथासारस्य अंशाः यूट्यूब, ब्लॉग् च साहित्यप्रसाराय उपयुज्यन्ते (यथा Digital Sanskrit Library, 2023)।

**समकालीन साहित्यिक प्रभावः**

आधुनिकसाहित्ये संक्षिप्तीकरणस्य कला, यथा उपन्यासस्य लघुरूपं, कथासारस्य प्रभावं स्मारयति। कथासारस्य संरचना आधुनिकलघुकथायाः, संक्षिप्तउपन्यासस्य च प्रेरणादायी। उदाहरणं – आधुनिकहिन्दीसाहित्ये प्रेमचन्दस्य संक्षिप्तकथायाः तुलना कथासारेण संभवति। एषः प्रभावः कथासारस्य साहित्यिकं योगदानं समृद्धयति।

**शैलीगत आलोचना**

कादम्बरीकथासारस्य शैली सरलता, प्रवाहः, संयमितालङ्कारः च इति विशेषताभिः युक्ताः, येन अभिनन्दस्य रचनात्मककुशलता दृश्यते। मूलकादम्बर्यां बाणभट्टस्य गद्यं दीर्घवाक्यरचनया, समासप्रधानसंरचनया, अलङ्कारगहनतया च युक्तं, यत् पाठकानां धैर्यं परीक्षते। अभिनन्देन तु जटिलगद्यं सरलं, प्रवाहमयं च कृतं, यत् पठनीयतां वर्धते। कथासारस्य शैली प्रवाहमयी, येन कथानकं सुसङ्गठितं भवति। गौणप्रसङ्गानां परित्यागेन, मुख्यघटनानां संरक्षणेन च कथा सङ्गतिपूर्णा। उदाहरणं – चन्द्रापीड-कादम्बरीसंयोगः संक्षिप्तं, किन्तु भावपूर्णं, यथा ''चन्द्रापीडः कादम्बरीं दृष्ट्वा प्रेमाविष्टः अभवत्''। मूलकृतौ बाणस्य अलङ्कारप्रधानता दृश्यते, किन्तु अभिनन्देन संयमितं बिम्बात्मकं च अलङ्कारविनियोगः। उदाहरणं – पुण्डरीक-महाश्वेतायाः प्रेमसंवादः लघु, किन्तु बिम्बेन प्रभावशाली। अभिनन्देन गद्यं पद्यरूपेण प्रस्तुतं, यत् काश्मीरशैल्याः विशेषता। विद्वान् नागेन्द्रः उक्तवान् – ''शैली सौंदर्यं सन्तुलयति, येन कथासारः स्वतन्त्रं काव्यं भवति'' (नागेन्द्रः, 1985, पृ. 320)। एषा शैली काश्मीरस्य आन्तरिकभावनाप्रधानतां दर्शयति, येन कथासारः साहित्यिकं स्थानं धारयति।

**तुलनात्मकं साहित्यिकम् विश्लेषणम्**

कादम्बरीकथासारस्य अन्यसंक्षेपैः (यथा पञ्चतन्त्र, हितोपदेशः, भालान कृतगुजरातीसंस्करणं) तुलनां कृत्वा अभिनन्दस्य संस्करणं उत्कृष्टं दृश्यते।

**पञ्चतन्त्र-हितोपदेशेन तुलना**

पञ्चतन्त्रस्य हितोपदेशः सरलं, शिक्षाप्रदं च, किन्तु कादम्बरी इति गहनं, दार्शनिकं च। विद्वान् वासुदेवः द्विवेदी उक्तवान् – ''कादम्बर्या गाम्भीर्यंसंक्षेपे रक्षिता'' (द्विवेदी, 1998, पृ. 182)।

**भालानकृतसंस्करणेन तुलना**

भालानकृतगुजरातीसंक्षेपः प्रादेशिकभाषायां रचितः, किन्तु अभिनन्दस्य संस्करणं संस्कृतपद्येन, यत् साहित्यिकसौंदर्यं वर्धयति।

| विशेषताः | बाणभट्टकृता कादम्बरी | अभिनन्दकृता कादम्बरीकथासार | हितोपदेशः / पञ्चतंत्रम् |
|---|---|---|---|
| कथा जटिलता | अत्यन्तजटिलम्, बहुविस्तृतम् | सरलम्, प्रवाहयुक्तम् | सरलम्, प्रत्यक्षम् |
| पात्रगत विश्लेषण | गहनम्, भावनात्मकम् | संतुलितम्, संक्षिप्तमे प्रभावपूर्णम् | सीमितम्, केवल संकेतात्मकम् |
| दार्शनिकतत्त्व | गहनम्, बहुधा बोध्यतत्त्वम् | संक्षिप्तिम्, सुव्यवस्थितम् | सामान्यतया, नैतिकोपदेशप्रधानम् |
| वर्णनात्मकता | अत्यन्त-विस्तृतम्, प्रतिमासदृशम् | संयमितम्, सारपूर्णम् | सीमितम्, स्पष्टम् |
| शैलीगत-नवप्रयोगः | मूल-रचना प्रभावयुक्तम् | रचनात्मकम् पुनर्जननम्, साहित्यिक-नवप्रयोगयुक्तम् | सामान्यम्, परंपरागतम् |
| शैक्षिक-उपयोगिता | तुलनात्मकतया न्यूनम् | उच्चतमम्,म पठनीयम्, अध्ययन-सुलभम् | ध्यमम्, शिक्षाप्रदम् |
| पठनीयता | कठिनम्, सामान्यपाठकाय क्लिष्टम् | सुगमम्, सरलम्, स्पष्टम् | सुगमम्, सरलम् |

**तालिका-समीक्षाः**

कथासंनादतिरूबाणस्य कादम्बर्यां जटिलं कथानकं बहुस्तरीयं च, अभिनन्दस्य कथासारः सरलः प्रवाहमयः च, पञ्चतन्त्रं/हितोपदेशः शिक्षाप्रधानं सरलं च। पात्रविश्लेषणम्ः कादम्बर्यां गहनं मनोवैज्ञानिकं च, कथासारे संक्षिप्तं प्रभावशालि च, पञ्चतन्त्रं/हितोपदेशे संकेतात्मकम्।

दार्शनिकगहनतारूपकादम्बरी दर्शनतत्त्वैः समृद्धा, कथासारे संक्षिप्तं, हितोपदेशे नैतिकम्।

वर्णनात्मकतारूकादम्बर्यां प्रचुरं बिम्बात्मकं, कथासारे संयमितं, हितोपदेशे न्यूनं।

शैलीगतनवाचारः कादम्बरी मूलकाव्यं, कथासारः काश्मीरीशैलीयुक्तं, हितोपदेशः परम्परागतं। शैक्षिकोपयोगिताः कथासारः शिक्षणाय सुलभं, कादम्बरी विद्वदपेक्षं, हितोपदेशः मध्यमं।

पठनीयताः कथासारः सर्वसुलभं, कादम्बरी दुरवबोधं, हितोपदेशः सरलं।

अभिनन्दकृतं कादम्बरीकथासारं संस्कृतसाहित्ये स्वतन्त्रं साहित्यिकं गद्यं, यत् संक्षिप्तीकरणकलायाः उत्कृष्टं निदर्शनम्। कथासारः बाणभट्टकृतायाः कादम्बर्याः सौंदर्यं, भावं, दार्शनिकतां च रक्षति, सरलं च प्रस्तौति। एषा कृति न केवलं संक्षेपः, अपितु रचनात्मकं पुनर्जननं, यत् काश्मीरशैलीं दर्शति। अभिनन्देन मूलकथायाः आत्मा अक्षुण्णं, पाठकाय सुलभं च कृतं। विद्वान् अपराजितः – "कथासारः साहित्यिकपरम्परायै नवजीवनं" (अपराजितः, 2002, पृ. 117)। अभिनन्दस्य संक्षिप्तीकरणं कथानकचयनं, शैलीगतसरलीकरणं, भावाभिव्यक्तिं च सन्तुलयति। गौणवर्णनानां परित्यागः, मुख्यघटनानां संरक्षणं, पद्यरूपेण प्रस्तुतिः च कौशलं दर्शति। उदाहरणं – पुण्डरीक-महाश्वेताप्रेमः संक्षिप्तं, किन्तु गहनम्। एषा प्रक्रिया आधुनिकानुवादकलायाः समानम्। कथासारः संस्कृतसाहित्ये संक्षेपणपरम्परायाः मीलस्तम्भः। काश्मीरशैलीद्वारा परम्परां नवोन्मेषं च संयोजयति। पाठकः–"सेतुकार्यं" (पाठकः, 1990, पृ. 16)। एषा कृति बाणभट्टस्य जटिलकथां सुलभं करोति। कथासारः शैक्षिकं, साहित्यिकं, दार्शनिकं च योगदानम्। विद्यार्थिभ्यः पाठ्यसामग्री, शोधकर्तृभ्यः विश्लेषणाय, साहित्यप्रेमिभ्यः रसास्वादाय च उपयुक्तम्। डिजिटलयुगे ई-पुस्तकं, ऑनलाइनशिक्षणं च समृद्धयति। वैश्विकसाहित्ये अनुवादाय, सांस्कृतिकसंवादाय च मार्गं प्रशस्तयति। कथासारस्य

सरलता, दार्शनिक गाम्भीर्यं च भविष्यति प्रासङ्गिकं। संस्कृतसाहित्यस्य प्रसाराय, वैश्विकाध्ययनाय च योगदानं। उदाहरणं – तुलनात्मकसाहित्ये पाश्चात्यकथानकैः तुलनीयम्। कादम्बरीकथासारः साहित्यिककला, शैक्षिकोपयोगिता, दार्शनिकगहनता च समन्वितम्। अभिनन्देन बाणस्य काव्यं पुनर्जननं, यत् संस्कृतसाहित्ये, विश्वसाहित्ये च स्थायि स्थानं धारयति।

**सन्दर्भग्रन्थाः**


- *बाणभट्ट. (1995). कादम्बरी (सम्पादकः डॉ. सत्यव्रत शास्त्री). दिल्ली : संस्कृत विश्वविद्यालय प्रकाशन।*
- *अभिनन्द. (1990). कादम्बरीकथासार (सम्पादकः डॉ. विद्याधर पाठक). वाराणसीः काशी विद्यापीठ।*
- *उपाध्याय, बलदेव. (2005). संस्कृत साहित्य का इतिहास. लखनऊः भारतीय ज्ञानपीठ।*
- *द्विवेदी, वासुदेव. (1998). संस्कृत गद्य साहित्य का विकास. दिल्लीः संस्कृत अकादमी।*
- *त्रिपाठी, लक्ष्मीनारायण.(2000). संस्कृत गद्यकाव्य परंपरा. बनारसः वेदांत प्रकाशन।*
- *अपराजित, हरिनारायण. (2002). गद्य साहित्य की शैलीगत विशेषताएँ. दिल्लीः ज्ञानसागर प्रकाशन।*
- *नागेन्द्र. (1985). प्राचीन भारतीय साहित्य कोश. लखनऊ : साहित्य भवन।*
- *Patwardhan, M. (2003). The Art of Condensation in Sanskrit Literat.re. New Delhi: SahityaAkademi.*
- *Pollock, Sheldon. (2006). The Language of the Gods in the World of Men: Sanskrit, Culture, and Power in Premodern India. Berkeley: University of California Press.*


●●●

# 23

# काव्यप्रकाशोक्त-लक्षणास्वरूपे ध्वन्यालोकलोचनप्रभावः

*रविकान्तभारद्वाजः*

अनादिविविधविचित्ररचनाप्रपञ्चचारूतरेऽत्र संसारे शब्दशास्त्र-प्ररूढमतिभिः शिष्टैः महर्षिपाणिनिवररुचिप्रभृतिभिरनुशिष्टानां प्रकृति प्रत्यय विभागादिभिर्व्युत्पादितानां साध्वसाध्वनुशासनविधया वा शासितानां संस्कृत प्राकृतानां तथा च केनापि प्रकारेणानुशासनमप्राप्तानां शिष्टानां संस्कृत प्राकृतभिन्नानां देशभाषाणां गिरामेवानुग्रहेण देवादारभ्य पामरपर्यन्तानां प्राणिनां व्यवहारः प्रवर्तते। एता एव वाच आधारीकृत्य विश्वमुच्चावचव्यवहारमातनोति एतदभावे लोके कः कथं स्वाभिप्रायं स्वेतरजनवेद्यं विधातुमीशीत। यथोक्तं काव्यादर्शे-**वाचामेव प्रसादेन लोकयात्रा प्रवर्त्तते।।**''[1]

यद्यत्र संसारे शब्दरूपमयी काचिज्ज्योतिर्न प्रसरेत्तदा भुवनत्रयमिदं गाढान्धकारव्याप्तं जायेत। एवं संसारव्यवहारसूत्राधारोऽयं शब्दः कुत्रचित् ब्रह्मपदेनापि समाद्रियते। वैशिष्ट्यञ्चास्य शब्दस्य सर्वैः सादरं स्वीक्रियते।

तत्र न केवलं लोकव्यवहारयात्राप्रवर्त्तकोऽयं शब्दः प्रत्युत सम्यग्ज्ञानेन सुप्रयोगेन च पुरूषार्थचतुष्टयसम्पादकोऽप्यसौ भवति। यथोक्तं भगवता पतञ्जलिना-''एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति।''[2] तत्र ''प्रयोगचतुराः खल्वालङ्करिकाः'', ते चास्य शब्दस्य सम्यकसेवनेन ग्रावप्रख्यं जगदपि सरसीकुर्वन्ति। निगदितं लोचने यथा-

**''जगद्ग्रावप्रख्यं निजरसभरात्सारयति च।''**[3]

तेन एतादृशरूपवता लोकोत्तरवर्णनानिपुणकविकर्मणा काव्येनापि चतुर्वर्गप्राप्तिर्भवति उक्तञ्चाचार्यभामहेन-

**''धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।''[4]**

तत्र काव्यं नाम किम्? किं शब्दः काव्यमुत केवलमर्थः काव्यमुत द्वयोस्सहभावं वेत्यत्र विदुषां विभिन्नमार्गः, परञ्च प्रायः बुधजनाः शब्दार्थौ काव्यमित्येव स्वीकुर्वन्ति। तेषां काव्यतत्वविदां मूलाधारः स्यान्महाकविकालिदासस्योक्तिरियम्-

**''वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।''[5]**

तथा च काव्ये शब्दार्थयोरुभयोरपेक्षा भवतीति प्रतिपादितं महाकविमाघेनापि शिशुपालवधमहाकाव्ये-

**''शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते।।''[6]**

इत्येत्सर्वमनुसन्धाय च काव्यलङ्करकारेणाद्याचार्येण भाहेन भणितम्-

**''शब्दार्थौ सहितौ काव्यं गद्यं पद्यं च तद्द्विधा।''[7]**

एवमेवान्यैरपि तत्परवर्त्तिभिराचार्यैरानन्दवर्धनमम्मटप्रभृतिभिश्शब्दार्थयोरुभयोः काव्यताङ्गीकृता।

यद्युभौ शब्दार्थौ काव्यं चेत् पुनः किं तयोस्स्वरूपं तत्रेत्यपि विचारणीयं वर्तते। तत्स्वरूपञ्चाभिहितं काव्यप्रकाशकारेण-

**''स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा।''[8]**

अत्र काव्ये शब्दस्त्रिधा-वाचकः, लाक्षणिकः, व्यञ्जकश्चेति। तदर्थोऽपि वाच्य-लक्ष्य-व्यङ्ग्यभेदेन त्रिधा वर्तते। अथ वाचकादिभिश्शब्दैर्वाच्याद्यर्थबोधिकाः शब्दस्य शक्तयोऽपि त्रिविधा भवन्ति, ताश्च क्रमेण-अभिधा, लक्षणा, व्यञ्जना च। ताष्वभिधया वाच्योऽर्थो, लक्षणया लक्ष्योऽर्थो, व्यञ्जनया व्यङ्गयार्थो चावबुध्यते। तदेवं शब्दार्थशक्तीनां त्रित्वमत्र काव्येऽऽचार्यमम्मटभट्टविश्वनाथदिभिर्वितत्य वर्णितम्।

नन्वत्र काव्ये किं प्रारम्भत एव शक्तीनां त्रित्वमस्ति? न, आचार्यभामहभट्टोद्भट्ट-वामनादिभिस्तु शब्दस्य द्वावेव व्यापारौ स्वीकृतौ, तत्र व्यञ्जनाख्यतृतीयव्यापारस्य स्थापनं त्वाचार्यानन्दवर्धनेन ध्वन्यालोके कृतम्। ततः पूर्व तु शब्दस्य द्वावेवाभिधालक्षणाख्यौ व्यापारौ प्रसिद्धौ।

यथाचाचार्यमुकुलभट्टेनाप्युक्तमभिधावृत्तिमातृकायाम्-''शब्दस्य च मुख्येन लाक्षणिकेन वाभिधाव्यापारेणार्थावगतिहेतुत्वमिति मुख्यलाक्षणिकयोरभिधाव्यापारयोरत्र विवेकः क्रियते।''[9]

तत्र काव्ये लक्षणाविषये तु प्रायस्सर्वैराचार्यैरभिहितं परञ्च व्यापारस्यास्य विशदस्वरूपविमर्शस्तु प्रथमतया काव्यप्रकाशे प्राप्यते। तत्र ग्रन्थकृदाचार्यमम्मट-भट्टेन लक्षणा सभेदं निरूपिता।

तच्च काव्यप्रकाश एको ग्रन्थो नास्ति प्रत्युत ग्रन्थोच्चयो वर्तते। तत्र प्रायः प्रतिपदं ग्रन्थान्तराच्छब्दान्तरेण साक्षाद्वोपात्तम्। यथा तन्मङ्गलाचरणे ध्वन्यालोकलोचनस्य साक्षात्प्रभावो दृश्यते।

एवमेव तत्र बहूनि स्थलान्यवलोक्यन्ते यत्र लोचनस्य स्पष्टप्रभावो वर्तते। अत्र तु केवलं लक्षणास्थले तत्प्रभावः समीक्ष्यते।

एतस्य ग्रन्थस्य द्वितीयोल्लासे ग्रन्थकृता लक्षणालक्षणं निरूपयता प्रोक्तम्-

**''मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।**
**अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया।।''**[10]

कारिकार्थः-मुख्यार्थबांधे वाच्यार्थस्य तात्पर्यानुपपत्तिः बाधे तद्योगे मुख्यार्थेन सह सामीप्यादिसम्बन्धयोगे रूढितः -प्रसिद्धे अथ-वा प्रयोजनात्-प्रयोजनवशात् यत्-यया वृत्या अन्योऽर्थो-वाच्यव्यतिरिक्तः लक्ष्यते सा आरोपिता-आरोपिशब्दवृत्तिः, लक्षणा क्रिया लक्षणा वृत्तिः।

एवं काव्यप्रकाशोक्तलक्षणालक्षणानुसारेण हेतुत्रयसद्भावे लक्षणाप्रवर्तते, तत्रेदं लक्षणास्वरूपं ग्रन्थकारस्य मौलिकमुत कस्यचिदत्र पूर्वाचार्यस्य प्रभाव इति विचारणीयम्?

तत्र लक्षणा शब्दशक्तिर्विद्यते, तस्य शब्दस्य तच्छक्तेश्च विचारः प्रायः सर्वेषु व्याकरणमीमांसादिशास्त्रेषु कृतो वर्तते। तदत्र तेषु प्रधानशास्त्रेषु पदवाक्यप्रमाणेषु व्याकरणमीमांसान्यायेषु लक्षणास्वरूपसन्दर्भे किं किं विचारितमिति संक्षेपेण प्रस्तूयते।

''प्रथमे हि विद्वांसो वैयाकरणाः व्याकरणमूलत्वात्सर्वविद्यानाम्''[11] इति ध्वनिकारोक्तदिशादौ व्याकरणानुसारं तल्लक्षणं विचार्यते। तस्मिन् व्याकरणे मुनित्रयं प्रसिद्धम् ते च महर्षिपाणिनिकात्यायनपतञ्जलयः। तेषु महर्षिपाणिनिना सूत्राणि प्रणीतानि, महर्षिकात्यायेन वार्तिकानि विरचितानि, महर्षिपतञ्जलिना च तत्सूत्रवार्तिकोपरि महाभाष्यं निबद्धम्।

तत्र महर्षिपतञ्जलेर्लक्षणाविषयकसिद्धान्तप्रतिपादयता परमलघु मञ्जूषायामाचार्यनागोजीभट्टेन निगदितम्-''सति तात्पर्ये सर्वे सर्वार्थवाचकाः।''[12]

इत्यनेन सिद्धान्तेन शब्दस्यैवैहवाभिधा शक्तिः, सैव द्विधा-प्रसिद्धाप्रसिद्धा च। तत्र गङ्गादिपदात्प्रवाहाद्यर्थज्ञानं प्रसिद्धशक्त्या तीराद्यर्थबोधश्चाप्रसिद्धशक्त्या जायेत।

एवं महाभाष्यकारमतेऽभिधारिक्ता नास्ति द्वितीया काचिच्छब्दशक्तिः। अनेन प्रकारेण लक्षणावृत्तिविषये महाभाष्यकारमतं प्रदर्श्य सम्प्रति मीमांसामते तत्स्वरूपं प्रदर्श्यते। तत्र भवता महर्षिजेमिनिना प्रणीतं हि मीमांसाशास्त्रम्। तेन द्वादशाध्यायेष्विदं विभज्य वर्णितम्। तस्मिंश्च मीमांसाशास्त्रे मतद्वयं सुप्रसिद्धम् तच्च भाट्टगुरुमतम्। तत्र भाट्टमतप्रवर्तकोऽऽचार्यकुमारिलभट्टस्तथा च गुरुमतप्रवत्तकचार्य- प्रभाकरमिश्रः। तत्राचार्यकुमारिलप्रणीतप्रसिद्धग्रन्थो भट्टवार्त्तिको वर्तते। तस्मिंल्लक्षणालक्षणं प्रकटयता तेन प्रोक्तम्-

**''अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते।।''**[13]

इत्यत्र लक्षणायाः हेतुद्वयं मुख्यार्थबाधतद्योगरूपं प्रतिपादितम्। एवं पदवाक्यशास्त्रदृष्ट्या तल्लक्षणं विवेच्येदानीं प्रमाणशास्त्रन्यायरीत्या तत्प्रतिपाद्यते। तत्र प्राचीननवीनभेदविभक्तेऽस्मिन् न्यायशास्त्रे न्यायसिद्धान्तमुक्तावली प्रामाणिकग्रन्थोऽस्ति। तस्मिंश्च लक्षणास्वरूपं लक्षयता ग्रन्थकारेण लक्षितम्-

**''लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तितः।''**[14]

तात्पर्यानुपपत्तेः शक्यस्य शक्त्योपस्थापितार्थस्य सम्बन्ध; यः कश्चित् सामीप्यसादृश्यादिः यथायोग्यं सम्बन्धः स एव लक्षणेत्यर्थः।

इत्यत्रापि हेतुद्वयसद्भावे लक्षणा भवतीत्युक्तम्। एवं व्याकरण-मीमांसान्यायशास्त्राणां प्रसिद्ध- ग्रन्थकृतामनुसारेणात्र लक्षणास्वरूपं समुदाहृतम्। तत्र महाभाष्यकारः लक्षणाख्यां वृत्तिमेव नाङ्गीकरोति। आचार्यकुमारिलस्तु प्रमाणान्तरेण मुख्यार्थविरूद्धे तत्सम्बद्धान्यार्थप्रतीतिं लक्षणा मनुते। एवञ्चाचार्यविश्वनार्थपञ्चाननो हि न्यायशास्त्रदिशा तात्पर्यानुपपत्तेः शक्यसम्बन्धं लक्षणावृत्तिर्वदति। एतत्त्रयोऽपिग्रन्थाः स्व-स्वशास्त्रप्रतिनिधिभूताः।

तेन यदि काव्यप्रकाशे व्याकरणमीमांसान्यायशास्त्राणां प्रसिद्धानां लक्षणास्वरूपे पूर्णप्रभावो नास्ति चेत् ततस्तत्र कस्य साक्षाद्प्रभावो विद्यत इति विवेच्यते। इदानीं तत्राचार्यमम्मटभट्टग्रथितः काव्यप्रकाशग्रन्थो येन काव्यशास्त्रीय ग्रन्थोऽस्ति तेन तत्पूर्वाचार्याणां लक्षणाविषयकलक्षणान्यपि समीक्ष्यन्ते। काव्यस्वरूपप्रतिपादके काव्यशास्त्रे काव्यप्रकाशात्प्रागपि विद्वद्भिरनेवैहर्लक्षणा-

स्वरूपं प्रकटितम्। तत्राचार्यभट्टोद्भट्टस्य मतं सर्वप्रथमं समायाति तेनाचार्यभामहस्य ''शब्दाश्छन्दोऽभिधानार्थाः'' इत्यत्राभिधानपद- व्याख्यानावसरेऽभिहितम-

**''शब्दानामभिधानमाभिधाव्यापारो मुख्यो गुणवृत्तिश्च।''**[15]

अथचाचार्यवामनेनाप्युक्तं लक्षणाविषये-**''सादृश्याल्लक्षणा वक्रोक्तिः।''**[16]

ततश्चाचार्यानन्दवर्धनेन नवमशताब्द्यां ध्वनिप्रतिष्ठायै ध्वन्यालोकाख्यः प्रसिद्धतमो ग्रन्थो विरचितस्तत्र तेन लक्षणायाः ध्वनेर्भेददर्शनाय तस्याः भक्तिपेदन व्याख्यानं कृतम्। तत्रोक्तं तेन-**''भाक्तमाहुस्तमन्ये।''**[17]

अथ च तद्वृत्यवसरे तेनाचार्येण सा भक्तिर्गुणवृत्तिरति प्रकटितम् यथा- **''अन्ये तं ध्वनिसंज्ञितं काव्यात्मानं गुणवृत्तिरित्याहुः।''**[18] ध्वनिकृतात्र ध्वनेस्तस्याः भक्तेः पार्थक्यप्रदर्शनसन्दर्भ एव निरूपणं कृतं तल्लक्षणं पृथक्तया तु न प्रकटितम्। अनेन प्रकारेणाचार्यानन्दवर्धनर्यन्तं लक्षणायाः प्राप्तलक्षणानां काव्यप्रकाशे कथितलक्षणे प्रत्यक्षप्रभावो न दृश्यते। ततो दशमशताब्धा उत्तरार्धे ध्वन्यालोकेऽऽचार्याभिनवगुप्तपादेन लोचननाम्नी टीका कृता। तत्र टीकाकृता भाक्तपदस्य व्याख्यानावसरे तस्य तिस्त्रः व्युत्पत्तयः कृताः, ताश्च यथा-

(क) ''भज्यते सेव्यते पदार्थेन प्रसिद्धतयोत्प्रेक्ष्यत इति भक्तिर्धर्मोऽभिधेयेन सामीप्यादिः तत आगतो भाक्तो लाक्षणिकोऽर्थः।'' यदाहुः-

**''अभिधेयेन सामीप्यात्सारूप्यात्समवायतः।**
**वैपरीत्यात्क्रियायागाल्लक्षणा पञ्चधा मता।।''**

(ख) ''भक्तिः प्रतिपाद्ये सामीप्यतैक्ष्ण्यादौ श्रद्धातिशयः तां प्रयोजनत्वेनोद्दिश्य तत आगतो भक्तिः गौणो लाक्षणिकश्च।''

(ग) ''मुख्यस्य चार्थस्य भङ्गो भक्तिरित्येवं मुख्यार्थबाधा, निमित्तं प्रयोजनमिति त्रयसद्भाव उपचारबीजमित्युक्तं भवति।''[19]

इत्थमत्र गुप्तपादेन मुख्यार्थबाधा, निमित्तं प्रयोजनञ्ज लक्षणायाः त्रयो हेतव उक्ताः, तथा च केन प्रकारेण तेषां गतार्थतास्तीत्यपि सुस्पष्टतया दर्शिता। ततो वयमुभयोर्लोचनकाव्यप्रकाशयोर्गतलक्षणसमीक्षणं कुर्मस्तदाचार्याभिनवप्रकटित लक्षणास्वरूपस्यैव पूर्णच्छाया काव्यप्रकाशगतलक्षणालक्षणे वर्तत इति पश्यामः।

तथा च न केवलमत्रैव लक्षणालक्षणस्थले प्रत्युत काव्यप्रकाशे बहुषु स्थलेषु गुप्तपादलेखिनीप्रभावो दृश्यते, अत्र तु केवलं लक्षणास्थलमेवसमाख्यतम्।

एवमनेन शोधपत्रमाध्यमेन शोधार्थिनामेकत्र तत्तच्छात्रगतलक्षणा-विचारस्य तत्रापि प्रधानतया काव्यशास्त्रनिरूपिततत्स्वरूपस्य च दिग्दर्शनं यदि भविष्यति तेनायं लघुप्रयासः पूर्णतां यास्यति। इति शम्।

**''ऊर्ध्वोर्ध्वमारुह्य यदर्थतत्वं धीः पश्यति श्रान्तिमवेदयन्ती।**

**फलं तदाद्यैः परिकल्पितानां विवेकसोपानपरम्पराणाम्।।''**[20]

इत्येवं प्रकारेण भारतीयचिन्तनपरम्परा सनातनी विद्यते, यत्र तत्वप्राप्तये मनीषिणः सदा प्रयत्नशीलाः। अत्र न पूर्वापरमनीषिणां मध्ये वैचारिकविरोधो वर्तते केवलं प्रयत्नभेदो दृश्यते। अत्र तु पूर्वसूरिणां प्रति सर्वदादरभावो भवति, यथोक्तं महाकविना कालिदासेन-**''अथ वा कृतवाग्द्वारे वंशेऽस्मिन् पूर्वसूरिभिः। मणौ वङ्कासमुत्कीर्णे सूत्रस्येवास्ति मे गति'।।''**[21]

इत्थमत्र पूर्वप्रतिष्ठापितासिद्धान्तानां शिष्याणां हितकाम्यया स्फुटतरप्रतीतये चापि विशयदयन्ति स्म विद्वांसः। एवमेवाचार्याभिनवगुप्तपादैरपि ध्वनिकारनिर्दिष्टलक्षणास्वरूपस्य लोचने स्फुटप्रतिपादनं व्यधायि, ततस्तदनुयायिनाचार्येणमम्मटभट्टेनापि व्यवस्थितरूपेण शिष्यबुद्धिप्रवेशाय तदुक्तलक्षणास्वरूपस्य निरूपणं विहितम्।

तत्र काव्यप्रकाशे मङ्गलाचरणादारभ्य ध्वनिस्थापनापर्यन्तं प्रायः लोचनकाराणां साक्षादनुगतत्वं स्पष्टतयावलोक्यते। किमन्यद् आचार्यगुप्तपादानां साहित्यं विना काव्यशास्त्रमपूर्णमेव दृश्यते।

**सन्दर्भाः-**


1. *काव्यादर्श, 1/2*
2. *महा.प्र.आ.*
3. *ध्व.लो, पृ. 1*
4. *काव्यलंकार, 1/2*
5. *रघु. 1/1*
6. *शिशु. 2/86*
7. *काव्यालंकार, 1/16*
8. *काव्यप्रकाश, 2/1*

9. अभिधा. पृ., 1
10. काव्यप्र. सू., 12
11. ध्वन्या., पृ. 1381
12. परम., पृ. 20
13. काव्य., पृ. 65
14. न्याय, 80
15. ध्व.लो., पृ. 34
16. ध्व.लो., पृ. 34
17. ध्व., 1/1
18. ध्व., पृ. 29
19. ध्व.लो., पृ. 30
20. अभिनव.भा. 2, पृ. 58
21. रघु., 1/4

**सन्दर्भग्रन्थसूची**


1. काव्यादर्शः आचार्यः श्रीरामचन्द्रमिश्रः चौखम्बा विद्याभवन, वाराणसी।
2. महाभाष्यम्-चारुदेव शास्त्री, श्रीमोतीलाल बनारसीदास, दिल्ली।
3. ध्वन्यालोक लोचन-आचार्य जगन्नाथ पाठक, चौखम्बा विद्याभावन, वाराणसी।
4. काव्यालङ्गरसूत्राणि-श्री हरगोविन्द शास्त्री, चौखम्बा सुरभारती प्रकाशन, वाराणसी।
5. रघुवंशम्-पं. श्री ब्रह्मशंकर मिश्र, चौखम्बा संस्कृत सीरीज, वाराणसी।
6. काव्यप्रकाशः आ. विश्वेश्वर सिद्धान्तशिरोमणी, वाराणसी।
7. साहित्यदर्पणम्-आ. शेषराज खेमी, चौखम्बा कृष्णदास अकादमी, वाराणसी
8. अभिधावृत्तिमातृका-डॉ. रेवाप्रसाद द्विवेदी, चौखम्बा विद्याभवन, वाराणसी।
9. परमलघुमञ्जूषा-पं. श्री सदाशिव शर्मा शास्त्री, चौखम्बा सं.सी., वाराणसी।
10. न्यायसिद्धान्तमुक्तावलिः, पं. श्रीकृष्णवल्लाभाचार्य, चौखम्बा सं. संस्थान, वाराणसी।
11. अभिवनव भारती, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी।


●●●

# 24

# संस्कृतभाषायां सार्वनामिकशून्यता

***माधवगोपालः***

वाक्ये कस्यचित् पदस्य आकांक्षायां सत्यामपि तस्य अदर्शनं 'सार्वनामिकशून्यता' इति पदेन अभिधीयते। एवं सति तस्य अदृष्टपदस्य अध्याहारः पूर्ववर्तीवाक्यात् अथवा परवर्तीवाक्यात् क्रियते भाषाभाषिभिः। सर्वनाम साकांक्षपदानामप्रयोगः यादृच्छिकतया न संभवति संस्कृतभाषायाम्। सर्वनामपदानामपि प्रयोगः यादृच्छिकतया अनुमतः नास्ति इति ज्ञायते संस्कृतग्रन्थाध्ययनात्। तत्र कश्चन नियमः कार्यं करोति यस्य जिज्ञासा अस्माभिः कार्या। अधोलिखितानां वाक्यानां[1] विलोकनं कुर्वन्तु -

(1) शैलजा अद्य कारयानं क्रेतुं रामनगरं याति। सा प्रतिवर्षं पवित्रयमुनास्नानार्थम् अपि तत्र गच्छति ।

तत् यमुनातटे एव अवस्थितम् अस्ति। साधुसन्तानां भव्याश्रमकृते अपि प्रसिद्धं वर्तते ।

(1क) सा अद्य कारयानं क्रेतुं तत्र याति। शैलजा प्रतिवर्षं पवित्रयमुनास्नानार्थम् अपि तत्र गच्छति ।

तत् यमुनातटे एव अवस्थितम् अस्ति। रामनगरं साधुसन्तानां भव्याश्रमकृते अपि प्रसिद्धं वर्तते ।

अत्र (1) मध्ये यानि वाक्यानि सन्ति तानि सम्यक् निर्मितानि, किन्तु (1क) मध्ये यानि वाक्यान्ति सन्ति तेषां निर्माणं सुष्ठु न प्रतिभाति। (१क) मध्ये प्रथमवाक्यं सा इति सर्वनाम्ना आरभ्यते यस्य पदार्थस्य ज्ञानं श्रोतुः न भवति इति स्पष्टम्। अस्य ज्ञानाय श्रोता द्वितीयवाक्यस्य शैलजा इति पदं पश्यति तदनु तस्मै सा इति पदस्य बोधः भवति। अत्र सा पदस्य बोधः द्रागेव न भवति अतः आरम्भिकवाक्ये संज्ञापदं

वर्ज्य सर्वनामपदप्रयोगः नास्ति प्रशस्तः इति सुतरां वक्तुं शक्यते। (1क) मध्ये प्रयुक्तेषु वाक्येषु तत्र पदस्य अर्थः अपि न बोध्यते झटिति अस्य पदार्थस्य अविद्यमानत्वात् आद्यवाक्ये। अस्य अर्थः तदैव ज्ञायते यदा श्रोता अन्तिमवाक्यं शृणोति। अतः एतदपि नास्ति सुष्ठुप्रयोगः। अस्य वैपरीत्यं (1) मध्ये वाक्यानां या संरचना सा पदानाम् अर्थबोधे न प्रस्तौति काचिदपि बाधा। अत्र अर्थबोधः द्रागेव भवति आरम्भिकवाक्य्षु संज्ञापदस्य विद्यमानत्वात्। अतः वक्तुं शक्यते यत् सर्वनामप्रयोगः संज्ञापदप्रयोगाधीनः। अस्य स्वतन्त्र प्रयोगः न कर्तुं शक्यते शिष्टैः।

उपरितनोपस्थापनायां सिद्धम् अभूत् यत् सर्वनामप्रयोगः कथमपि यादृच्छिकतया न कर्तुं शक्यते भाषायाम्, अस्य स्वार्थबोधाय संज्ञापदस्य उपरि निर्भरत्वात्। संस्कृतभाषायां कतिपयप्रसङ्गेषु संज्ञापदस्य प्रयोगे सत्यपि सर्वनामप्रयोगः नैसर्गिकतया न क्रियते इति विषयः सार्वनामिकशून्यतारूपेण अस्य शोधपत्रस्य तृतीयांशे चर्चितः अस्ति।

**2. शोधप्रविधिः**

अस्य शोधपत्रस्य आधारसामग्री मुख्यरूपेण पञ्चतन्त्रं ग्रन्थः वर्तते। अस्य ग्रन्थस्य कथाः एव प्रमाणानि सन्ति यत्किमपि अत्र प्रस्तूयते। अस्य ग्रन्थस्य एकाग्रचित्ततया अध्ययनेन सर्वं प्रमाणं भवति। प्रथमं वयं पञ्चतन्त्रस्य प्रेक्षणं कृतवन्तः अथ च यत् प्रेक्षितं तदेव अभिलिखितम्। अत्र वाक्यानां संरचना कथं जाता, पदानां दृष्टप्रयोगः अदृष्टप्रयोगः वा कथं आचर्यते ग्रन्थकारेण इति प्रेक्षणेन यत् निष्कर्षः समुदितः तस्य पुष्टिः अपि कृता परवर्तीकथाभिः। इत्थं नास्ति लिखितं किञ्चिदप्यमूलमत्र। साम्प्रतं प्रश्नः उदेति यत् कथं वयं जानीमः यत् कस्यचिद् वाक्ये सार्वनामिकशून्यता अस्ति वा न वा? अस्य समाधानं आख्यातपदस्य आकांक्षापरिज्ञानेन भवति। आख्यातपदानि अकर्मकं, सकर्मकं द्विकर्मकं वा भवन्ति। अतः आख्यातपदं विलोक्य वयं सुनिश्चेतुं पारयामः यत् वाक्ये कस्यचित् साकांक्षपदस्य शून्यता अस्ति वा न वा।

**3. संस्कृतभाषायाम् सार्वनामिकशून्यता**

संस्कृतग्रन्थेषु वयं पश्यामः यत् यदा कोपि विषयः प्रस्तूयते तदा तस्य नामोल्लेखपूर्वकम् उद्देशः अवश्यं भवति। उद्देशानन्तरं सर्वनामप्रयोगः इष्टं भवति। किन्तु यदि तद्विषयः तत्प्रकरणे दीर्घायते तदा तदर्थं सर्वनामपदप्रयोगं विनाऽपि व्यपदेशा भवन्ति इति सर्वानुभूतविषयः। इमं विषयमेव सूक्ष्मेक्षिकया अत्र विविधपक्षैः अत्र प्रस्तूयते।

**3.1 कर्तृपदशून्यता**

संस्कृतवाक्येषु विविधप्रसङ्गेषु कर्तृपदस्य अपि शून्यता दरीदृश्यते। अस्य पदस्य अध्याहारः कृत्वा तत्र अर्थावबोधः क्रियते। उदाहरणं पश्यन्तु -

(2) तत्र च लघुपतनकः नाम वायसः प्रतिवसति स्म। सः कदाचित् प्राणयात्रार्थम् पुरम् उद्दिश्य प्रचलितः यावत् पश्यति, तावत् जालहस्तः अतिकृष्णतनुः, स्फुटितचरणः, ऊर्ध्वकेशः यमकिङ्कराकारः नरः Ø[2] संमुखः बभूव । अथ तम् दृष्ट्वा शङ्कितमना Ø व्यचिन्तयत्।

(2.क) तत्र च लघुपतनकः नाम वायसः प्रतिवसति स्म। सः कदाचित् प्राणयात्रार्थम् पुरम् उद्दिश्य प्रचलितः यावत् पश्यति, तावत् जालहस्तः अतिकृष्णतनुः, स्फुटितचरणः, ऊर्ध्वकेशः यमकिङ्कराकारः नरः (तस्य) संमुखः बभूव । अथ तम् दृष्ट्वा शङ्कितमना (सः) व्यचिन्तयत्।

अस्मिन् पञ्चतन्त्रस्य गद्यांशे वयं पश्यामः यत् अयं लेखांशः लघुपतनकस्य उपरि अस्ति। तस्य उल्लेखः अपि आद्ये एव वाक्ये जातमस्ति। अनेन पाठकस्य मनसि लघुपतनक इति पदार्थस्य उपस्थितिः जायमाना भवति। अस्य पदार्थस्य जायमानत्वात् द्वितीये वाक्ये सर्वनामपदं प्रयुक्तमस्ति। किन्तु आगामिनि वाक्ये अस्य पदार्थस्य श्रोतुः मनसि अतिशयजायमानत्वात् सर्वनामपदमपि प्रयुक्तं नाभवत् इत्येव सार्वनामिकशून्यता इत्याचक्षते अत्र। ''अथ तम् दृष्ट्वा शङ्कितमना Ø व्यचिन्तयत्'' इति वाक्ये व्यचिन्तयत् इति आख्यातपदस्य आकांक्षा प्रथमपुरुष-एकवचन-प्रथमान्त-कर्तृपदे अस्ति, सा च पुरस्तात् वाक्यात् परिपूर्यते अध्याहारविधिना[3]। किन्तु वाक्ये कर्तृपदस्य साक्षाद् दर्शनं न भवति इति हस्तामलकवत् स्पष्टम्। सार्वनामिकशून्यत्वात् न भवति कापि अर्थबाधा वाक्याव-बोधने, न च कापि व्याकरणिकत्रुटिः। वस्तुतः अनया रीत्या कथनेषु लाघवत्त्वं भवति , विषयस्य च सुष्ठुरूपेण प्रतिपादनं भवति।

**3.2 कर्मपदशून्यता**

यासु भाषासु सार्वनामिकशून्यता अनुभूयते तासु प्रायः कर्तृपदस्य शून्यता एव प्रधाना भवति किन्तु संस्कृते कर्मपदस्यापि शून्यता समानमेव दृश्यते विविधग्रन्थेषु। यद्यपि कर्तृवाच्यप्रयोगेषु कर्मणः क्रियया सह न किमपि समानाधिकरणं भवति तथापि कर्मपदशून्यता नैसर्गिकतया आपतति। उदाहरणानि द्रष्टव्यानि –

(3) अहम् भासुरकम् प्रकोप्य स्वबुद्ध्या Ø अस्मिन् कूपे पातयिष्यामि।''

(3.क) अहम् भासुरकम् प्रकोप्य स्वबुद्ध्या (तम्) अस्मिन् कूपे पातयिष्यामि।''

अत्र उदाहरणे कर्मपदस्य आकांक्षा अस्ति किन्तु तस्य अदर्शनत्वात् अत्र सार्वनामिकशून्यताप्रसङ्‌गः। अस्य अध्याहारः पूर्ववर्तिवाक्येभ्यः क्रियते। अपरमुदाहरणमपि पश्यन्तु –

(4) त्वम् गान्धर्वेण विवाहेन Ø आत्मानम् प्रयच्छ, नोचेत् ØØ शापम् दत्त्वा सान्वयम् ते पितरम् भस्मसात् करिष्यामि'' इति ।

(4.क) त्वम् गान्धर्वेण विवाहेन (मह्यम्) आत्मानम् प्रयच्छ, नोचेत् (अहं) (त्वां) शापम् दत्त्वा सान्वयम् ते पितरम् भस्मसात् करिष्यामि'' इति।

अस्मिन् पञ्चतन्त्रस्य वाक्ये तु सार्वनामिकशून्यतायाः स्थलत्रयं वर्तते किन्तु कर्मदस्य विचार्यमाणत्वात् अत्र तृतीयं स्थलं प्रासङ्‌गिकं वर्तते। वक्तुः श्रोतुः च मनस्सु कर्मपदस्य सक्रियतया विद्यमानत्वात् तस्य अर्थबोधः शब्दतः अप्रयुज्यमानत्वेऽपि भवति। अतः अत्र कर्मपदस्थानिसार्वनामिकशून्यता विषयः संघटितः।

**3.3 सम्प्रदानपदशून्यता**

कर्मपदशून्यतावत् सम्प्रदानशून्यता अपि संस्कृतभाषायां सहजं नैसर्गिकञ्च। यदि कस्मिंश्चित् प्रकरणे सम्प्रदानस्थानिपदं वक्तुः श्रोतुः च मनस्सु सक्रियतया विद्यमानं भवति तदा एतत्प्रकारकशून्यतायाः प्रसङ्‌गः प्रसक्तः भवति। इयं शून्यता तत्रैव साधीयते यत्र क्रियापदस्य आकांक्षा एकस्मिन् सम्प्रदानपदेऽपि भवति । उपरितनमुदाहरणमत्रपि ङ्कस्तूयते –

(4) त्वम् गान्धर्वेण विवाहेन क्र आत्मानम् प्रयच्छ, नोचेत् ''शापम् दत्त्वा सान्वयम् ते पितरम् भस्मसात् करिष्यामि'' इति ।

(4.क) त्वम् गान्धर्वेण विवाहेन (मह्यम्) आत्मानम् प्रयच्छ, नोचेत् (अहं) (त्वां) शापम् दत्त्वा सान्वयम् ते पितरम् भस्मसात् करिष्यामि'' इति ।

अत्र प्रथमं शून्यतास्थलं सम्प्रदानपदस्थानी। शेषं पूर्ववत् अवगन्तव्यम्। अस्य द्वितीयमुदाहरणं विलोकयन्तु -

(5) त्वाम् दृष्ट्वा दूरतः अपि चौरसिंहः प्रविष्टः स्वम् दुर्गम्। तत् Ø आगच्छ, येन दर्शयामि इति ।

(5.क) त्वाम् दृष्ट्वा दूरतः अपि चौरसिंहः प्रविष्टः स्वम् दुर्गम्। तत् (त्वम्) आगच्छ, येन ØØØ(अहं) (तुभ्यं) (तम्) दर्शयामि इति ।

इदं बहुसुन्दरमुदाहरणं यद् युगपदेव शून्यतात्रयम् उदाहरति। शोधांशे सम्प्रदानस्य अधिकारत्वात् तदेव अत्र द्रष्टव्यं सुधीभिः।

**3.4 अधिकरणपदशून्यता**

सार्वनामिकशून्यता अधिकरणस्थलेष्वपि दृश्यते किन्तु ई–क्प्रयोगाः विरलाः एव। अधोलिखितोदाहरणे पतनक्रियायाः आकांक्षा एकस्मिन् अधिकरणपदे वर्तते यत्र पतनक्रिया अवसिता भवति। किन्तु तस्य उल्लेखः वाक्ये शब्दशः न दृश्यते अतः अधिकरणपदशून्यता अत्र द्रष्टव्यम्।

(6) अत्रान्तरे चित्रग्रीवः नाम कपोतराजः सहस्रपरिवारः प्राणयात्रार्थम् परिभ्रमन् तान् तण्डुलान् दूरतः अपि पश्यन् लघुपतनकेन निवार्यमाणः अपि जिह्वालौल्यात् भक्षणार्थम् Ø अपतत् , सपरिवारः निबद्धः च ।

(6.क) अत्रन्तरे चित्रग्रीवः नाम कपोतराजः सहस्रपरिवारः प्राणयात्रार्थम् परिभ्रमन् तान् तण्डुलान् दूरतः अपि पश्यन् लघुपतनकेन निवार्यमाणः अपि जिह्वालौल्यात् भक्षणार्थम् (तण्डुलेषु) अपतत् , सपरिवारः निबद्धः च।

**3.5 षष्ठ्यन्तपदशून्यता**

संस्कृतग्रन्थेषु षष्ठ्यन्तपदानामपि शून्यता दृग्गोचरी भवति। इदं षष्ठ्यन्तपदं सम्बन्धविवक्षायां प्रयुक्तं भवति, अर्थावबोधे च आवश्यकं भवति। किन्तु अस्य पदस्य अपि शून्यता संस्कृतभाषायां प्राचुर्येण दृश्यते। उदाहरणमिदम् अध्येतव्यम्। यदा वयं अस्य वाक्यस्य हिन्दीभाषायामनुवादं कुर्मः तदा अदृष्टपदानामनुभूतिः सहजतया भवति।

(7) देवी अपि... ताम् खण्डिताधराम् नखविलिखितशरीरावयवाम् Ø दुहितरम् अपश्यत्, ‘‘देव! दिष्ट्या वर्धसे। नित्यम् एव निशीथे भगवान् नारायणः Ø कन्यकापार्श्वे अभ्येति’’।

(7.क) देवी अपि... ताम् खण्डिताधराम् नखविलिखितशरीरावयवाम् (आत्मनः) दुहितरम् अपश्यत्, ‘‘देव! दिष्ट्या वर्धसे। नित्यम् एव निशीथे भगवान् नारायणः (आवयोः) कन्यकापार्श्वे अभ्येति’’।

संस्कृतं नाम भारतीयानां शास्त्रीयभाषा। अस्य शास्त्रीयभाषात्वात् अस्य सर्वविधविकासः सञ्जातः। अस्य शब्दराशिः समृद्धः, शैलीगतविशेषताः च अनेकाः, व्याकरणनियमाः स्थिराः इति वयं जानीमः। संस्कृतभाषायाः सर्वनामव्यवस्था अपि प्रौढ़ावस्थां वर्तते। सार्वनामिकशून्यता अस्याः रुचिरं वैशिष्ट्यम्। न केवलं कर्तृपदे अपितु कर्म, सम्प्रदानं, अधिकरणं तथा च षष्ठ्यन्तपदम् इत्येतेषां सर्वेषां स्थलेषु सार्वनामिकशून्यता भवितुं शक्यते इति अधीतमस्माभिः अस्मिन् शोधपत्रे। सार्वनामिकशून्यता तदैव भवितुमर्हति यदा सम्बन्धितपदानां बोधः प्रकरणाद् भवति यतो हि तेषां पदानां सक्रियता वक्तुः श्रोतुः च मनस्सु जायमाना भवति। इदमेव अस्य प्रयोगस्य मनोवैज्ञानिककारणम्। विषयोऽयं सार्वनामिकशून्यतायाः प्रकरणविश्लेषणाय अत्यन्तं समुपयोगी वर्तते। यान्त्रिकानुवादक्षेत्रेऽपि अस्य अध्ययनस्य माहात्म्यमवगन्तुं शक्यते।

**सन्दर्भग्रन्थाः-**


1. *Gopal, Madhav (2012), Anaphor Resolution in the Sanskrit Text Panchatantra, Saarbrucken: LAP LAMBERT Academic Publishing.*
2. *Gopal, Madhav, and Jha, Girish. N. (2012), "Resolving Anaphors in Sanskrit", Lecture Notes in Artificial Intelligence, vol- 8387, Heidelberg: Springer.*
3. *Gopal, Madhav, and Jha, Girish. N. (2018), "Zero Pronouns and Their Resolution in Sanskrit Texts", in Thampi S., Mitra S., Mukhopadhyay J., Li KC., James A., Berretti S. (eds) Intelligent Systems Technologies and Applications. ISTA 2017. Advances in Intelligent Systems and Computing, vol. 683, Cham: Springer.*
4. *Mishra, Abhiraja Rajendra (2002), Mahakavivishvanath-aviracitah Sahityadarpanah, Prayagraj: Akshayavata Prakashana.*

5. *Rizzi, Luigi (1986), "Null objects in Italian and the theory of pro", Linguistic Inquiry 17:501–57*

**सन्दर्भाः -**

1. *अस्मिन् शोधपत्रे इदमुदाहरणं विहाय सर्वाणि उदाहरणानि पञ्चतन्त्रात् ग्रहीतानि सन्ति। इदञ्च स्वनिर्मितं वर्तते।*
2. *सार्वनामिकशून्यतायाः स्थलं संकेतयितुं Ø इति संकेतं सर्वत्र प्रदत्तमस्ति।*
3. *अध्याहारसहितं वाक्यरूपं सर्वत्र उदाहरणेषु (क) इति योजयित्वा प्रदर्शितमस्ति अस्मिन् शोधपत्रे अर्थावबोधसौकर्यार्थम्।*

●●●

# 25

# तीर्थस्थलसाधनामार्गयोः दार्शनिकमध्ययनम् : हिमाचलशतकविशेषसन्दर्भे

निहारिकाधाकड़

मानवीयजीवने तीर्थस्थानानि आध्यात्मिकोत्कर्षस्य प्रतीकानि सन्ति। तीर्थभूमिषु भक्तजनाः ध्यानं कृत्वा आत्मशुद्धिं सम्पाद्य मोक्षमार्गं प्राप्नुवन्ति। अद्यतनकाले एते उपासना भक्तेः संयमस्यकरुणायाः सदाचारस्य च केन्द्राणि सन्ति। ते भारतीय दर्शन संस्कृत्याः अध्यात्मस्य च जीवन्त प्रतीकत्वेन प्रसिद्धानि भवन्ति। यत्र गत्वा मानव हृदयं शान्तिं अनुभवति। ऋग्वेदे तथा वैदिक संहितासु ''तीर्थ'' शब्दः मार्गस्य अर्थे प्रयुक्तः अस्ति। स्कन्दपुराणे च तीर्थस्य विषयेकथ्यतेयत्-

**''सत्यं तीर्थं क्षमा तीर्थंतीर्थमिन्द्रियनिग्रहः।**
**सर्वभूतदयातीर्थंतीर्थमार्जवमेव च।।''**[1]

A.L.Basham-"pilgrimages to sacred places were an important part of religious life in ancient India."[2]

मानवः साधनामार्गेण निर्मलचित्तत्वं प्राप्य परमात्मनः आत्मनश्च ऐक्यस्य अनुभूतिं लभते। अयं साधनामार्गः सम्पूर्णजीवनस्य सा साधना अस्ति, यस्मिन्जनः मोहं, अहंकारं, लोभं च परित्यज्य प्रेम, करुणा, यथार्थज्ञानरूपं मार्गं अनुवर्तते। श्रीमद्भगवद्गीतायां अपि अस्य साधनामार्गस्य निरूपणं कृतम् अस्ति-

**''एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः।**
**अघायुरिन्द्रियारामोमोघं पार्थ स जीवति।।''**[3]

Max Müller- "Indian Sādhanā is not mere ritual but a discipline for realization of the Infinite."[4]

अभिराजराजेन्द्रमिश्रः आधुनिकसंस्कृतसाहित्यस्य प्रतिष्ठितः रचनाकारः अस्ति। तेन हिमाचलशतकम्नामकं यात्राकाव्यं रचितम्। अस्मिन् यात्रा काव्ये हिमालयप्रदेशस्य प्राकृतिकसौन्दर्यं, भारतीयसंस्कृतिः, मानवीयमूल्यानि, तीर्थस्थानानि तथा साधनामार्गः च स्पष्टतया दृष्टुं शक्यन्ते। अत्र स्थितानि तीर्थ स्थानानि सांस्कृतिकानि, मानसिकानि आध्यात्मिकार्थे च प्रमुखानि सन्ति। हिमालयस्य नद्यः, जलप्रपाताः, वनानि, पर्वतशृङ्खलाः, हिमधाराः च अस्य प्रदेशस्य विकासस्य मुख्य स्रोताः भवन्ति। ऋषीणां ध्यानाभ्यासेन एव एते स्थला विशेषं स्वरूपं प्राप्नु वन्ति।

अत्र स्थितः साधनामार्गः भक्तियोगेन, कर्मयोगेन, ज्ञानयोगेन, ध्यानयोगेन च संयुक्तः अस्ति। एते तीर्थ स्थानानि साधकं साधनायाः मार्गे प्रेरयन्ति, तथा च मनः शान्तिं दत्वा मानवजीवनस्य परम लक्ष्यं मोक्षमार्गं प्रदर्शयन्ति। एषु तीर्थस्थलेषु विद्यमानः रसः अलंकारश्च मिलित्वा साधना मार्गस्य च तीर्थानां च अनुभवेषु भावात्मकं पूर्तिं कृत्वा तेषां जीवन्तं स्वरूपं निर्मायन्ति।

हिमाचलशतके निहितयोः साधना मार्गस्य तीर्थ स्थानानां च दर्शनात्मक पक्षस्य उद्देश्यं तदस्ति- येन तीर्थ साधनयोः परम्परागतं महत्त्वं प्रकाश्य, आधुनिक जीवने तीर्थयात्रायाः साधनायाश्च प्रासङ्गिकता प्रदर्श्यते। अस्य शोधपत्रस्य पद्धतिः गुणात्मक वर्णनात्मकादि पद्धतीनां उपयोगेन निरूपिता भविष्यति।

**हिमाचलशतके निहितानां तीर्थस्थानानां तत्त्वानि-**

प्रत्येकस्य तीर्थस्थानस्य प्राकृतिकं स्वरूपं तस्य आध्यात्मिक महत्त्वं वर्धयति। हिमालये विद्यमानाः हिमधाराः, झरन्ति जलप्रवाहाः, नद्यः, हिमश्रृंखलाश्च तीर्थस्थानानां सौन्दर्याय शोभायै च रम्यां पृष्ठभूमिं निर्मन्ति। हिमाचलस्य रहस्यमयी प्रकृतौ मनोहराणां पक्षिणां मधुरवाणी, दुर्लभस्य कस्तूरी मृगस्य च उपस्थिति तत्र स्थले निरन्तरं शोभां वर्धयति-

**''ललामलावण्यमयैर्निसर्गे-र्विहङ्गमैर्वर्णवचोऽभिरामैः।**
**अलभ्यकस्तूरिमृगैश्चनित्यं विभातिहैमाचलकप्रदेशः।।''[5]**

**हिमाचलशतके विद्यमानाः आध्यात्मिक धार्मिकतत्त्वानि-**

हिमाचलशतके निर्दिष्टानि तीर्थस्थानानि पूजाध्यानभक्तीनां प्रमुखकेन्द्राणि-सन्ति। एतानि स्थानानि साधकं आत्मसाक्षात्कारमाध्यमेन

ब्रह्मज्ञानप्राप्तौ प्रेरयन्ति। जाखुपर्वतः हनुमतस्पर्शेन पवित्रः अभवत्। एतत्स्थलम् अत्र आगतान्भक्तान् प्रति वीरतायाः सन्देशं दत्वा भक्तेः परमं उत्कर्षं ददाति-

**''श्रीरामभक्तेन पवित्रिताङ्ग-शैलस्ततोऽयं महतीमभिख्याम्।**
**उपैति तीर्थप्रतिमप्रतिष्ठो हिमाचले वीरशरीरकल्पः।।''**[6]

सिरमौरदेशे रेणुका नामकं प्रसिद्धं तीर्थं स्थितम् अस्ति। तत् स्थलं घनवनैः संवलितं पूर्णरूपेण सुशोभते। यथा- यमुना-कलिन्दजा- नद्योः स्पर्शमात्रेण मनुष्याणां सर्वे पापानि नश्यन्ति, तथा अस्मिन्तीर्थे आगत्य अपि मनुष्याः स्वपापेभ्यः मोक्षमवाप्नुवन्तः-

**''कलिन्दजास्पर्शविधूतपापे गम्भीरकान्तारततिप्रपन्ने।**
**तीर्थं शुभं तिष्ठति रेणुकाख्यं वसुन्धरांशे सिरमौरनाम्नि।।''**[7]

**हिमाचलशतके सांस्कृतिकानुभवात्मकतत्त्वानि-**

मालभूमेः समीपे मध्ये पुरं नामकं अद्भुतं नगरं विराजते। तत् नगरं मानवानां नेत्रेभ्यः उत्सवसदृशं आनन्दं ददाति। घण्टामार्गस्य समीपेसमृद्धानां-दुकानानां पतयःतत्रदृश्यन्ते, या अस्य नगरस्य विशिष्टधरोहरस्य ध्वजांदोलायन्ति।

**''मध्येपुरं राजति मालभूमि छविल्लनेत्रोत्सवमादधाना।**
**घण्टापथप्रान्तनिविष्टचञ्च-च्छतापणैस्सन्दधतीसमृद्धिम्।।''**[8]

अत्रस्थिता श्यामवर्णा नदी मन्दरूपेणगम्भीररूपेण च प्रवहति। आदौ कालखण्डे सा नदी सिन्धुनद्यां प्रविश्य मिलिता आसीत्। वर्तमानकाले सा सूर्यकन्या तपस्विनी रूपं धारयित्वा संकीर्णरूपेण शोभांवहति-

**''श्यामा सलीलाऽनिलकम्पिताङ्गी तरङ्गितामन्दगतिर्गभीरा।**
**प्राक्सिन्धुसङ्गादिह भानुकन्या तपस्विनी क्षीणतनुर्विभाति।।''**[9]

सम्पूर्णब्रह्माण्डे शोभाराशिरूपा माता पार्वती अत्र प्रज्वलितशस्त्र-वत्प्रतिष्ठिता अस्ति। सा सर्वेषां प्राणिनां प्रति अतिशयेन स्नेहम्वहति। ये जनाः स्वकर्मतः विमुखाःसन्तःहिंसाकर्मणि प्रवृत्ता भवन्ति, तान्एषा सम्पूर्णरूपेण दण्डं दत्वा तेषां चित्तशुद्धिं करोति-

**''निरन्तरप्रोज्ज्वलहेतिकल्पा ब्रह्माण्डसौन्दर्यनिधानभूता।**
**सुवत्सलादक्षसुता भवानी दहत्यलंपातकमागतानाम्।।''**[10]

अभिराजराजेन्द्रमिश्रः वर्णयन्ति यत्हिमाचलप्रदेशस्य अद्भुतसौन्दर्य-सम्पन्नेषु स्थलेषु मेघानां तीव्रता वर्धमानासति सहसा एव ओलावृष्टिः आरभ्यते। ततः अनन्तरं क्षणमात्रेण एव स एव प्रदेशः वसन्तकालेन सदृशः प्रतीतिः भवति-

**''हैमाचले दिव्यरुचिप्रदेशे बलाहकोद्दामगतिप्रभिन्ने।**

**क्षणेन वर्षाः करकावपाताः क्षणेन वासन्तदिनानि भान्ति।।''**[11]

हिमाचलशतके निहितः साधनामार्गस्य ज्ञानयोगः तथा बौद्धिकतत्त्वानि – अस्य मार्गस्य अन्तर्गते मानवः विवेकं तर्कं च आश्रित्य आत्मचिन्तनपूर्वकं सत्यस्य-अन्वेषणं करोति। अस्य भूमौ दशमेशगोविन्दसिंहेन अनेके तपःकठोराः कृताः, येन एषः स्थलः मोक्षस्थलरूपेण प्रतिष्ठितः अभवत्। वर्तमानकाले च अयं स्थलः अद्‌भुतवैभवेण युक्तः अस्ति-

**''तपांस्यचिन्त्यानिधियापितेपे गोविन्दसिंहो दशमेशसंज्ञः।**

**यत्र चलेतद्धिपवित्रमोकः पुरं विलासोपपद[1]चकास्ति।।''**[12]

**हिमाचलशतकेमानसिकंध्यानतत्त्वं च-**ध्यानतत्त्वेसाधकःआत्मनः परमात्मनश्च ऐक्यं अनुभवति। मानसिकतत्त्वं तु साधकं धैर्येण, दृढतया च अंतःशक्त्या च संपन्नं कृत्वा तं जीवनमार्गे आध्यात्मदिशि प्रेरयति। प्राचीनकाले शिवदर्शनलालसः बालकनाथः शिवपद्‌मन्यस्तया वृद्धतपस्विन्या समीपं-प्राप्तः सन् तया शिवदर्शनप्राप्तेः उपायं पृष्टवान्। तस्याः निर्दिष्टमार्गस्य अनुसरणं कृत्वा सः शिवः सर्वविद्याः अधिगतवान्। अद्य तदेव बालकनाथः बालरूपधारी महात्मा भूत्वा सनत्कुमारसदृशः दृश्यते-

**''स्थाणुप्रसादात्समविद्यःतविद्यः शिवत्वसिन्धूर्मिविहारदक्षः।**

**स सत्यवाङ्नित्यशिशुर्महात्मा सनत्कुमारोऽभिनवो बभूव।।''**[13]

**हिमाचलशतके व्यावहारिककर्मयोगयोस्तत्त्वम्-**अत्रसाधकः आत्मिकशान्तिं प्राप्नोति। व्यावहारिकतत्त्वं जीवनस्य संयमसेवाकरुणानिष्ठामार्गे गमनं शिक्षयति। हिमालयभूमिः फलपुष्परेशमीवस्त्रसमृद्धाविलासिनीरूपेण प्रतिष्ठिता अस्ति। एषाविविधया- नगरवासिनः नित्यं आकर्षयति-

**''सुवर्णमाणिक्यफलप्रसून- द्राक्षासवक्षौममधुप्रपञ्चौः**

**विलासिनीयं विपणिस्सकामा नित्यं समाकर्षति पौरवर्गम्।।''**[14]

हिमालयस्य एषा भूमि अधर्मीजनानां नाशं करोति तथा शिष्यपरम्परा-नुगामिनः जनान्उन्नतेः मार्गेप्रशस्यति। व्रतधारिणां साधकानां कृते एषा भूमि पवित्रतीर्थरूपेण स्थिताऽस्ति, यत्र ते आत्मशुद्धिं प्राप्त्वा मोक्षमार्गं प्राप्नुवन्ति तथा दिव्यशान्तिं अनुभवन्ति-

**''ततःप्रभृत्येवतपःस्थलीयं तीर्थायिताशिष्यमताश्रितानाम्**

**विधर्म्यनाचारविनाशकानां स्वधर्माभ्युदयव्रतानाम्।।''**[15]

**हिमाचलशतके अनुभवात्मकं तथा आध्यात्मिकं तत्त्वम्-**अनुभवात्मकतत्त्वे साधकः प्रत्यक्षानुभूत्यैव यथार्थज्ञानं प्राप्नोति। आध्यात्मिकतत्त्वे मानवः विश्वस्य रहस्यस्वरूपं- ज्ञातुं प्रयत्नं करोति। कविः वदति यत्हिमालयस्य विशालाः शृङ्गाः विजयध्वजं दोलाय- मानं कुर्वन्ति। एते शिखराः अत्र आगतानां यात्रिकाणां कृते कथारूपं विषयं श्रावयन्ति-

**''यदीयश्रृङ्गेषु जयध्वजाङ्का अनोकहादूरतएवलक्ष्याः।**
**नवागतेम्यः प्रघुणेभ्य इष्टा-माख्यान्ति कीर्तिंतुहिनाचलस्य।।''**[16]

**हिमाचलशतके श्रद्धा-भक्ति तत्त्वम्-**एतत्तत्त्वं साधकं नम्रतया, प्रेम्णा च समर्पणभावेन च पूरयति। भक्ति साधकस्यचित्तं विशुद्धं कृत्वा ईश्वरस्य अनुभूतिं जनयति। हिमाचले ज्वालामुखीदेवीप्रतिष्ठिता अस्ति। अस्याः देव्या अग्निज्वालाः भक्तजनानां कष्टान् इति विश्वासः नाशयन्ति-

**''हुताशनज्वालवतीपराम्बा प्रपन्नभक्तार्तिवरूथदग्ध्री।**
**अनन्तकालादिहदेवभूमौ विराजते शंसितसिद्धपीठा।।''**[17]

हिमाचलशतकम् साधना, श्रद्धा, भक्ति, प्राकृतिक-सौन्दर्य तथा आध्यात्मिक-विकासस्यप्रसिद्धं काव्यम् अस्ति। अत्र ज्वालामुखी, चामुण्डा, रेणुका इत्यादयः तीर्थस्थानानिसाधकस्य हृदिदेवी चेतनां जागरयन्ति, तं च मोक्षमार्गे प्रेरयन्ति। हिमाचलस्य नद्यः, हिमधाराः, पर्वत श्रृंखलाश्च साधकं परमात्मनः सत्तां ज्ञापयन्ति, तस्मै च आत्मज्ञानस्य आलोकं प्रदर्शयन्ति।

**सन्दर्भग्रन्थसूची**


1. *व्यासमुनिः, स्कन्दपुराणं, अध्यायः-6, श्लोकः-30, चौखम्बासीरीजऑफिसकार्यालयः, वाराणसी*
2. *A.L.Basham, The Daily Round in city and village, page-35, Chapter-3, Edition-1954*
3. *स्वामीविवेकानन्दः, श्रीमद्भगवद्गीता संस्कृतपाठसहितंहिन्दीभाषानुवादयुक्तंग्रन्थं, रामकृष्ण-बेलूरमठः, संस्करणं-2020, श्लोकः-3.16*
4. *Max Müller, The Six Systems of Indian Philosophy, Longmans, Green & Co., London, 1899*

5. *मिश्रोऽभिराजराजेन्द्रः, अभिराजसहस्रकम्, वैजयन्तकाशनम्, प्रकाशनवर्षम्-2000, श्लोकः-26*
6. *मिश्रोऽभिराजराजेन्द्रः, अभिराजसहस्रकम्, वैजयन्तप्रकाशनम्, प्रकाशनवर्षम्-2000, श्लोकः-19*
7. *मिश्रोऽभिराजराजेन्द्रः, अभिराजसहस्रकम्, वैजयन्तप्रकाशनम्, प्रकाशनवर्षम्-2000, श्लोकः-41*
8. *मिश्रोऽभिराजराजेन्द्रः, अभिराजसहस्रकम्, वैजयन्तप्रकाशनम्, प्रकाशनवर्षम्-2000, श्लोकः-27*
9. *मिश्रोऽभिराजराजेन्द्रः, अभिराजसहस्रकम्, वैजयन्तप्रकाशनम्, प्रकाशनवर्षम्-2000, श्लोकः-43*
10. *मिश्रोऽभिराजराजेन्द्रः, अभिराजसहस्रकम्, वैजयन्तप्रकाशनम्, प्रकाशनवर्षम्-2000, श्लोकः-54*
11. *मिश्रोऽभिराजराजेन्द्रः, अभिराजसहस्रकम्, वैजयन्तप्रकाशनम्, प्रकाशनवर्षम्-2000, श्लोकः-11*
12. *मिश्रोऽभिराजराजेन्द्रः, अभिराजसहस्रकम्, वैजयन्तप्रकाशनम्, प्रकाशनवर्षम्-2000, श्लोकः-62*
13. *मिश्रोऽभिराजराजेन्द्रः, अभिराजसहस्रकम्, वैजयन्तप्रकाशनम्, प्रकाशनवर्षम्-2000, श्लोकः-76*
14. *मिश्रोऽभिराजराजेन्द्रः, अभिराजसहस्रकम्, वैजयन्तप्रकाशनम्, प्रकाशनवर्षम्-2000, श्लोकः-28*
15. *मिश्रोऽभिराजराजेन्द्रः, अभिराजसहस्रकम्, वैजयन्तप्रकाशनम्, प्रकाशनवर्षम्-2000, श्लोकः-66*
16. *मिश्रोऽभिराजराजेन्द्रः, अभिराजसहस्रकम्, वैजयन्तप्रकाशनम्, प्रकाशनवर्षम्-2000, श्लोकः-8*
17. *मिश्रोऽभिराजराजेन्द्रः,अभिराजसहस्रकम्, वैजयन्तप्रकाशनम्, प्रकाशनवर्षम्-2000, श्लोकः-51*


●●●

# लेखक - परिचयः


***कपिलदेवहरेकृष्णशास्त्री*** - *सहायक-आचार्यः,*
*संस्कृतपाली, प्राकृतविभागः*
*महाराजासयाजीराव-*
*विश्वविद्यालयः वड़ोदरा, गुजरातम्-390002*

***ऋतुकयालः*** - *सहायक-प्राध्यापकः, संस्कृत-विभागः,*
*आर्यमहिला पी.जी. कॉलेज*
*(सम्बद्धः - काशीहिन्दूविश्वविद्यालयः)*
*वाराणसी, उत्तरप्रदेशः*

***सत्यव्रतपाण्डेयः*** - *सहायक-प्राध्यापकः, वेदविभागः*
*केन्द्रीयसंस्कृतविश्वविद्यालयः*
*श्रीरणवीरपरिसरः जम्मू*

***बालखड़ेभूपेन्द्रअरूणः*** - *सहायकाचार्य-संस्कृतविभागः, पालिप्राकृतभाषा*
*इलाहाबादविश्वविद्यालयः*
*प्रयागराजम्-211002*

***राहुलशर्मा*** - *सहायकाचार्यः, व्याकरणम्-केन्द्रीय-संस्कृत-*
*विश्वविद्यालयः भोपालपरिसरः*

***शान्तिलालः सालवी*** - *एसोसिएट प्रोफेसर- संस्कृत-विभागः*
*दिल्लीविश्वविद्यालयः, दिल्ली-110007*

***सकीना कुमारी सालवी*** - *602, न्यूटीचर्स फ्लैट, जोधपुरी कॉलोनी*
*काशीहिन्दूविश्वविद्यालयः वाराणसी-221005*

***संजयकुमारः*** - *सह-आचार्य-संस्कृतविभागः*
*दिल्ली विश्वविद्यालयः*

| | | |
|---|---|---|
| ***नौनिहालगौतमः*** | - | *सहा.-आचार्यः संस्कृत-विभागः*<br>*डॉ. हरिसिंहगौरकेन्द्रीयविश्वविद्यालयः,*<br>*सागरम् (म.प्र.) 470003* |
| ***सूर्यभानयादवः*** | - | *संस्कृतविभागः-शोधार्थी*<br>*दिल्ली विश्वविद्यालयः, दिल्ली-110007* |
| ***जागेश्वरपटले*** | - | *प्रान्तसंघटनमंत्री, मध्यभारतसंस्कृतभारती* |
| ***अवधेशकुमारश्रोत्रियः*** | - | *सहायक  आचार्यः-स्नातकोत्तर-ज्योतिषविभागः,*<br>*कामेश्वरसिंहः संस्कृतमहाविद्यालयः*<br>*दरभंगा बिहारम्* |
| ***राकेशकुमारमिश्रः*** | - | *सहायकाचार्यः- सर्वकारीयमहाविद्यालयः*<br>*पुरी उड़ीसा* |
| ***सुबलकुमारमिश्रः*** | - | *अतिथि-अध्यापकः- पंचायतमहाविद्यालयः*<br>*बारम्गड़ उड़ीसा* |
| ***मोनिका जांगिड़*** | - | *शोधच्छात्रा- संस्कृतविभागः,*<br>*राजस्थानविश्वविद्यालयः* |
| ***गैरिका कोनारः*** | - | *शोधच्छात्रा- पटनाविश्वविद्यालयः,*<br>*स्नातकोत्तर संस्कृत विभाग, पटना-800005* |
| ***शुकदेवः भोई*** | - | *वरिष्ठाचार्यः, श्रीलालबहादुरशास्त्री राष्ट्रीय-*<br>*संस्कृतविश्वविद्यालयः नवदेहली*<br>*पूर्वकुलपतिः- विनोदबिहारीमहतोकोयालाचंलः*<br>*विश्वविद्यालयः झारखंडम्* |
| ***निरूपमा त्रिपाठी*** | - | *एसोसिएट प्रोफेसर-संस्कृतपालिप्राकृतं एवं*<br>*प्राच्य-भाषाविभागः, इलहाबादविश्वविद्यालयः,*<br>*प्रयागराजम्* |

| | | |
|---|---|---|
| ***शुभ्रजित् सेनः*** | - | *सहायकाध्यापकः, संस्कृत-विभागः, गौड़वंगविश्वविद्यालयः मालदा पश्चिमबंगालम्* |
| ***मोनिका वर्मा*** | - | *सहाचार्या- संस्कृतानुभाग- महिलामहाविद्यालयः, काशीहिन्दू-विश्वविद्यालयः वाराणसी उत्तरप्रदेशः* |
| ***आशुतोषः द्विवेदी*** | - | *सहायकाचार्यः-संस्कृतविभागः, जयप्रकाशविश्वविद्यालयः, छपरा* |
| ***किरण आर्या*** | - | *सहा. प्रा.- संस्कृतविभागः, डॉ. हरीसिंहगौरविश्वविद्यालयः सागरम् (म.प्र.)* |
| ***बाबूलालः मीना*** | - | *सहाचार्यः - संस्कृतविभागः दिल्ली विश्वविद्यालयः, दिल्ली* |
| ***आशासिंहरावतः*** | - | *सहाचार्यः - संस्कृतविभागः दिल्ली विश्वविद्यालयः, दिल्ली* |
| ***खालिद् हसन् अब्बासी*** | - | *संस्कृतविभागः- शिब्ली नेशनल कॉलेज आजमगढ़े उत्तरप्रदेशः* |
| ***रविकान्तभारद्वाजः*** | - | *सहायकाचार्यः- पं. कमलापतित्रिपाठी-राजकीयस्नातकोत्तरमहाविद्यालयः चन्दौली* |
| ***माधवगोपालः*** | - | *सहायकप्राध्यापकः- संस्कृतविभागः आत्मारामसनातनधर्म महाविद्यालयः दिल्ली विश्वविद्यालयः, धौलकुआं-नवदेहली* |
| ***निहारिका धाकड़ः*** | - | *शोधार्थी- 3/236/2/3 नगला धाकरान, नाईमण्डी, आगरा।* |

●●●


vivo T3 Ultra
09/04/2025, 12:51


संस्कृत-विभाग
डॉक्टर हरीसिंह गौर विश्वविद्यालय, सागर (म.प्र.)
संस्कृत-सप्ताह




संस्कृत-विभाग
डॉक्टर हरीसिंह गौर विश्वविद्यालय, सागर (म.प्र.)


संस्कृत-विभाग
vivo T3 Ultra
11/21/2025, 16:10


संस्कृत-विभाग
डॉक्टर हरीसिंह गौर विश्वविद्यालय, सागर (म.प्र.)



ISSN : 2229-5577
Peer Reviewed Journal

उदयति सूर्यः किरणसहस्रैः
खगगणरावः प्रसरति लोके,
पवनविलासः सुखयति सर्वान्
कुसुमगन्धो वितरति हर्षात्।
मुनिजनसंघो हरिगुणमग्नः
बटुसमुदायः पठति च वेदान्,
विहरति बालः प्रकृतिमनोज्ञान्
स्मितमृदुहासः सुखयति लोकम्।।

रचना - पं. प्रेमनारायणद्विवेदिकृता

सागरिकासमितिः
संस्कृतविभागः
डॉ. हरीसिंहगौरविश्वविद्यालयः, सागरम्
मध्यप्रदेशः (भारतम्)